२४५५

श्रीजिनाय नमः।

श्रीवर्द्धमानसूरिविरचितः।

आचारदिनकरः।

प्रथमोऽरुणोदयः।

तत्त्वज्ञानमयो लोके आचारं यः प्रणीतवान्। केनापि हेतुना तस्मै नम आद्याय योगिने ॥ १ ॥
आत्मान्तर्ध्यानहेतोर्वा कारुण्यादथ देहिनाम्। य आचारं स्वयं चक्रे तं वन्देऽर्हन्तमादिमम् ॥ २ ॥
तत्प्रसादात्सुखालोक्ये पथि तत्त्वोपयोगिनि। यो लोकाचारमाचख्यौ तस्मै सर्वात्मने नमः ॥ ३ ॥
अनादितत्त्वज्ञातापि स्वस्य मोक्षप्रदोऽपि च। स्वयं चचाराचारं यो नमस्तस्मै स्वयंभुवे ॥ ४ ॥
यस्याः श्रुतेः परा वाणी पूजनात्परमाः श्रियः। तत्त्वालोकः परं ध्यानात्तस्या अर्हद्गिरे नमः ॥ ५ ॥

सर्वर्द्धयः सुसंज्ञानं कीर्त्तिर्यस्याः प्रसादतः । प्राप्यते क्षणमात्रेण तामम्बां प्रणमाम्यहम् ॥ ६ ॥
विद्वत्पर्षत्सु गर्जन्ति मादृशा यत्प्रसादतः । नमोऽस्तु गुरुपादेभ्यस्तेभ्य एव प्रतिक्षणम् ॥ ७ ॥
उपायकोटिभिर्नैव प्राप्यं यत्तत्त्वमुत्तमम् । सुप्राप्यं यत्प्रसादात्तत् तस्मै श्रीगुरवे नमः ॥ ८ ॥
सत्यज्ञानात्सुखालोक्यः पन्थाः कैवल्यकारणम् । तच्चाचारवतां नृणामुन्मीलति विशेषतः ॥ ९ ॥
आगर्भवासाद् ज्ञातात्मा वृषभः परमः पुमान् । प्रविवेश यदाचारं तत्स प्रामाण्यमश्नुते ॥ १० ॥

इह हि केचिद्दर्शनमोहान्धधिय आर्हत १ सौगत २ वैशेषिक ३ नैयायिक ४ साङ्ख्य ५ चार्वाका ६ स्तत्त्वालोकना(मार्गा)नुसारिण एव अदृष्टतत्परमार्थाः सहृद्योपात्तप्रमातृप्रमेयप्रमाणप्रभावा आचारमेव तिरस्कुर्वन्ति । न तेषां वचः सद्भिः प्रमाणपथमुन्नेयं । यतः भगवानर्हन्नपि विदितसमस्तपरमार्थ आगर्भाद्राज्याभिषेकपर्यन्तसंस्कारान् स्वदेहेऽप्याविश्चकार । तथा च देशविरतिरूपे गृहिधर्मे प्रतिमोद्वहनादिसम्यक्त्वारोपणरूपमाचारमाचीर्णवान् । तथा निमेषमात्रशुक्लध्यानप्राप्येऽपि केवले यतिमुद्रातपश्चरणादि दीर्घकालं कलयति स्म । तथा च समुत्पन्ने केवले चिदानन्दरूपोऽपि त्यक्तपरापेक्षः समवसरणरचनाधर्मदेशनाविहारगणधरस्थापनसंशयव्यवच्छेदादि विधत्ते स्म । तथा च तस्मिन्नपि भगवति परिनिर्वृते बिडौजःप्रभृतयो वृन्दारकाः प्राणरहितस्यापि कर्त्तृकर्मव्यवच्छिन्नस्य तच्छरीरस्य संस्कारस्तूपप्रभृत्याचरणमाचरन्ति । तद् ध्रुवमार्हत-

१ 'शुभं' इति क्वचित्पाठः । सुखमिति पाठस्तु संगतः । २ 'ज्ञानात्मा' इत्यपि ।

मते लोकोत्तरपुरुषाचीर्णत्वादाचारः प्रमाणं। तत्त्वानुवादेऽपि (य आश्रवः संवरश्च) आश्रवे शुभाशुभचारिणो मनोवाक्कायैः शुभाशुभं कर्म बध्नन्ति, अत एव आचाररूप आश्रवः संवरश्च द्रव्यभावभेदेन क्रियातत्त्यागादाचाररूप एव। सौगतानां च मते सुखासिकाप्रभृतयः शरीरकार्याचारा[1] बुद्धार्चनरूपाश्च क्रिया मन्त्रस्मरणादयश्च शून्यवादेऽप्याचारमश्नन्ति। वैशेषिकाणां च मते विशेषपरीक्षाचारो यः स एव पूर्वमाचारस्य स्थापनाहेतुः। यदुक्तं, नहि क्रियात्मिकां परीक्षां विहाय विशेषज्ञानमिति। नैयायिकानां तु मते प्रमाणोपलंभरूपो न्याय इति। स च प्रमाणोपलंभो नहि क्रियाप्रतिपत्तिभिर्विना भूत इति तन्नैयायिकादिष्वाचार एव प्रमाणं। साङ्ख्यानां तु तत्त्ववादे प्रकृतिपुरुषयोश्चोपभोगार्थः संयोगः पङ्ग्वन्धयोरिव स प्रथममेवाचारान्तर्भूतः। चार्वाकाणां तु मते सर्वत्र नास्तिवादे सर्वं[2] शुभमाचाररूपत्व एव प्रतिपाद्यते। तदेवं षट्स्वपि दर्शनेषु आचार एवं[3] प्रमाणं। तदलं परमतालोकचिन्ताभिः। सांप्रतं प्रस्तुतकार्यसमर्थनाय स्वमतमेव प्रामाण्यं प्राप्यते। यदुक्तमागमे—

"नाणं सव्वत्थमूलं च साहा खंधा अ दंसणं। चारित्तं च फलं तस्स रसो मुक्खो जिणोइओ॥ १॥"

अतश्च सिद्धान्तमहोदधिकल्लोलरूपं चारित्रव्याख्यानं केन वक्तुं शक्यते? तथापि श्रुतकेवलिप्रणीतशास्त्रार्थलेशमवलम्ब्य किञ्चिदाचारयोग्यं वचः प्रस्तूयते। स चाचारो द्वेधा यत्याचारो गृहस्थाचारश्च। यदुक्तं—

---

१ "शारीरिकाचारा" इत्यपि पाठः। २ शून्यमिति बहुषु पुस्तकेषु। ३ एवकारो भिन्नक्रमः प्रमाणमित्यस्याग्रे द्रष्टव्यः।

"सावज्जजोगपरिवज्जणाओ सव्वुत्तमो जईधम्मो । बीओ सावगधम्मो तइओ संविग्गपक्खपहो ॥ १ ॥"

यतिधर्मो हि महाव्रतसमितिगुप्तिधारणपरीषहोपसर्गसहनकषायविषयजयश्रुतधारणबाह्याभ्यन्तरतपःकरणयोगैर्दुरासदो मोक्षस्य पन्थाः । गृहिधर्मश्च परिग्रहधारणसुखासिकायथेष्टविहारभोगोपभोगादिभिरौदारिकसुखलेशदायी न मोक्षदानायालंभूष्णुर्भवति । सोऽपि द्वादशव्रतधारणयतिजनोपासनार्हदर्चनदानशीलतपोभावनासंश्रयादिभिरुपचीयमानो मोक्षप्रदानाय यतेरिव । यत उक्तमागमे—

"विसमोवि निअडगमणो मग्गो मुक्खस्स इह जईधम्मो ।
सुगमोवि दूरगमणो गिहत्थधम्मो वि मुक्खपहो ॥ १ ॥"

तथा च खद्योतदिनकरयोरिव सर्षपसुराचलयोरिव घटिकासंवत्सरयोरिव यूकागजयोरिव महदन्तरं गृहिधर्मयतिधर्मयोः । यत उक्तमागमे—

"जह मेरुसरिसवाणं खज्जोअरवीणं चंदतारणं । तह अंतरं महंतं जइधम्मगिहत्थधम्माणं ॥ १ ॥"

अत एव यतिधर्मग्रहणस्य पूर्वसाधनभूतमनेकसुरासुरयतिलिङ्गिप्रीणनपरं जिनार्चनसाधुसेवादिसत्कर्मपवित्रितं गृहिधर्मं व्याचक्ष्महे । तत्रापि गृहिधर्मे पूर्वं व्यवहारसमुद्देशः । ततश्च गृहस्थधर्मकथनं । व्यवहारोऽपि प्रमाणं । यतः—ऋषभाद्या अर्हन्तोऽपि गर्भाधानजन्मकालप्रभृति व्यवहारं समाचरन्ति । यत उक्तमागमे—"समणस्स णं भगवओ महावीरस्स अम्मा पिउणो पढमे दिवसे ठिइपडिक्कमणं करंति, तइए दि-

वसे चंदसूरदंसणं कुणंति, छट्ठे दिवसे जागरिअं जागरंति; संपत्ते बारसाहदिवसे विरए"—इत्यादि व्यवहारकर्म भगवद्भिरप्याचीर्णमागमे निर्दिष्टं च। यतः—

"ववहारोवि हु बलवं जं वंदइ केवलीवि छउमत्थं। आहाकम्मं भुंजइ तो ववहारं पमाणं तु ॥ १ ॥"

लौकिकेऽपि—

"चतुर्णामपि वेदानां धारको यदि पारगः। तथापि लौकिकाचारं मनसापि न लङ्घयेत् ॥ १ ॥"

अत एव प्रथमं गृहस्थव्यवहारधर्माचरणाद्युपदर्श्यते। ततश्च साङ्गं यतिधर्मव्याख्यानम्।

"मोहान्धकारनिर्म्मलयतिगृहस्थादिदर्शनविधायि। आचारदिनकराख्यं शास्त्रं प्रस्तूयते पुण्यम् ॥ १ ॥"

आदौ गृहस्थधर्मकथने षोडशसंस्काराः। तद्यथा,—

"गर्भाधानं १ पुंसवनं २ जन्म ३ चन्द्रार्कदर्शनम् ४। क्षीराशनं ५ चैव षष्ठी ६ तथा च शुचिकर्म ७ च ॥ १ ॥
तथा च नामकरण ८ मन्नप्राशन ९ मेव च। कर्णवेधो १० मुण्डनं ११ च तथोपनयनं १२ परम् ॥ २ ॥
पाठारंभो १३ विवाहश्च १४ व्रतारोपो १५ ऽन्तकर्म च १६। अमी षोडशसंस्कारा गृहिणां परिकीर्त्तिताः ॥३॥
ब्रह्मचर्यं १ क्षुल्लकत्वं २ प्रव्रज्यो ३ त्थापना ४ तथा। तथा च योगोद्वहनं ५ वाचनाग्रहणं ६ तथा ॥ ४ ॥
ततश्च वाचनानुज्ञा ७ सोपाध्यायपदस्थितिः ८। आचार्यपदयुक्तिश्च ९ प्रतिमोद्वहनं १० तथा ॥ ५ ॥
व्रतिनी व्रतदानं च ११ प्रवर्त्तिनीपदक्रमः १२। महत्तरापदाचारो १३ दिनरात्रिस्थितिर्द्वयोः १४ ॥ ६ ॥

ऋतुस्थितिश्च सव्याख्या १५ मरणस्य विधिः पुनः १६। द्वाराणि षोडशैतानि यत्याचारे प्रदर्शयेत् ॥ ७ ॥
प्रतिष्ठा बिम्बचैत्यादेः १ शान्तिकं २ पौष्टिकं ३ बलिः ४। प्रायश्चित्तविधि ५ श्चैवावश्यकस्य विधिस्तथा ६ ॥८॥
तपोविधिस्त्रिविधोऽपि ७ पदारोपणमेव ८ च। गृहिसाध्वोः समानानि द्वाराण्यष्ट प्रकीर्त्तयेत् ॥ ९ ॥
चत्वारिंशत्प्रक्रमाश्च तावन्त उदया इह। शास्त्र आचारसूर्याख्ये प्रदर्श्यन्ते क्रमादतः ॥ १० ॥
गर्भाधानोदये चाद्ये १ तत्कर्माचरणं परम्। शान्तिदेव्याः परो मन्त्रो वेदस्थापनमेव च ॥ ११ ॥
द्वितीये २ ऽप्युदये व्याख्या कृता पुंसवनस्य च। जातकर्म तृतीये ३ च मूलर्क्षादिषु सूचितम् ॥ १२ ॥
चतुर्थे ४ ऽर्कचन्द्रदृष्टिः पञ्चमे ५ क्षीरभोजनम्। षष्ठे ६ षष्ठी जागरणं मातृणां पूजनं तथा ॥ १३ ॥
सप्तमे ७ शुचिकर्मैव नामकर्म तथाष्टमे ८। ग्रहलग्नादिपूजा च मण्डलीपूजने विधिः ॥ १४ ॥
नवमे ९ ऽन्नप्राशनं च दशमे १० कर्णवेधनम्। एकादशे ११ मुण्डनं च द्वादशे १२ चोपनीतता ॥ १५ ॥
जिनोपवीतव्याख्यानं तद्विधिर्व्रतबन्धनम्। व्रतादेशस्तद्विसर्गो गोदानं व्रतधारणम् ॥ १६ ॥
चतुर्णामपि वर्णानां संस्कारे व्रतशिक्षणम्। शूद्रस्य चोत्तरीयादि बटूकरणमेव च ॥ १७ ॥
त्रयोदशे १३ पाठविधिश्चतुर्दशमं १४ एव च। विवाहोऽष्टप्रकारश्च प्राजापत्यस्य विस्तरः ॥ १८ ॥
तैलस्नानादिकविधिर्वेदिस्थापनजो विधिः। पूजा कुलकराणां च तथाऽग्निस्थापनं पुनः ॥ १९ ॥

१ मागमो मात्रापूर्तिकृते कृत ऐच्छिकः।

अग्निसन्तर्पणं चैव तथार्घ्यविधिरुत्तमः । लाजमोक्षप्रदानं च गणिकानां विवाहनम् ॥ २० ॥
ततः पञ्चदशो १५ चैव सम्यक्त्वारोपणं परम् । द्वादशव्रतरोपश्च प्रतिमोद्वहनं तथा ॥ २१ ॥
उपधानतपश्चापि मालारोपणजो विधिः । परिग्रहप्रमाणं च गृहिणां शुनिशास्थितिः ॥ २२ ॥
अर्हत्पूजाविधिः श्रेष्ठो लघुस्नात्रविधिः शुभः । दिक्पालानां ग्रहाणां च पूजनं तत्र वै लघु ॥ २३ ॥
उपधानादि नन्दिश्च षोडशो १६ मृत्युजो विधिः । तत्र चाराधना श्रेष्ठा चतुःस्सरणमेव च[1] ॥ २४ ॥
क्षामणा चैव संस्कारः कथितो गृहमेधिनाम् । तथा च सप्तदशमे १७ ब्रह्मचर्यविधिः परः ॥ २५ ॥
अष्टादशो १८ क्षुल्लकत्वमेकोनविंश १९ एव च । व्रतयोग्यायोग्ययुक्तिर्गृहत्यागविधिः पुनः ॥ २६ ॥
प्रव्रज्याग्रहणं चैव तथा विंशोदये २० पुनः । उत्थापना व्रतोच्चार एकविंशो २१ तथैव च ॥ २७ ॥
योगोद्वहनयुक्तिश्च कालग्रहणजो विधिः । स्वाध्यायप्रस्थापनं च क्षमाश्रमणयोजना ॥ २८ ॥
कायोत्सर्गा वन्दनानि सङ्घट्टश्चोक्तपानकम् । क्रिया प्रतिदिनं चैव योगानां सार्द्धवार्षिकी ॥ २९ ॥
द्वाविंशो २२ वाचनायुक्तिस्त्रयोविंशो २३ यथाविधि । वाचनार्यपदप्राप्तिश्चतुर्विंशो २४ तथैव च ॥ ३० ॥
उपाध्यायपदारोपः पञ्चविंशो २५ ततः परम् । आचार्यपदयुक्तिश्च गुणा दोषाश्च तद्भवाः ॥ ३१ ॥
षड्विंशो २६ प्रतिमानां च वहनं व्रतधारिणाम् । सप्तविंशो २७ व्रतिनीनां व्रतदानमनुत्तरम् ॥ ३२ ॥
अष्टाविंशो २८ प्रवर्त्तिन्याः पदक्रमविशेषणम् । एकोनत्रिंशत्तमे २९ च महत्तरापदं गुणाः ॥ ३३ ॥

---

१ सरणमिति क्वचित् पाठः ।

त्रिंशत्तमे ३० व्रतिनां च व्रतिनीनां च सर्वथा। दिनरात्रिस्थितिश्चोपकरणानां च कीर्त्तनम् ॥ ३४ ॥
एकत्रिंशत्तमे ३१ साधुव्रतिन्योर्ऋतुजा स्थितिः। विहारलोचयुक्तिश्च व्याख्यानविधिरेव च ॥ ३५ ॥
द्वात्रिंशत्तम ३२ एवैषां मरणस्य विधिः परः। त्रयस्त्रिंशत्तमे ३३ देवचैत्यगेहजलात्मनाम् ॥ ३६ ॥
प्रतिष्ठा विस्तरादन्या तथा चैवाधिवासना। आह्वानं सर्वदेवानां पूजास्थापनमेव च ॥ ३७ ॥
बृहत्स्नात्रविधिश्चैव नन्द्यावर्त्तादिपूजनम्। कङ्कणच्छोटनं चैव मङ्गलाष्टकपूजनम् ॥ ३८ ॥
क्रयाणकानि स्वरसाग्नि ३६० मितानि शुभानि च। चतुस्त्रिंशत्तमे ३४ शान्तिकर्म सर्वार्चनान्वितम् ॥३९॥
ग्रहनक्षत्रशान्तिश्च तथा मूलादिशान्तिकम्। पञ्चत्रिंशत्तमे ३५ शान्तिपौष्टिकं कर्म सत्तमम् ॥ ४० ॥
षट्त्रिंशत्तमके ३६ ज्ञेयं बलिकर्म सुशोभनम्। सप्तत्रिंशत्तमे ३७ प्रायश्चित्तयुक्तिरनुत्तरा ॥ ४१ ॥
जीतकल्पभवा साधुगृहियोग्यार्थशोधिनी। दुःकर्मणां च बाध्यानां[1] शोधनं प्रोक्तमुत्तमम् ॥ ४२ ॥
अष्टात्रिंशत्तमे ३८ चैव सदावश्यकजो विधिः। सामायिकचतुर्विंशस्तववन्दनकादिषु ॥ ४३ ॥
प्रतिक्रमणकायोत्सर्गप्रत्याख्यानविचारणम्। एषां च योजना सर्वा व्याख्या विकृतिकादिषु ॥ ४४ ॥
व्याख्या पाक्षिकसूत्रस्य यतिश्रावकसूत्रयोः। शक्रार्हत्स्तुतिसिद्धादिस्तोत्रव्याख्यानमेव च ॥ ४५ ॥
व्याख्यानं वन्दनादीनां क्षामणालोचनास्वपि। स्थापनाचार्यमानं च कालदण्डादिमानकम् ॥ ४६ ॥

१ 'बाह्यानां' इत्यपि पाठः।

एकोनचत्वारिंशे ३९ च त्रिविधोऽपि तपोविधिः । चत्वारिंशत्तमे ४० चैव पदारोपो महत्तमः ॥ ४७ ॥
व्रतिनां ब्राह्मणानां च क्षत्राणां राज्यजा स्थितिः । सामन्तमण्डलेशादिमन्त्र्यादिपदयोजनम् ॥ ४८ ॥
तथा च वैश्यशूद्रादेः साङ्गपत्यपदस्थितिः । शूद्राणां कीर्त्तनं चैव सर्वेषां नामकीर्त्तनम् ॥ ४९ ॥
चत्वारिंशत्प्रमाणेषूदयेष्वेवं निदर्शनम् । अस्मिन् दिनकरापेक्षे चोदयस्थितिकारणम् ॥ ५० ॥
अत्र शास्त्रे यदुक्तं तत्सर्वमर्हन्मताश्रितम् । मिथ्यादृशां व्यवहारो न मनागपि दर्शितः ॥ ५१ ॥
आचारशास्त्रमित्यत्र वैदुष्यादि न दर्शितम् । भूयात्सुखेन व्याख्येयं साधूनामिति चिन्तया ॥ ५२ ॥
बृहत्स्नात्रविधौ किञ्चिद्यमकादिकमीरितम् । मूढेन कृतमित्येवं मा जानन्तु विचक्षणाः ॥ ५३ ॥
अस्मिन् यश्च यथारूपः पाठ उच्चारणादिकः । स तथैवोदितो बालावबोधार्थं न मौख्यतः ॥ ५४ ॥

अस्मिंश्चत्वारिंशतैवाधिकारैस्तत्त्वालोके पीठिकां योजयित्वा ।
ग्रन्थे ज्ञेयानुष्टुभामेव सङ्ख्या व्योमव्योमेषुद्विचन्द्र १२५०० प्रमाणा ११४ अ० २५ ॥
इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे संबन्धकारी शास्त्रपीठिकाभिधायिकीर्तनो
नामारुणोदयः पूर्णः प्रथमः ॥ १ ॥

इति प्रथमोऽरुणोदयः ।

१ व्योमव्योमाक्षेषु १५२०० इत्यपि पाठः ।

प्रथम उदयः ।

"व्रतारोपं परित्यज्य संस्कारा दश पञ्च च । गृहिणां नैव कर्त्तव्या यतिभिः कर्मवर्जितैः ॥ १ ॥"
यत उक्तमागमे—
"विजयं जोइसं चेव कम्मं संसारिअं तहा । विज्जामंतं कुणंतो अ साहू होइ विराहओ ॥ १ ॥"
ते पञ्चदश गृहस्थसंस्काराः केन कर्त्तव्याः? इत्युच्यते—
"अर्हन्मन्त्रोपनीतश्च ब्राह्मणः परमार्हतः । क्षुल्लको वात्तगुर्वाज्ञो गृहिसंस्कारमाचरेत् ॥ १ ॥"

प्रथमं गर्भाधानसंस्कारविधिः ॥ १ ॥

स यथा—
"सञ्जाते पञ्चमे मासे गर्भाधानादनन्तरम् । गर्भाधानविधिः कार्यो गुरुभिर्गृहमेधिभिः ॥ १ ॥
गर्भाधाने पुंसवने जन्मन्याह्वानके तथा । शुद्धिर्मासदिनादीनामालोक्यावश्यकर्मणि ॥ २ ॥
श्रवणश्च करः पुनर्वसू निऋतेर्भं[1] च सपुष्यको मृगः । रविभूसुतजीववासराः कथिताः पुंसवनादि कर्मसु ॥३॥"
अतश्च पञ्चमे मासे शुभतिथिवारर्क्षेषु पतिचन्द्रबलाद्यवलोक्य देशविरतो गुरुः कृतस्नानो बद्धधम्मिल्लो

१ अन्तर्भावितण्यर्थोऽत्र कृत् ।

धृतोपवीतोत्तरासङ्गो धौतनिवसनपरिधानो धृतपञ्चकक्षश्चन्दनतिलकाङ्कितललाटः सुवर्णमुद्रिकाङ्कितसावित्रीकः प्रकोष्ठबद्धपञ्चपरमेष्ठिमन्त्रोद्दिष्टपञ्चग्रन्थियुतः सदर्भकौसुम्भसूत्रकङ्कणो रात्र्युपासितब्रह्मव्रतः कृतोपवासाचाम्लनैर्विकृतिकैकासनादिप्रत्याख्यानः संप्राप्ताजन्मयतिगुर्वनुज्ञो जैनब्राह्मणः क्षुल्लको वा गृहिणां संस्कारकर्म (कारयितु)मर्हति ।

उक्तं च यतः—

"शान्तो जितेन्द्रियो मौनी दृढसम्यक्त्ववासनः । अर्हत्साधुकृतानुज्ञः कुप्रतिग्रहवर्जितः ॥ १ ॥
जितक्रोधलोभमायः कुलीनः सर्वशास्त्रवित् । अविरोधः कृपालुश्च समभूपतिदुर्गतिः ॥ २ ॥
स्वाचारं प्राणनाशेप्यमुञ्चन्नश्चितचेष्टितः । अखण्डिताङ्गः सरलः सदोपासितसद्गुरुः ॥ ३ ॥
विनीतो बुद्धिमान् क्षन्ता कृतज्ञः शौचवान् द्विधा । गृहिसंस्कारकार्येषु युज्यते गुरुरीदृशः ॥ ४ ॥"

ईदृशो गुरुर्गर्भाधानकर्मणि पूर्वं गुर्विण्याः[1] पतिमनुजानीयात् । स च गुर्विणीपतिर्नखशिखान्तं स्नातो धृतशुचिवस्त्रो निजवर्णानुसारधृतोपवीतोत्तरीयोत्तरासङ्गः प्रथममर्हत्प्रतिमां शास्त्रोक्तबृहत्स्नपनविधिना स्नपयेत् । तच्च स्नात्रोदकं शुभे भाजने स्थापयेत् । ततश्च जिनप्रतिमां गन्धपुष्पधूपदीपनैवेद्यगीतवादित्रैः शास्त्रोदितैः पूजयेत् । पूजान्ते गुरुर्गुर्विणीमविधवाकरैर्जिनस्नानोदकैरभिषेचयेत् । ततश्च सर्वजलाशयजलानि संमील्य

---

१ गर्भिण्याः ।

सहस्रमूलचूर्णं प्रक्षिप्य शान्तिदेवीमन्त्रेणाभिमन्त्रयेत् । तद्गर्भितस्तोत्रेण वा । शान्तिदेवीमन्त्रो यथा—"ॐ नमो निश्चितवचसे भगवते पूजामर्हते जयवते यशस्विने यतिस्वामिने सकलमहासंपत्तिसमन्विताय त्रैलोक्यपूजिताय सर्वासुरामरस्वामिसंपूजिताय अजिताय भुवनजनपालनोद्यताय सर्वदुरितौघनाशनकराय सर्वाशिवप्रशमनाय दुष्टग्रहभूतपिशाचशाकिनीनां प्रमथनाय, तस्येति नाममन्त्रस्मरणतुष्टा भगवती तत्पदभक्ता विजया देवी । ॐ ह्रीँ नमस्ते भगवति विजये, जय जय परे परापरे जये अजिते अपराजिते जयावहे सर्वसङ्घस्य भद्रकल्याणमङ्गलप्रदे, साधूनां शिवतुष्टिप्रदे, जय जय, भव्यानां कृतसिद्धे सत्त्वानां निर्वृतिनिर्वाणजननि अभयप्रदे स्वस्तिप्रदे [1]भविकानां जन्तूनां, शुभप्रदानाय नित्योद्यते सम्यग् दृष्टीनां, धृतिरतिमतिबुद्धिप्रदे जिनशासनरतानां शान्तिप्रणतानां जनानां श्रीसंपत्कीर्त्तियशोवर्द्धिनि, सलिलात् रक्ष रक्ष, अनिलात् रक्ष रक्ष, विषधरेभ्यो रक्ष रक्ष, राक्षसेभ्यो रक्ष रक्ष, रिपुगणेभ्यो रक्ष रक्ष, मारीभ्यो रक्ष रक्ष, चौरेभ्यो रक्ष रक्ष, ईतिभ्यो रक्ष रक्ष, श्वापदेभ्यो रक्ष रक्ष, शिवं कुरु कुरु, शान्तिं कुरु कुरु, तुष्टिं कुरु कुरु, पुष्टिं कुरु कुरु, स्वस्ति कुरु कुरु, भगवति, गुणवति, जनानां शिवशान्तितुष्टिपुष्टिस्वस्ति कुरु कुरु । ॐ नमो २ हूं ह्रः यः क्षः ह्रीँ फट् फट् स्वाहा । अथवा ॐ नमो भगवतेऽर्हते शान्तिस्वामिने सकलातिशेषकमहासंपत्समन्विताय त्रैलोक्यपूजिताय नमः शान्तिदेवाय सर्वामरसमूहस्वामिसंपूजिताय भुवनपालनोद्यताय सर्वदुरितविनाशनाय

१ 'भक्तानां' इत्यपि पाठः । २ फुट् फुट् इति बहुषु पुस्तकेषु ।

सर्वाशिवप्रशमनाय सर्वदुष्टग्रहभूतपिशाचमारिडाकिनीप्रमथनाय नमो भगवति विजये अजिते अपराजिते जयन्ति जयावहे सर्वसङ्घस्य भद्रकल्याणमङ्गलप्रदे साधूनां शिवशान्तितुष्टिपुष्टिस्वस्तिदे भव्यानां सिद्धिवृद्धिनिर्वृतिनिर्वाणजननि, सत्त्वानामभयप्रदाननिरते, भक्तानां शुभावहे, सम्यग्दृष्टीनां धृतिरतिबुद्धिप्रदानोद्यते, जिनशासननिरतानां श्रीसंपत्कीर्तियशोवर्द्धिनि, रोगजलज्वलनविषविषधरदुष्टज्वरव्यन्तरराक्षसरिपुमारिचौरेति[1]श्वापदोपसर्गादिभयेभ्यो रक्ष रक्ष, शिवं कुरु २ शान्तिं कुरु २ तुष्टिं कुरु २ पुष्टिं कुरु २ स्वस्ति कुरु २ भगवति श्रीशान्तितुष्टिपुष्टिस्वस्ति कुरु २ ॐ नमो नमः हूं ह्नः यः क्षः ह्रीं फट् स्वाहा। अनेन मन्त्रेण पूर्वोक्तेन वा स सहस्रमूलिकं सर्व[2]जलाशयजलं सप्तवारमभिमन्त्र्य सपुत्रसधवाकरैः मङ्गलगीतेषु गीयमानेषु गुर्विणीं स्नपयेत्। ततश्च गुर्विण्या गन्धानुलेपनं सदृ[3]शवस्त्रपरिधानं यथासंपत्त्याभरणधारणं कारयित्वा पत्या सह वस्त्राञ्चलग्रन्थिबन्धनं विधाय पतिवामपार्श्वे गुर्विणीं शुभासने कृतस्वस्तिकमाङ्गल्ये निवेशयेत्। ग्रन्थियोजनमन्त्रः—"ॐ अर्हं, स्वस्ति संसारसंबन्धबद्धयोः पतिभार्ययोः। युवयोरवियोगोऽस्तु भववासान्तमाशिषा १" विवाहं वर्जयित्वा सर्वत्र अनेनैव मन्त्रेण दंपत्योर्ग्रन्थिं बध्नीयात्। ततो गुरुस्तस्याः पुरः शुभे पट्टे पद्मासनासीनो मणिस्वर्णरूप्यताम्रपत्रपात्रेषु सजिनस्नात्रजलं तीर्थोदकं संस्थाप्य कुशाग्रपृषतैः आर्यवेदमन्त्रैर्गुर्विणीमभिषिञ्चेत्। तथा। आर्यवेदमन्त्रो यथा—"ॐ अर्हं जीवोऽसि जीवतत्त्वमसि प्राण्यसि

---

१ शूकशलभादय ईतयः। २ अधिकः। ३ रूपेण रचनया वा समस्तेन वा विजातीयस्ताहशवसनान्तरविशिष्टो वा प्रान्तो दशा।

प्राणोऽसि, जन्म्यसि, जन्मवानसि, संसार्यसि, संसरन्नसि, कर्मवानसि, कर्मबद्धोऽसि, भवभ्रान्तोऽसि, भवसंबिभ्रमिषुरसि, पूर्णाङ्गोऽसि, पूर्णपिण्डोऽसि, जातोपाङ्गोऽसि, जायमानोपाङ्गोऽसि, स्थिरो भव, नन्दिमान् भव, वृद्धिमान् भव, पुष्टिमान् भव, ध्यातजिनो भव, ध्यातसम्यक्त्वो भव, तत्कुर्या न येन पुनर्जन्मजरामरणसङ्कुलं संसारवासं गर्भवासं प्राप्नोषि अर्हं ॐ" इति[1] मन्त्रेण दक्षिणकरधृतकुशाग्रतीर्थोदकबिन्दुभिः सप्तवेलं गुर्विणीं शिरसि[2] शरीरे अभिषिञ्चेत्। ततः पञ्चपरमेष्ठिमन्त्रपठनपूर्वं दंपती आसनादुत्थाप्य जिनप्रतिमापार्श्वे नीत्वा शक्रस्तवपाठेन जिनवन्दनं[3] कारयेत्। यथाशक्त्या फलवस्त्रमुद्रामणिस्वर्णादि जिनप्रतिमाग्रे ढौकयेत्। ततश्च गुर्विणी गुरवे स्वसंपत्त्या वस्त्राभरणद्रव्यस्वर्णादिदानं दद्यात्। ततश्च गुरुः सपतिकां गुर्विणीमाशीर्वादयेत्। यथा—"ज्ञानत्रयं गर्भगतोऽपि विन्दन् संसारपारैकनिबद्धचित्तः। गर्भस्य पुष्टिं युवयोश्च तुष्टिं युगादिदेवः प्रकरोतु नित्यम् ॥ १ ॥" ततश्च आसनादुत्थाप्य ग्रन्थिं वियोजयेत्। ग्रन्थिवियोजनमन्त्रः—"ॐ अर्हं-ग्रन्थौ वियोज्यमानेऽस्मिन् स्नेहग्रन्थिः स्थिरोऽस्तु वाम्। शिथिलोऽस्तु भवग्रन्थिः कर्मग्रन्थिर्दृढीकृतः ॥ १ ॥" इति मन्त्रेण ग्रन्थिं वियोज्य धर्मागारे दंपतिभ्यां सुसाधुगुरुवन्दनं कारयेत्। साधुभ्यो निर्दोषभोजनवस्त्रपात्रादि दापयेत्। इति गर्भाधानसंस्कारविधिः। ततः स्वकुलाचारयुक्त्या कुलदेवतागृहदेवतापुरदेवतादिपूजनं। इह यदुक्तं जैनवेदमन्त्रा इति तत्प्रतिपाद्यते। यदादिदेवतनूज आदिमश्चक्री भरतो धृतावधि-

1 पुनरुक्तिः स्पष्टार्था। 2 अवच्छेदसप्तम्यर्थः शिरोवच्छेदेन गर्भिणीं सिञ्चेदित्यर्थः शरीरशब्दोप्यवयवार्थकः। 3 ताभ्यामिति शेषः।

ज्ञानः श्रीमद्युगादिजिनरहस्योपदेशप्राप्तसम्यक्[1]श्रुतज्ञानः सांसारिकव्यवहारसंस्कारस्थितये अर्हन्निदेशमाप्य माहनान् धृतज्ञानदर्शनचारित्ररत्नत्रयकरणकारणानुमतित्रिगुणत्रिसूत्रमुद्राङ्कितवक्षःस्थलान् पूज्यानकल्पयत् तदा च निजवैक्रियलब्ध्या चतुर्मुखीभूय वेदचतुष्कमुच्चचार । तद्यथा—संस्कारदर्शनं १ संस्थानपरामर्शनं २ तत्त्वावबोधः ३ विद्याप्रबोध ४ इति । चतुरो वेदान् सर्वनयवस्तुप्रकीर्त्तकान्माहनाने[2]पाठयत् । ततश्च ते माहनाः सप्ततीर्थङ्करतीर्थं यावद् धृतसम्यक्त्वाः आर्हतानां व्यवहारोपदेशेन धर्मोपदेशादि वितेनुः । ततश्च तीर्थे व्यवच्छिन्ने तत्रान्तरे ते माहनाः प्राप्तप्रतिग्रहलोभास्तां[3]न् वेदान् हिंसाप्ररूपणसाधुनिन्दनगर्भतया ऋग्यजुःसामाथर्वनामकल्पनया मिथ्यादृष्टितां निन्युः । ततश्च साधुभिर्व्यवहारपाठपराङ्मुखैस्तान् वेदान् विहाय जिनप्रणीत आगम एव प्रमाणतां नीतः । तेष्वपि ये माहनाः सम्यक्त्वं न तत्यजुः तेषां मुखेष्वद्यापि भरतप्रणीतवेदलेशः कर्मान्तरव्यवहारगतः श्रूयते, स चात्रोच्यते । यत उक्तमागमे—"सिरिभरहचक्कवट्टी आरियवेआण विस्सुओ कत्ता । माहणपढणत्थमि णं कहिअं सुहझाणववहारं ॥ १ ॥ जिणतित्थे वुच्छिन्ने मिच्छित्ते माहणेहिं ते ठविआ । अस्संजआणपूआ अप्पाणं कारिआ तेहिं ॥ २ ॥ पञ्चामृतं स्नात्रवस्तु सर्वतीर्थोद्भवं जलम् । सहस्रमूलं दर्भश्च कौसुम्भं सूत्रमेव च ॥ ३ ॥ द्रव्यं फलानि नैवेद्यं सदृशं वसनद्वयम् । शुभमासनपट्टं

---

१ सम्यक्त्वेति पाठोपि । २ अवेदयदित्यर्थः । ३ तेषां वेदानामिति कथञ्चित्समर्थनीयः पाठः ।

च स्वर्णताम्रादि भाजनम् ॥ ४ ॥ वाद्यं च सधवा नार्यः पतिश्चापि समीपगः । गर्भाधानस्य संस्कारे वस्तून्येतानि कल्पयेत् ॥ ५ ॥” इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने गर्भाधानसंस्कारकीर्त्तनो नाम प्रथम उदयः ॥ १ ॥

द्वितीय उदयः ।

अथ पुंसवनसंस्कारविधिः ॥ २ ॥

गर्भादष्टमे मासे व्यतीते पूर्णेषु सर्वदोहदेषु सञ्जाते साङ्गोपाङ्गे गर्भे तच्छरीरपूर्णीभावप्रमोदरूपं स्तन्योत्पत्तिसूचकं पुंसवनकर्म कुर्यात् । तत्र नक्षत्रवारादि यथा—“मूलं पुनर्वसू पुष्यो हस्तो मृगशिरस्तथा । श्रवणः कुजगुर्वर्का वाराः पुंसवने मताः ॥ १ ॥ षष्ठे मास्यथवाष्टमे तदधिपे वीर्योपपन्ने विधौ चेष्टे दृष्टतनौ नृनामभगते पुंलग्नभागेऽपि च । धीधर्मांख्यचतुष्टयेऽमरगुरौ पापैस्तु तद्वाह्यगैर्मृत्युद्वादशवर्जितैश्च मुनिभिः सीमन्तकर्म स्मृतम् ॥२॥”रिक्ता दग्धाः क्रूरा अहस्पृशः अवमाः षष्ठ्यष्टमीद्वादश्यमावास्यास्तिथीर्वर्जयित्वा गण्डान्तोपहतनक्षत्राशुभनक्षत्रवर्जिते दिने पूर्वोक्तनक्षत्रवारसहिते पत्युश्चन्द्रबले पुंसवनमारभेत । तद्यथा—गुरुः पूर्वोक्तरूपस्त-

द्वेषः पत्यौ समीपगे असमीपगे वा गर्भाधानकर्मणोऽनन्तरं धारिततद्वस्त्रवेषां तत्केशवेषां गुर्विणीं निशाचतुर्थप्रहरे सतारके गगने मङ्गलगानमुखीभिः सभूषणाभिरविधवाभिरभ्यङ्गोद्वर्तनजलाभिषेकैः स्नपयेत् । ततश्च जाते प्रभाते तां गुर्विणीं भव्यवस्त्रगन्धमाल्यभूषणभूषितां साक्षिणीं विधाय गृहार्हत्प्रतिमां तत्पतिना वा तद्देवरेण वा तत्कुल्येन वा स्वयं गुरुः पञ्चामृतस्नात्रेण बृहत्स्नात्रविधिना स्नपयेत् । ततः सहस्रमूलीस्नानं प्रतिमायाः कुर्यात् । तत्तीर्थोदकस्नात्रं च तत्सर्वं स्नात्रोदकं स्वर्णरूप्यताम्रादिभाजने निधाय शुभासने सुखोपविष्टां गुर्विणीं साक्षीभूतपतिदेवरादिकुलजां दक्षिणकरधृतकुशः कुशाग्रबिन्दुभिस्तेन स्नात्रोदकेन गुर्विणीशिरःस्तनोदराण्यभिषिञ्चन्नमुं वेदमन्त्रं पठेत्। "ॐ अर्हं नमस्तीर्थङ्करनामकर्मप्रतिबन्धसंप्राप्तसुरासुरेन्द्रपूजायार्हते आत्मने त्वमात्मायुःकर्मबन्धप्राप्यं तं मनुष्यजन्मगर्भावासमवाप्तोऽसि, तद्भवजन्मजरामरणगर्भवासविच्छित्तये प्राप्तार्हद्धर्मोऽर्हद्भक्तः सम्यक्त्वनिश्चलः कुलभूषणः सुखेन तव जन्मास्तु। भवतु तव त्वन्मातापित्रोः कुलस्याभ्युदयः, ततः शान्तिः तुष्टिर्वृद्धिः ऋद्धिः कान्तिः सनातनी अर्हं ॐ ॥" इति वेदमन्त्रमष्टवारं पठन् गुर्विणीमभिषिञ्चेत् । ततो गुर्विण्यासनादुत्थाय सर्वजातिफलाष्टकं स्वर्णरूप्यमुद्राष्टकं प्रणामपूर्वं जिनप्रतिमाग्रे ढौकयेत् । ततश्च गुरुपादौ प्रणम्य वस्त्रयुग्मं स्वर्णरूप्यमुद्राष्टकं क्रमुकाष्टकं सताम्बूलं गुरवे दद्यात् । ततो धर्मागारे साधुवन्दनं साधुभ्यो यथाशक्ति शुद्धान्नवस्त्रपात्रदानं कुलवृद्धेभ्यो नमस्कारः । इति पुंसवनसंस्कारविधिः ।
ततः स्वकुलाचारेण कुलदेवतादिपूजनम् । "पञ्चामृतस्नात्रवस्तु स्त्रीवस्त्राणि नवानि च । नवीनं वस्त्रयुग्मं

च स्वर्णमुद्राष्टकं तथा ॥ १ ॥ रूप्यमुद्राष्टकं चैव तयोरष्टाष्टकं पुनः । षोडशाख्या फलजातिः कुशस्ताम्बूलमुत्तमम् ॥ २ ॥ गन्धाः पुष्पाणि नैवेद्यं सधवागीतमङ्गलम् । वस्तु पुंसवने कार्यं संस्कारप्रगुणं परम् ॥ ३ ॥" इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने पुंसवनसंस्कारकीर्त्तनो नाम द्वितीय उदयः ॥ २ ॥

तृतीय उदयः ।

अथ जन्मसंस्कारविधिः ॥ ३ ॥

जन्मकाले पूर्णेषु मासदिनेषु गुरुर्ज्यौतिषिकसहितः सूतिकागृहासन्नगृहे एकान्ते निष्कलकले स्त्रीबालप्रमुखप्रचाररहिते सघटिकापात्रे सदावहितचेताः पञ्चपरमेष्ठिजापपरायणस्तिष्ठेत् । अत्र च दिने पूर्वं (न) तिथिवारनक्षत्रादि विलोक्यते जीवकर्मकालायत्तमेतत् । यतः—"जन्म मृत्युर्द्धनं दौस्थ्यं स्वस्वकाले प्रवर्त्तते । तदस्मिन् क्रियते हन्त चेतश्चिन्ता कथं त्वया ॥ १ ॥" उक्तं चागमे—श्रीवर्द्धमानस्वामिवाक्यम्—"समयं जम्मणकालं कालं मरणस्स कम्मइ सुरनाह । संपत्तजेण हुंती न अइसया वीअराएहिं ॥ १ ॥" अतो जाते बालके

स गुरुः समीपस्थो ज्यौतिषिकं जन्मक्षणपरिज्ञानाय निर्दिशेत्। तेनापि सम्यग् जन्मकालः करगोचरं विधायावधार्यः। ततश्च बालकपितृपितृव्यपितामहैरच्छिन्ने नाले गुरुर्ज्यौतिषिकश्च बहुभिर्वस्त्रभूषणवित्तादिभिः पूजनीयः। छिन्ने नाले सूतकं। गुरुर्बालकपितृपितामहादीनाशीर्वादयति। यथा—"ॐ अर्हं कुलं वो वर्द्धतां सन्तु शतशः पुत्रपौत्रप्रपौत्राः अक्षीणमस्त्वायुर्द्धनं यशः सुखं च अर्हं ॐ॥" इति वेदाशीः। तथा चोक्तं—"यो मेरुशृङ्गे त्रिदशाधिनाथैर्दैत्याधिनाथैः सपरिच्छदैश्च। कुम्भामृतैः संस्नपितः स देव आद्यो विदध्यात् कुलवर्द्धनं च॥ १॥" ज्यौतिषिकाशीर्वादो यथा—"आदित्यो रजनीपतिः क्षितिसुतः सौम्यस्तथा वाक्पतिः शुक्रः सूर्यसुतो विधुन्तुदशिखी श्रेष्ठा ग्रहाः पान्तु वः। अश्विन्यादिभमण्डलं तदपरो मेषादिराशिक्रमः कल्याणं पृथुकस्य वृद्धिमधिकां सन्तानमप्यस्य च॥ १॥" ततोऽवधारितजन्मलग्ने ज्यौतिषिके स्वगृहं गते गुरुः सूतिकर्मणे कुलवृद्धाः सूतिकाश्च निर्दिशेत्। अन्यगृहस्थित एव बालस्नपनार्थं जलमभिमन्त्र्य दद्यात्। जलाभिमन्त्रणमन्त्रो यथा—ॐ अर्हं नमोऽर्हत्सिद्धाचार्योपाध्यायसर्वसाधुभ्यः॥" "क्षीरोदनीरैः किल जन्मकाले यैर्मेरुशृङ्गे स्नपितो जिनेन्द्रः। स्नानोदकं तस्य भवत्विदं च शिशोर्महामङ्गलपुण्यवृद्ध्यै॥ १॥" अनेन सप्तवेलं जलमभिमन्त्रयेत्। तेन जलेन कुलवृद्धाः स्नपयन्ति बालं। नालच्छेदश्च स्वकुलाचारेण सर्वेषां। ततो गुरुः स्वस्थानस्थ एव चन्दनरक्तचन्दनबिल्वकाष्ठादि दग्ध्वा भस्म कुर्यात्। तद् भस्म श्वेतसर्षपलवणमिश्रितं पोट्टलिकायां बध्नीयात्।

१ पूर्वत्रापीदृशः प्रयोग आयातः सर्वत्रैव द्वितीयास्थाने चतुर्थी तृतीया वा संगता।

रक्षाभिमन्त्रणमन्त्रः—"ॐ ह्रीँ श्रीँ अंबे जगदंबे शुभे शुभङ्करे अमुं बालं भूतेभ्यो रक्ष रक्ष, ग्रहेभ्यो रक्ष रक्ष, पिशाचेभ्यो रक्ष रक्ष, वेतालेभ्यो रक्ष रक्ष, शाकिनीभ्यो रक्ष रक्ष, गगनदेवीभ्यो रक्ष रक्ष, दुष्टेभ्यो रक्ष रक्ष, शत्रुभ्यो रक्ष रक्ष, कार्मणेभ्यो रक्ष रक्ष, दृष्टिदोषेभ्यो रक्ष रक्ष, जयं कुरु कुरु, विजयं कुरु कुरु, तुष्टिं कुरु कुरु, पुष्टिं कुरु कुरु, कुलवृद्धिं कुरु कुरु, ॐ ह्रीँ ॐ भगवति श्री अंबिके नमः।" अनेन सप्ताभिमन्त्रितां रक्षा-पोट्टलिकां कृष्णसूत्रेण बद्धा सलोहखण्डां सवरुणमूलखण्डां सरक्तचन्दनखण्डां सवराटिकां कुलवृद्धाभिः शिशुहस्ते बन्धयेत्। "सांवत्सरो घटीपात्रं चन्दनं रक्तचन्दनम्। समीपैकान्तगेहं च सिद्धार्थलवणं तथा ॥१॥ कौशेयं कृष्णसूत्रं च कपर्दी गीतमङ्गलम्। लोहरक्षा तथा वस्त्रं दक्षिणार्थं धनानि च ॥ २ ॥ स्वस्तिकाः कुल-वृद्धाश्च जलं सर्वजलाशयात्। आनेयं जन्मसंस्कार एतद्वस्तु विचक्षणैः ॥ ३ ॥ इति जन्मसंस्कारविधिः। अथ कदाचिदाश्लेषाज्येष्ठामूलेषु गण्डान्ते भद्रायां शिशोर्जन्म भवति, तच्च तस्य तत्पित्रोः तस्य कुलस्य दुःखदारिद्र्यशोकमरणदम्। अतएव पिता कुलज्येष्ठश्च तद्विधाने अकृते शिशुमुखं नावलोकयेत्। तद्विधानकरणं प्रक्रमविशेषेण शान्तिकविधौ कथयिष्यते॥ इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने जातकर्मसंस्कारकीर्त्तनो नाम तृतीय उदयः ॥ ३ ॥

चतुर्थ उदयः ।

अथ सूर्येन्दुदर्शनसंस्कारविधिः ॥ ४ ॥

यथा जन्मदिनादिनद्वये व्यतीते तृतीयेऽह्नि गुरुः समीपगृहेऽर्हदर्चनपूर्वं जिनप्रतिमाग्रतः स्वर्णताम्रमयीं रक्तचन्दनमयीं वा दिनकरप्रतिमां स्थापयेत् । तस्या अर्चनं अनन्तरोक्तशान्तिकपौष्टिकप्रतिष्ठाप्रक्रमोक्तविधिना कुर्यात् । ततश्च स्नातां सुवसनां सभूषणां शिशुमातरं करद्वयधृतशिशुं प्रत्यक्षसूर्यसंमुखं नीत्वा सूर्यवेदमन्त्रमुच्चरन् मातापुत्रयोः सूर्यं दर्शयति । सूर्यवेदमन्त्रो यथा—"ॐ अर्हं सूर्योऽसि, दिनकरोऽसि, सहस्रकिरणोऽसि, विभावसुरसि, तमोऽपहोऽसि, प्रियंकरोऽसि, शिवङ्करोऽसि, जगच्चक्षुरसि, सुरवेष्टितोऽसि, मुनिवेष्टितोऽसि, विततविमानोऽसि, तेजोमयोऽसि, अरुणसारथिरसि, मार्तण्डोऽसि, द्वादशात्मासि, चक्रबान्धवोऽसि, नमस्ते भगवन् प्रसीदास्य कुलस्य तुष्टिं पुष्टिं प्रमोदं कुरु कुरु, सन्निहितो भव अर्हं ॐ ॥ इति पठति गुरौ, सूर्यमवलोक्य माता सपुत्रा गुरुं नमस्कुर्यात् । गुरुः सपुत्रां मातरमाशीर्वादयेत् । यथा आर्या—
"सर्वसुरासुरवन्द्यः कारयिता सर्वधर्मकार्याणाम् । भूयात् त्रिजगच्चक्षुर्मङ्गलदस्ते सपुत्रायाः ॥ १ ॥"
दक्षिणा सूतके नास्ति । ततो गुरुः स्वस्थानमागत्य जिनप्रतिमां स्थापितसूर्यं च विसर्जयेत् । मातापुत्रौ सूतकभयात्तत्र नानयेत् । तस्मिन्नेव दिवसे सन्ध्याकाले गुरुर्जिनपूजापूर्वं प्रतिमाग्रतः स्फटिकरूप्यचन्दन-

मयीं चन्द्रमूर्त्तिं स्थापयेत्। अन्यत्र गृहे तं च शशिनं शान्तिकादिप्रक्रमोक्तविधिना पूजयेत्। ततश्च तथैव सूर्यदर्शनरीत्या चन्द्रोदये प्रत्यक्षचन्द्रसंमुखं मातापुत्रौ नीत्वा वेदमन्त्रमुच्चरन् तयोश्चन्द्रं दर्शयति। चन्द्रस्य वेदमन्त्रो यथा—"ॐ अर्हं चन्द्रोऽसि, निशाकरोऽसि, सुधाकरोऽसि, चन्द्रमा असि, ग्रहपतिरसि, नक्षत्रपतिरसि, कौमुदीपतिरसि, निशापतिरसि, मदनमित्रमसि, जगज्जीवनमसि, जैवातृकोऽसि, क्षीरसागरोद्भवोऽसि, श्वेतवाहनोऽसि, राजासि, राजराजोऽसि, औषधीगर्भोऽसि, वन्द्योऽसि, पूज्योऽसि, नमस्ते भगवन्! अस्य कुलस्य ऋद्धिं कुरु, वृद्धिं कुरु, तुष्टिं कुरु, पुष्टिं कुरु, जयं कुरु, विजयं कुरु, भद्रं कुरु, प्रमोदं कुरु, श्रीशशाङ्काय नमः अर्हं ॐ॥" इति पठन् मातापुत्रयोश्चन्द्रं दर्शयित्वा तिष्ठेत्। सा च सपुत्रा गुरुं नमस्कुर्यात्। गुरुराशीर्वादयति। यथा—"सर्वौषधीमिश्रमरीचिजालः सर्वापदां संहरणप्रवीणः। करोतु वृद्धिं सकलेऽपि वंशे युष्माकमिन्दुः सततं प्रसन्नः॥ १॥" दक्षिणा सूतके नास्ति। ततो गुरुर्जिनप्रतिमाचन्द्रप्रतिमे विसर्जयेत्। नवरं कदाचित्तस्यां रजन्यां चतुर्दश्यमावास्यावशात्साभ्राकाशवशाद्वा चन्द्रो न दृश्यते तदापि पूजनं तस्यामेव सन्ध्यायां कार्यं। दर्शनमपरस्यामपि रात्रौ चन्द्रोदये भवतु। "सूर्याचन्द्रमसोर्मूर्त्तीं तत्पूजावस्तुसङ्गतम्। सूर्येन्दुदर्शने योग्यं संस्कारेऽत्र समाहरेत्॥ १॥" इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने सूर्येन्दुदर्शनसंस्कारकीर्त्तनो नाम चतुर्थ उदयः॥ ४॥

पञ्चम उदयः ।

अथ क्षीराशनसंस्कारविधिः ॥ ५ ॥

तस्मिन्नेव जन्मतस्तृतीये चन्द्रार्कदर्शनस्याह्नि शिशोः क्षीराशनं । तद्यथा गुरुः पूर्वोक्तवेषधारी तीर्थोदकैर-मृतामन्त्रेणाष्टोत्तरशतवारमभिमन्त्रितैः शिशुमातुः स्तनौ चाभिषिच्य जनन्यङ्कस्थितं शिशुं स्तन्यं पाययेत् । पूर्णाङ्गनासिकासक्तं स्तनं पूर्वं पाययेत् । स्तन्यं पिबन्तं शिशुं गुरुराशीर्वादयेत् । यथा वेदमन्त्रः—"ॐ अर्हं जीवोऽसि, आत्मासि, पुरुषोऽसि, शब्दज्ञोऽसि, रूपज्ञोऽसि, रसज्ञोऽसि, गन्धज्ञोऽसि, स्पर्शज्ञोऽसि, सदा-हारोऽसि, कृताहारोऽसि, अभ्यस्ताहारोऽसि, कावलिकाहारोऽसि, लोमाहारोऽसि, औदारिकशरीरोऽसि, अनेनाहारेण तवाङ्गं वर्धतां, बलं वर्द्धतां, तेजो वर्द्धतां, पाटवं वर्द्धतां, सौष्ठवं वर्द्धतां, पूर्णायुर्भव, अर्हं ॐ" इति त्रिराशीर्वादयेत् । अमृतामन्त्रः—"ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहा ॥" इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने क्षीराशनसंस्कारकीर्त्तनो नाम पञ्चम उदयः ॥ ५ ॥

षष्ठ उदयः ।

अथ षष्ठीसंस्कारविधिः ॥ ६ ॥

यथा षष्ठे दिने सन्ध्यासमये गुरुः प्रसूतिगृहमागत्य षष्ठीपूजनविधिमारभेत् । न सूतकं तत्र गण्यं । यत उक्तं—श्लोकः । "स्वकुले तीर्थमध्ये च तथावश्ये बलादपि । षष्ठीपूजनकाले च गणयेन्नैव सूतकम् ॥ १ ॥ इति वचनबलात्सूतिकागृहभित्तिभागभूमिभागौ सधवाहस्तैर्गोमयानुलिप्तौ कारयेत् । ततो दृश्यशुक्रबृहस्पतिवर्जितदिग्भित्तिभागं खटिकादिभिर्धवलयेत् । तद्भूमिभागं च चतुष्कमण्डितं कारयेत् । ततश्च धवलभित्तिभागे सधवाकरैः कुङ्कुमहिङ्गुलादिभिर्वर्णकैरष्टमातृरूर्ध्वा लेखयेत् । अष्ट चोपविष्टाः । अष्ट च प्रसुप्ताः । कुलक्रमान्तरे गुरुक्रमान्तरे षट् षट् लिख्यन्ते । ततश्च गुरुः सधवाभिर्गीतमङ्गलेषु गीयमानेषु चतुष्के शुभासने समासीनोऽनन्तरोक्तपूजाक्रमेण मातॄः पूजयेत् । नलिखवओ (?) "ॐ ह्रीँ नमो भगवति ब्रह्माणि वीणापुस्तकपद्माक्षसूत्रकरे हंसवाहने श्वेतवर्णे इह षष्ठीपूजने आगच्छ आगच्छ स्वाहा ॥ १ ॥" इति त्रिवेलं पठित्वा पुष्पेणाह्वानं । ततः—"ॐ ह्रीँ नमो भगवति ब्रह्माणि वीणापुस्तकपद्माक्षसूत्रकरे हंसवाहने श्वेतवर्णे मम सन्निहिता भव भव स्वाहा ॥" इति त्रिवेलं सन्निहितीकरणं । एवं मन्त्रपूर्वकं इह तिष्ठ तिष्ठ इति त्रिः स्थापनं ।

ततः गन्धपुष्पधूपदीपाक्षतनैवेद्यदानपूर्वं मन्त्रपाठपूर्वं गन्धं गृह्ण[१] २, पुष्पं गृह्ण २, धूपं गृह्ण २, दीपं गृह्ण २, अक्षतान् गृह्ण २, नैवेद्यं गृह्ण २ इत्येकैकवेलं मन्त्रपाठपूर्वं एभिर्वस्तुभिर्भगवतीं पूजयेत् । अनयैव युक्त्या सप्तानां परासां मातृणां पूजनं । नवरं मन्त्राः—"ॐ ह्रीँ नमो भगवति माहेश्वरि शूलपिनाककपालखट्वाङ्गकरे चन्द्रार्द्धललाटे गजचर्मावृते शेषाहिबद्धकाञ्चीकलापे त्रिनयने वृषभवाहने श्वेतवर्णे इह षष्ठीपूजने आगच्छ आगच्छ, शेषं पूर्ववत् ॥ २ ॥" तथा "ॐ ह्रीँ नमो भगवति कौमारि षण्मुखि शूलशक्तिधरे वरदाभयकरे मयूरवाहने गौरवर्णे इह षष्ठीपूजने आगच्छ आगच्छ, शेषं पूर्ववत् ॥ ३ ॥ ॐ ह्रीं नमो भगवति वैष्णवि शङ्खचक्रगदाशार्ङ्गखड्गकरे गरुडवाहने कृष्णवर्णे इह षष्ठीपूजने आगच्छ २, शेषं पूर्ववत् ॥ ४ ॥ ॐ ह्रीं नमो भगवति वाराहि वराहीमुखि चक्रखड्गहस्ते शेषवाहने श्यामवर्णे इह षष्ठीपूजने आगच्छ २, शेषं पूर्ववत् ॥ ५ ॥ ॐ ह्रीं नमो भगवति इन्द्राणि सहस्रनयने वज्रहस्ते सर्वाभरणभूषिते गजवाहने सुराङ्गनाकोटिवेष्टिते काञ्चनवर्णे इह षष्ठीपूजने आगच्छ २, शेषं पूर्ववत् ॥ ६ ॥ ॐ ह्रीं नमो भगवति चामुण्डे शिराजालकरालशरीरे प्रकटितदशने ज्वालाकुन्तले रक्तत्रिनेत्रे शूलकपालखड्गप्रेतकेशकरे प्रेतवाहने धूसरवर्णे इह षष्ठीपूजने आगच्छ २, शेषं पूर्ववत् ॥ ७ ॥ ॐ ह्रीं नमो भगवति त्रिपुरे पद्मपुस्तकवरदाभयङ्करे सिंहवाहने श्वेतवर्णे इह षष्ठीपूजने, आगच्छ २ शेषं पूर्ववत् ॥८॥ एतावत्पर्यन्तमधिकम् । एवं यथा ऊर्ध्वाः पूज्यन्ते, तेनैव मन्त्रार्चनप्रयोगेण निविष्टाः

१ गृहाणेत्यर्थः ।

सुप्ता अपि पूज्यन्ते त्रिवेलं । कैश्चिच्चामुण्डात्रिपुरावर्जिताः षण्मातर एव पूज्यन्ते । एता मातॄः पूजयित्वा इति पठेत्—"ब्राह्म्याद्या मातरोऽप्यष्टौ स्वस्वास्त्रबलवाहनाः । षष्ठीसंपूजनात्पूर्वं कल्याणं ददतां शिशोः ॥ १ ॥" ततो मातृस्थापनाग्रभूमौ चन्दनलेपस्थापनया षष्ठीम्बारूपां स्थापयेत् । तां च दधिचन्दनाक्षतदूर्वाभिरर्चयेत् । ततश्च गुरुः पुष्पहस्तः "ॐ ऐं ह्रीं षष्ठि आम्रवनासीने कदंबवनविहारे पुत्रद्वययुते नरवाहने श्यामाङ्गि इह आगच्छ २ स्वाहा ।" मातृवदस्या अपि पूजा । ततः शिशुमातृसहिताः कुलवृद्धा अविधवा मङ्गलगानपरायणाः वाद्येषु वाद्यमानेषु षष्ठीरात्रिं जाग्रति । ततः प्रातः "भगवति पुनरागमनाय स्वाहा" इति प्रत्येकं नामपूर्वं गुरुर्मातॄः षष्ठीं च विसर्जयेत् । तथा—"ॐ भगवति माहेश्वरि पुनरागमनाय स्वाहा" एवं सर्वत्र । ततो गुरुः शिशुं पञ्चपरमेष्ठिमन्त्रपूतजलैरभिषिञ्चन् वेदमन्त्रेणाशीर्वादयेत् । यथा—"ॐ अर्हं जीवोऽसि, अनादिरसि, अनादिकर्मभागसि, यत्त्वया पूर्वं प्रकृतिस्थितिरसप्रदेशैराश्रववृत्त्या कर्मबद्धं तद्बन्धोदयोदीरणासत्ताभिः प्रतिभुङ्क्ष्व, माशुभकर्मोदयफलभुक्तेरुच्छेकं दध्याः, नचाशुभकर्मफलभुक्त्या विषादमाचरेः, तवास्तु संवरवृत्त्या कर्मनिर्जरा अर्हं ॐ ॥" सूतके दक्षिणा नास्ति । "चन्दनं दधि दूर्वा च साक्षतं कुङ्कुमं तथा । वर्णिका हिङ्गुलाद्याश्च पूजोपकरणानि च ॥ १ ॥ नैवेद्यं सधवा नार्यो दर्भो भूम्यनुलेपनम् । षष्ठीजागरणाख्येऽस्मिन् संस्कारे वस्तु कल्पयेत् ॥ २ ॥" इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने षष्ठीजागरणसंस्कारकीर्त्तनो नाम षष्ठ उदयः ॥ ६ ॥

सप्तम उदयः ।

अथ शुचिकर्मसंस्कारविधिः ॥ ७ ॥

अत्र च शुचिकर्म स्वस्ववर्णानुसारेण व्यतीतदिनेषु कार्यं । तद्यथा—"शुध्येद्विप्रो दशाहेन द्वादशाहेन बाहुजः । वैश्यस्तु षोडशाहेन शूद्रो मासेन शुध्यति ॥ १ ॥ कारूणां सूतकं नास्ति तेषां शुद्धिर्नवापि हि । ततो गुरुकुलाचारस्तेषु प्रामाण्यमिच्छति ॥ २ ॥" ततः कारणात्स्वस्ववर्णकुलानुसारेण दिनेषु व्यतीतेषु गुरुः सर्वमपि षोडशपुरुषयुगादर्वाक् तत्कुलजवर्गं समाहाययेत् । यतः सूतकं हि षोडशपुरुषयुगादर्वाक् गृह्यते । यदुक्तं—"नृषोडशकपर्यन्तं गणयेत्सूतकं सुधीः । विवाहं नानुजानीयाद्गोत्रे लक्षनृणां युगे ॥ १ ॥" ततस्तान् गोत्रजानाहाय सर्वेषां साङ्गोपाङ्गं स्नानं वस्त्रक्षालनं च समादिशेत् । ते स्नाताः शुचिवसना गुरुं साक्षीकृत्य विविधपूजाभिर्जिनमर्चयन्ति । ततश्च बालकस्य मातापितरौ पञ्चगव्येनाचान्तस्नातौ सशिशू नखच्छेदं विधाप्य योजितग्रन्थी दंपती जिनप्रतिमां नमस्कुरुतः । सधवाभिर्मङ्गलेषु गीयमानेषु वाद्येषु वाद्यमानेषु सर्वेषु चैत्येषु पूजानैवेद्यढौकनं च । साधवे यथाशक्त्या चतुर्विधाहारवस्त्रपात्रदानं । संस्कारगुरवे वस्त्रतांबूलभूषणद्रव्यादिदानं । तथा जन्मचन्द्रार्कदर्शनक्षीराशनषष्ठीसत्कदक्षिणा संस्कारगुरवे तस्मिन्नहनि देया ॥ सर्वेषां गोत्रजस्वजनमित्रवर्गाणां यथाशक्त्या भोजनतांबूलदानं । तथा गुरुः तत्कुलाचारानुसारेण शिशोः

पञ्चगव्यजिनस्नात्रोदकसर्वौषधिजलतीर्थजलैः स्नपितस्य वस्त्राभरणादि परिधापयेत्। तथा च नारीणां सूतकस्नानं पूर्णेष्वपि सूतकदिवसेषु नार्द्रनक्षत्रेषु नच सिंहगजयोनिनक्षत्रेषु कुर्यात्। आर्द्रनक्षत्राणि दश यथा—"कृत्तिका भरणी मूलमार्द्रा पुष्यपुनर्वसू। मघा चित्रा विशाखा च श्रवणो दशमस्तथा ॥ १ ॥ आर्द्रधिष्ण्यानि चैतानि स्त्रीणां स्नानं न कारयेत्। यदि स्नानं प्रकुर्वीत पुनः सूतिर्न विद्यते ॥ २ ॥ सिंहयोनिर्धनिष्ठा च पूर्वाभाद्रपदं तथा। भरणी रेवती चैव गजयोनिर्विचार्यते ॥ ३ ॥" कदाचित्पूर्णेषु सूतकदिवसेष्वेतानि नक्षत्राण्यायान्ति तदा दिनैकैकान्तरेण शुचिकर्म विधेयम्। "पूजावस्तु पञ्चगव्यं निजगोत्रोद्भवो जनः। तीर्थोदकानि संस्कारे शुचिकर्मणि निर्दिशेत् ॥ १ ॥" इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने शुचिसंस्कारकीर्त्तनो नाम सप्तम उदयः ॥ ७ ॥

अष्टम उदयः।

अथ नामकरणसंस्कारविधिः ॥ ८ ॥

"मृदुध्रुवक्षिप्रचरेषु भेषु सूनोर्विधेयं खलु जातकर्म। गुरौ भृगौ वापि चतुष्टयस्थे सन्तः प्रशंसन्ति च नामधेयम् ॥ १ ॥ शुचिकर्मदिने अथवा तद्द्वितीये तृतीये वा शुभदिने शिशोश्चन्द्रबले गुरुः सज्ज्योतिषिकस्तद्गृहे

शुभस्थाने शुभासने सुखासीनः पञ्चपरमेष्ठिमन्त्रं स्मरंस्तिष्ठेत्। तदा च शिशोः पितृपितामहाद्याः पुष्पफलपरिपूर्णकराः गुरुं सज्योतिषिकं साष्टाङ्गं प्रणिपत्य इति कथयन्ति, "भगवन्! पुत्रस्य नामकरणं क्रियतां।" ततो गुरुस्तान् कुलपुरुषान् कुलवृद्धाश्च स्त्रियः पुरो निवेश्य ज्योतिषिकं जन्मलग्नप्ररूपणाय समादिशेत्। ज्योतिषिकः शुभपट्टे खटिकया तज्जन्मलग्नमालिखेत्। स्थाने स्थाने ग्रहांश्च स्थापयेत्। ततः शिशुपितृपितामहाद्या जन्मलग्नं पूजयन्ति। तत्र स्वर्णमुद्राः १२ रूप्यमुद्राः १२ ताम्रमुद्राः १२ क्रमुकाः १२ अन्यफलजातिः १२ नालिकेलानि १२ नागवल्लीदलानि १२ एभिर्द्वादशलग्नपूजनम्। एतैरेव वस्तुभिर्नवनवप्रमाणैर्नवग्रहाणां पूजनं। एकैकवस्तुसंख्या सर्वमीलने २१। एवं पूजिते लग्ने तेषां पुरो ज्योतिषिको लग्नविचारं व्याख्याति। तैरवहितैः श्रोतव्यं। ततः सव्याख्यावर्णनं लग्नं ज्योतिषिकः कुङ्कुमाक्षरैः पत्रे लिखित्वा तत्कुलज्येष्ठस्य समर्पयेत्। तत्पित्रादिभिर्ज्योतिषिकश्च निवापवस्त्रस्वर्णदानैः सम्माननीयः। गणकोऽपि तेषां पुरो जन्मनक्षत्रानुसारेण नामाक्षरं प्रकाश्य स्वगृहं व्रजेत्। ततो गुरुः सर्वकुलपुरुषान् कुलवृद्धा नारीश्च पुरतो निवेश्य तेषां संमतेन दूर्वाकरः परमेष्ठिमन्त्रभणनपूर्वं कुलवृद्धाकर्णे जातिकुलोचितं नाम श्रावयेत्। तदनन्तरं कुलवृद्धा नार्यो गुरुणा सह पुत्रोत्सङ्गां तन्मातरं शिबिकादिवाहनासीनां पादचारिणीं वा सहानीय अविधवाभिर्मङ्गलगीतेषु गीयमानेषु वाद्येषु वाद्यमानेषु चैत्यं प्रति प्रयान्ति। तत्र मातापुत्रौ जिनं नमस्कुरुतः। माता चतुर्विंशतिप्रमाणैः स्वर्णरूप्यमुद्राफलनालिकेरादिभिर्जिनप्रतिमाग्रे ढौकिनिकां कुर्यात्। ततश्च देवाग्रे कुलवृद्धाः शिशुनाम प्रकाशयन्ति।

चैत्याभावे गृहप्रतिमायामेवायं विधिः। ततस्तयैव रीत्या पौषधागारमागच्छेत् । तत्र प्रविश्य भोजनमण्डलीस्थाने मण्डलीपट्टं निवेश्य तत्पूजामाचरेत्। मण्डलीपूजाविधिर्यथा—शिशुजननी "श्रीगौतमाय नमः" इत्युचरन्ती गन्धाक्षतपुष्पधूपदीपनैवेद्यैर्मण्डलीपट्टं पूजयेत्। मण्डलीपट्टोपरि स्वर्णमुद्राः १० रूप्यमुद्राः १० क्रमुकाः १०८ नालिकेराणि २९ वस्त्रहस्तान् २९ स्थापयेत्। ततः सपुत्रा स्त्री त्रिः प्रदक्षिणीकृत्य यतिगुरुं नमस्कुर्यात्। नवभिः स्वर्णरूप्यमुद्राभिः गुरोर्नवाङ्गपूजां कुर्यात् । निरुञ्छनारात्रिके च विधाय क्षमाश्रमणपूर्वं करौ संयोज्य "वासरकेवं करेह" इति शिशुमाता कथयति। ततो यतिगुरुः वासान् ॐकार-ह्रींकार-श्रींकार-संनिवेशेन कामधेनुमुद्रया वर्द्धमानविद्यया परिजप्य मातृपुत्रयोः शिरसि क्षिपेत्। तत्रापि तयोः शिरसि—"ॐ ह्रीं श्रीं अक्षरसंनिवेशं कुर्यात्। ततो बालकस्य चन्दनेन साक्षतं तिलकं विधाय कुलवृद्धावचनानुवादेन नामस्थापनं कुर्यात्। ततस्तयैव युक्त्या सर्वैः सह स्वगृहं गच्छन्ति। यतिगुरुभ्यश्चतुर्विधाहारवस्त्रपात्रदानं गृहिगुरवे वस्त्रालङ्कारस्वर्णदानं। "नान्दी मङ्गलगीतानि गुरुर्ज्योतिषिकान्वितः। प्रभूतफलमुद्राश्च वस्त्राणि विविधानि ह ॥ १ ॥ वासाश्च चन्दनं दूर्वा नालिकेरा धनं बहु। नामसंस्कारकार्येषु वस्तूनि परिकल्पयेत् ॥ २ ॥"

इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने नामकरणसंस्कारकीर्त्तनो नामाष्टम उदयः ॥८॥

नवम उदयः ।

अथान्नप्राशनसंस्कारविधिः ॥ ९ ॥

"रेवती श्रवणो हस्तो मृगशीर्षं पुनर्वसू । अनुराधाश्विनी चित्रा रोहिणी चोत्तरात्रयम् ॥ १ ॥ धनिष्ठा च तथा पुष्यो निर्दोषर्क्षेष्वमीषु च । रवीन्दुबुधशुक्रेषु गुरौ वारेषु वै नृणाम् ॥ २ ॥ नवान्नप्राशनं श्रेष्ठं शिशूनामन्नभोजनम् । रिक्तादिकाश्च कुतिथीर्दुर्योगांश्चैव वर्जयेत् ॥ ३ ॥ षष्ठे मासे प्राशनं दारकाणां कन्यानां तत्पञ्चमे सद्भिरुक्तम् । प्रोक्ते धिष्ण्ये वासरे सद्ग्रहाणां दर्शं रिक्तां वर्जयित्वा तिथिं च ॥ ४ ॥ रवौ लग्ने कुष्ठी धरणितनये पित्तगदभाक् शनौ वातव्याधिः कृशशशिनि भिक्षाटनरतः । बुधे ज्ञानी भोगी ह्युशनसि चिरायुः सुरगुरौ विधौ पूर्णे यज्वा भवति च नरः सत्रद इह ॥ ५ ॥ कण्टकान्त्यधनिनस्त्रिकोणगास्तत्फलं ददति यत्तनावमी । षष्ठ इन्दुरशुभस्तथाष्टमः केन्द्रकोणगत ऐनिरन्नहृत् ॥ ६ ॥" ततः षष्ठे मासे बालस्य पञ्चमे मासे बालिकायाः पूर्वोक्तनक्षत्रतिथिवारयोगेषु शिशोश्चन्द्रबले अन्नप्राशनमारभेत । तद्यथा—गुरुः उक्तवेषधारी तद्गृहे गत्वा सर्वाणि देशोत्पन्नान्यन्नानि समाहरेत् । देशोत्पन्नानि नगरप्राप्याणि फलानि च षड् विकृतीः प्रगुणीकुर्यात् । ततः सर्वेषामन्नानां सर्वेषां शाकानां सर्वासां विकृतीनां घृततैलेक्षुरसगोरसजलपाकैर्बहून्

---

१ ऐनिः शनिः । क्रूरग्रहोपलक्षणमेतत् ।

परःशतान् पृथक्प्रकारान् कारयेत्। ततोऽर्हत्प्रतिमाया बृहत्स्नात्रविधिना पञ्चामृतस्नात्रं कृत्वा पृथक्पात्रे स्थापयेत्। अन्नशाकविकृतिपाकान् जिनप्रतिमाग्रतो नैवेद्यमन्त्रेण अर्हत्कल्पोक्तेन ढौकयेत्। फलान्यपि सर्वाणि ढौकयेत्। ततः शिशोः अर्हत्स्नात्रोदकं पाययेत्। पुनरपि तानि सर्वाणि वस्तूनि जिनप्रतिमानैवेद्योद्धरितानि अमृतस्रवमन्त्रेण सूरिमन्त्रमध्यगेन श्रीगौतमप्रतिमाग्रे ढौकयेत्। तत उद्धरितानि कुलदेवतामन्त्रेण तद्देवीमन्त्रेण गोत्रदेवीप्रतिमाग्रे ढौकयेत्। तत् कुलदेवीनैवेद्याद्योग्याहारं मङ्गलेषु गीयमानेषु माता सुतमुखे दद्यात्। गुरुश्चामुं वेदमन्त्रं पठेत्, "ॐ अर्हं भगवान्नर्हन् त्रिलोकनाथः त्रिलोकपूजितः सुधाधारधारितशरीरोऽपि कावलिकाहारमाहारितवान् पश्यन्नपि पारणाविधाविक्षुरसपरमान्नभोजनात्परमानन्ददायकं बलं। तद्देहिन्नौदारिकशरीरमासस्त्वमप्याहारय आहारं तत्ते दीर्घमायुरारोग्यमस्तु अर्हं ॐ" इति मन्त्रं त्रिः पठेत्। ततः साधुभ्यः षड्विकृतिभिः षड्रसैराहारदानं यतिगुरोर्मण्डलीपट्टोपरि परमान्नपूरितसुवर्णपात्रदानं गृह्यगुरवे द्रोणमात्रं सर्वान्नदानं तुलामात्रं सर्वं घृततैललवणादिदानं प्रत्येकमष्टोत्तरशतमितं सर्वफलदानं ताम्रचरुकांस्यस्थालवस्त्रयुग्मदानं। "सर्वान्नफलभेदाश्च सर्वा विकृतयस्तथा। स्वर्णरूप्यताम्रकांस्यपात्राण्येकत्र कल्पयेत्॥ १ ॥" इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने अन्नप्राशनसंस्कारकीर्त्तनो नाम नवम उदयः॥ ९ ॥

दशम उदयः ।

अथ कर्णवेधसंस्कारविधिः ॥ १० ॥

"उत्तरात्रितयं हस्तो रोहिणी रेवती श्रुतिः । पुनर्वसू मृगशिरः पुष्यो धिष्ण्यानि तत्र च ॥ १ ॥ पौष्णवैष्णवकराश्विनिचित्रा पुष्यवासवपुनर्वसुमित्रैः । सैन्दवैः श्रवणवेधविधानं निर्दिशन्ति मुनयो हि शिशूनाम् ॥ २ ॥ लाभे तृतीये च शुभैः समेते क्रूरैर्विहीने शुभराशिलग्ने । वेध्यौ तु कर्णौ त्रिदशेज्यलग्ने तिष्येन्दुचित्राहरिपौष्णभेषु ॥ ३ ॥ कुजशुक्रार्कजीवेषु वारेषु तिथिसौष्ठवे । शुभयोगे कनीशिश्वोः कर्णवेधो विधीयते ॥ ४ ॥" एतेषु निर्दोषवर्षमासतिथिवारर्क्षेषु शिशो रविचन्द्रबले कर्णवेधमारभेत । उक्तं च—"गर्भाधाने पुंसवने जन्मन्यर्केन्दुदर्शने । क्षीराशने तथा षष्ठ्यां शुचौ नामकृतावपि ॥ १ ॥ तथान्नप्राशने मृत्यौ संस्कारेष्वेष्ववश्यतः । शुद्धिर्वर्षस्य मासस्य न गवेष्या विचक्षणैः ॥ २ ॥ कर्णवेधादिकेष्वन्यसंस्कारेषु विवाहवत् । शुद्धिं वत्सरमासर्क्षदिनानामवलोकयेत् ॥ ३ ॥" यथा तृतीये पञ्चमे सप्तमे वर्षे निर्दोषे शिशोरादित्यबलशालिनि मासे गुरुः शुभे दिने शिशुं शिशुमातरं च अमृतामन्त्राभिमन्त्रितजलैर्मङ्गलगानमुखाविधवाकरैः स्नपयेत् । तत्र च कुलाचारसंपदतिरेकविशेषेण सतैलनिषेकं त्रिपञ्चसप्तनवैकादशदिनानि स्नानं । तद्गृहे पौष्टिकाधिका-

१ "शिशोश्चन्द्रबले" इत्यपि पाठः ।

रप्रोक्तं पौष्टिकं सर्वं विधेयं। षष्ठीवर्जितं मातृकाष्टकपूजनं पूर्ववद्विधेयं। ततः स्वकुलानुसारेण अन्यग्रामे कुलदेवतास्थाने पर्वते नदीतीरे गृहे वा कर्णवेध आरभ्यते। तत्र मोदकनैवेद्यकरणगीतगानमङ्गलाचारप्रभृति स्वस्वकुलागतरीत्या करणीयं। ततः बालं सुखासने पूर्वाभिमुखमुपवेशयेत्। तस्य कर्णवेधं विद्ध्यात्। तत्र गुरुरमुं वेदमन्त्रं पठेत्। यथा—"ॐ अर्हं श्रुतेनाङ्गैरुपाङ्गैः कालिकैरुत्कालिकैः पूर्वगतैश्चूलिकाभिः परिकर्मभिः सूत्रैः पूर्वानुयोगैः छन्दोभिर्लक्षणैर्निरुक्तैर्धर्मशास्त्रैर्विद्धकर्णौ भूयात् अर्हं ॐ॥ शूद्रादेस्तु "ॐ अर्हं तव श्रुतिद्वयं हृदयं धर्माविद्धमस्तु।" इत्येव वाच्यं। ततो बालं यानस्थं नरनार्युत्सङ्गस्थं वा धर्मागारं नयेत्। तत्र मण्डली-पूजां पूर्वोक्तविधिना विधाय शिशुं यतिगुरुपादाग्रे लोटयेत्। यतिगुरुर्विधिना वासक्षेपं कुर्यात्। ततो बालं तद्गृहं नीत्वा गृह्यगुरुः कर्णाभरणे परिधापयेत्। यतिगुरुभ्यश्चतुर्विधाहारवस्त्रपात्रदानं गृह्यगुरवे वस्त्रस्वर्णदानं च। "पौष्टिकस्योपकरणं मातृपूजाकुलोचितम्। अन्यद्धस्तु कर्णवेधे योजनीयं महात्मभिः॥ १॥" इत्याचार्य-श्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने कर्णवेधसंस्कारकीर्त्तनो नाम दशम उदयः॥ १०॥

एकादश उदयः।

अथ चूडाकरणसंस्कारविधिः॥ ११॥

"हस्तत्रये मृगज्येष्ठे पौष्णादित्यश्रुतिद्वये। एकद्वित्रिपञ्चसप्तत्रयोदशदशस्वपि॥ १॥ एकादशाख्यतिथिषु

शुक्रसोमबुधेष्वपि। क्षुरकर्म विधेयं स्यात्सद्दले चन्द्रतारयोः॥२॥ न पर्वसु न यात्रायां न च स्नानात्परात्परम्। न भूषितानां नो सन्ध्यात्रितये निशि नैव च॥ ३॥ न सङ्ग्रामे नावने वा नोक्तान्यतिथिवारयोः। नान्यत्र मङ्गले कार्ये क्षुरकर्म विधीयते॥ ४॥ क्षौरर्क्षेषु स्वकुलविधिना चौलमाहुर्मुनीन्द्राः केन्द्रायातैर्गुरुभृगुबुधैस्तत्र सूर्ये ज्वरश्च। शस्त्रान्नाशो धरणितनये पङ्गुता चार्कपुत्रे शीतज्योतिष्वपचिततनौ निश्चितं नाश एव॥ ५॥ षष्ठ्यष्टम्यौ चतुर्थीं च सिनीवालीं चतुर्दशीम्। नवमीं चार्कमन्दारान् क्षुरकर्मणि वर्जयेत्॥ ६॥ धनव्ययत्रिकोणगैरसद्ग्रहैर्मृतावपि। क्षुरक्रिया न शोभना शुभेषु पुष्टिकारिणी॥ ७॥" ततो बालकस्यादित्यबलयुते मासे चन्द्रताराबलयुते दिने उक्तेषु तिथिवारर्क्षेषु कुलाचारानुसारेण कुलदेवतारूपे अन्यग्रामे वने पर्वते वा गृहे वा पूर्वं शास्त्रोक्तरीत्या पौष्टिकं विदध्यात्। ततो मातृपूजा पूर्ववदेव षष्ठीपूजावर्जितं (सर्वं)। ततः कुलाचारानुसारेण नैवेद्यदेवपक्वान्नादिकरणं। ततो बालं गृह्य गुरुः सुस्नातं आसने निवेश्य बृहत्स्नात्रविधिकृतेन जिनस्नात्रोदकेन शान्तिदेवीमन्त्रेणाभिषिञ्चेत्। ततः कुलक्रमागतनापितकरेण मुण्डनं कारयेत्। शिरोमध्यभागे शिखां स्थापयेत् वर्णत्रयस्य। शूद्रस्य पुनः सर्वमुण्डनमेव चूडाकरणे क्रियमाणे अमुं वेदमन्त्रं पठेत्। यथा—"ॐ अर्हं ध्रुवमायुर्ध्रुवमारोग्यं ध्रुवाः श्रियो ध्रुवं कुलं ध्रुवं यशो ध्रुवं तेजो ध्रुवं कर्म ध्रुवा च कुलसन्ततिरस्तु अर्हं ॐ।" इति सप्तवेलं पठन् शिशुं तीर्थोदकैरभिषिञ्चेत्। गीतवाद्यादि सर्वत्र योज्यं। ततो बालकं पञ्चपरमेष्ठिपठनपूर्वं आसनादुत्थाप्य स्नापयेत्। चन्दनादिभिरनुलेपयेत्। शुभ्रवासांसि परिधापयेत्। भूषणैर्भूषयेत्। ततो

धर्मागारं नयेत् । ततः पूर्वरीत्या मण्डलीपूजागुरुवन्दनावासक्षेपादि । ततः साधुभ्यो वस्त्रान्नपात्रदानं षड्विकृतिदानं च । गृह्यगुरवे वस्त्रस्वर्णदानं । नापिताय वस्त्रकङ्कणदानं—"पौष्टिकस्योपकरणं मातॄणां पूजनस्य च । मुण्डने योजनीयं स्यान्नैवेद्यं च कुलोचितम् ॥ १ ॥" इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने चूडाकरणसंस्कारकीर्त्तनो नाम एकादश उदयः ॥ ११ ॥

द्वादश उदयः ।

अथोपनयनसंस्कारविधिः ॥ १२ ॥

तत्रोपनयनं नाम मनुष्याणां वर्णक्रमप्रवेशाय संस्कारो हि वेषमुद्रोद्वहनेन स्वस्वगुरूपदिष्टे धर्ममार्गे निवेशयति । यदुक्तमागमे—"धम्मायारे चरिए वेसो सवत्थकारणं पढमं । संजमलज्जाहेऊ सड्ढाणं तह य साहूणं ॥ १ ॥" तथा च श्रीधर्मदासगणिपादैरुपदेशमालायामप्युक्तं । यथा—"धम्मं रक्खइ वेसो संकइ वेसेण दिक्खिओमि अहं । उम्मग्गे जेण पडंतं रक्खइ राआ जणवउव्व ॥ १ ॥" तथा च इक्ष्वाकुवंश्यनारदवंश्यप्राच्योदीच्यवंश्यानां जैनब्राह्मणानामुपनयनं जिनोपवीतधारणं च । तथा क्षत्रियवंशोत्पन्नानां जिनचक्रिबलदेववासुदेवानां श्रेयांसदशार्णभद्रप्रभृतीनां नृपाणामपि हरिवंशेक्ष्वाकुवंशविद्याधरवंश[illegible]

गकुलेसु वा ह
वा आअस्सं
नाम
...नोपवीतधारणविधिः। यत उक्तमागमे—"देवाणुप्पिआ न एअं भूयं न एअं भव्वं जन्नं अरिहंता वा चक्कवट्टी वा बलदेवा वा वासुदेवा वा अंतकुलेसु वा पंतकुलेसु वा किविणकुलेसु वा तुच्छकुलेसु वा दरिद्दकुलेसु वा भिक्खागकुलेसु वा माहणकुलेसु वा नायंति वा नाअस्संति वा एवं खलु अरहंता वा चक्कवट्टी वा बलदेवा वा वासुदेवा वा उग्गकुलेसु वा भोगकुलेसु वा राअन्नकुलेसु वा खत्तियकुलेसु वा इक्खागकुलेसु वा हरिवंसकुलेसु वा अन्नअरेसु वा तहप्पगारेसु विसुद्धजायकुलवंसेसु वा आयाअंसु वा आअंति वा आअस्संति, अत्थि पुण एसे वि भावे लोगत्थेरएभूए अणंताहिं ओसप्पिणीहिं अवसप्पिणीहिं वियक्कंताहिं समुप्पज्जइ नामगुत्तस्स वा कम्मस्स अक्खीणस्स अवेइस्स अनिज्जिन्नस्स उदयणं समुपज्जइ, अन्नं अरहंता वा चक्कवट्टी वा बलदेवा वा वासुदेवा वा अंतकुलेसु वा पंतकुलेसु वा किविणकुलेसु वा तुच्छकुलेसु वा दरिद्दकुलेसु वा भिक्खागकुलेसु वा माहणकुलेसु वा आयंसु वा आयंति वा आयंस्संति वा नो चेवणं जोणीजम्मणनिक्खमणेणं निक्खमिंसु वा निक्खमंति वा निक्खमस्संति वा तं जीअमे अंतीअपच्चुपन्नमणागयाणं देविंदाणं देवराईणं जन्नं अरहंते भगवंते तहप्पगारेहिंतो अंतकुलेहिंतो पंतकुलेहिंतो तुच्छदरिद्दकिविणभिक्खागमाहणकुलेहिंतो तहप्पगारेसु उग्गभोगरायन्नखत्तियइक्खागहरिवंसकुलेसु साहरावित्तए॥" ततश्च वैश्यानां कार्त्तिकश्रेष्ठिकामदेवादीनामप्युपनयनजिनोपवीतधारणं। शूद्राणामप्यानन्दादीनामुत्तरीयधारणं शेषाणां वणिगादीनां उत्तरासङ्गानुज्ञा। जिनोपवीतं हि भगवतो जिनस्य गार्हस्थ्यमुद्रा

यतीनां हि निर्ग्रन्थानां सर्वबाह्याभ्यन्तरकर्मविमुक्तानां नवब्रह्मगुप्तिगुप्ता ज्ञानदर्शनचारित्ररत्नमयी हृद्गतैव।
सद्भावनाभाविता हि सर्वदा मुनयो न बहिः सूत्ररूपां नवब्रह्मगुप्तियुतां रत्नमयीं वहन्ति तन्मयत्वात्। न
समुद्रो जलपात्रं करे करोति। न सूर्यो दीपं बिभर्त्ति। यत उक्तं—"अग्नौ देवोऽस्ति विप्राणां हृदि देवोऽस्ति
योगिनाम्। प्रतिमास्वल्पबुद्धीनां सर्वत्र विदितात्मनाम्॥ १॥" अतः शिखासूत्रविवर्जिता यतयः ब्रह्मगु-
प्तिरत्नत्रयकरणकारणानुमतिषु सदैवादृताः। गृहिणः पुनर्ब्रह्मगुप्तिरत्नत्रये लेशश्रवणस्मरणमात्रधृते ब्रह्मगुप्ती
रत्नत्रयं च सूत्रमुद्रया हृदि वहन्ति। "प्रतिमास्वल्पबुद्धीनां" इति वचनाद् अतदात्मकत्वे मुद्राधारणं। यथा
छद्मस्थस्य बाह्याभ्यन्तरतपःकर्म तथा नवतन्तुगर्भत्रिसूत्रमयमेकमग्रम्। एवमग्रत्रयं विप्रस्य, अग्रद्वयं क्षत्रियस्य,
अग्रमेकं वैश्यस्य, उत्तरीयकं शूद्रस्य, उत्तरासङ्गानुज्ञा परेषां। कथमीदृशो विशेषः? तदुच्यते, ब्राह्मणैर्नवब्र-
ह्मगुप्तियुतं ज्ञानदर्शनचारित्ररूपं रत्नत्रयं स्वयं करणीयं परैः कारणीयं परेषामनुज्ञातव्यं च ब्रह्मगुप्तिगुप्ता
इति ब्राह्मणाः स्वयं रत्नत्रयीमध्ययनसम्यग्दर्शनचारित्रक्रियाभिराचरन्ति। परैरध्यापनसम्यक्त्वोपदेशा-
चारप्ररूपणैः कारयन्ति। परांश्च ज्ञानोपासनसम्यग्दर्शनधर्मोपासनाभिः श्रद्दधानान् अनुज्ञां याचमानान्
अनुजानन्ति। अतो नवब्रह्मगुप्तिगर्भरत्नरत्नत्रयकरणकारणानुमतिभाजां ब्राह्मणानां जिनोपवीतेऽग्रत्रयं,
क्षत्रियाणां च रत्नत्रयस्य स्वयमाचरणे निजशक्त्या नयप्रवृत्त्या परैरत्नत्रयस्याचरणकारणं न तेषामनुज्ञादानं
युज्यते। ते हि प्रभुत्वशालिनो न परेषु नियमाद्यनुजानन्ति। अतः क्षत्रियाणां जिनोपवीतं द्व्यग्रं। वैश्यैर्ज्ञा-

नभक्त्या सम्यक्त्वधृत्या उपासकाचारशक्त्या स्वयमाचरणीयं तेषामसामर्थ्याद् अनुपदेशकत्वात् च रत्नत्र-
यस्य कारणानुज्ञे न युक्ते अतो वैश्यानां जिनोपवीतमेकाग्रं । शूद्राणां हि ज्ञानदर्शनचारित्ररूपस्य रत्नत्र-
यस्य स्वयं करणेऽप्यशक्तिः कारणानुमती आस्तां, तेषामधमजातित्वान्निःसत्त्वत्वाद् अज्ञानत्वाच्च, अतस्तेषां
जिनाज्ञाभूतस्योत्तरीयस्य धारणं । तदपराणां वणिगादीनां देवगुरुधर्मोपासनवेलायां जिनाज्ञारूपा उत्तरा-
सङ्गमुद्रा । जिनोपवीतरूपं यथा स्तनान्तरमात्रं चतुरशीतिगुणमेकं सूत्रं तत् त्रिगुणं कार्यं ततोऽपि त्रिगुणं
वर्त्तनीयम्, एतावता एकस्तन्तुः तथैव रीत्या एतादृशं पूर्वोक्तं तत् द्वयं अन्यथोजनीयं एतावतैकमग्रं । तत्र
ब्राह्मणक्षत्रियवैश्यानां त्रयं द्वयमेकं योज्यं । परेषां मते इत्युक्तं—"कृते स्वर्णमयं सूत्रं त्रेतायां रौप्यमेव
च । द्वापरे ताम्रसूत्रं च कलौ कार्पासमिष्यते ॥ १ ॥" जिनमते तु सौवर्णं सूत्रं सर्वदा ब्राह्मणानामेव क्षत्रिय-
वैश्यानां सदा कार्पाससूत्रमेव । इति जिनोपवीतयुक्तिः ॥ ॥ अथोपनयनविधिरुच्यते । उपनीयते वर्णक्रमा-
रोहयुक्त्या प्राणी पुष्टिं नीयते इत्युपनयनं—"श्रवणश्च धनिष्ठा च हस्तो मृगशिरस्तथा । अश्विनी रेवती
स्वातिश्चित्रा चैव पुनर्वसू ॥ १ ॥ तथा च—सौम्ये पौष्णे [1]वैष्णवे वासवाख्ये हस्तस्वातीत्वाष्ट्रपुष्याश्विनीषु ।
ऋक्षेऽदित्यां मेखलाबन्धमोक्षौ संस्मर्येते नूनमाचार्यवर्यैः ॥ २ ॥ गर्भाधानादष्टमे जन्मतो वा मौञ्जीबन्धः
शस्यते ब्राह्मणानाम् । राजन्यानां नूनमेकादशाब्दे वैश्यानां च द्वादशे वेदविद्भिः ॥ ३ ॥ वर्णाधिपे बलोपेते

१ अनेन कर्मणेति शेषः ।

उपनीतिक्रिया हिता । सर्वेषां वा गुरौ चन्द्रे सूर्ये च बलशालिनि ॥ ४ ॥ शाखाधिपे बलिनि केन्द्रगतेऽथवा-स्मिन् वारेऽस्य चोपनयनं गदितं द्विजानाम् । नीचस्थितेऽरिगृहगे च पराजिते स्यात् जीवे भृगौ श्रुतिविधिः स्मृतिकर्महीना ॥ ५ ॥ लग्ने जीवे भार्गवे च त्रिकोणे शुक्रांशस्थे स्याद्द्विधौ वेदवेदां (?) । सौरांशस्थे सूरिलग्ने सशुक्रे विद्याशीलः प्रोज्झितः स्यात्कृतघ्नः ॥ ६ ॥ स्वानुष्ठाने रतः स्यात्प्रवरमतियुतः केन्द्रसंस्थे सुरेज्ये विद्या-सौख्यार्थयुक्तो ह्युशनसि शशिजेऽध्यापकश्च प्रदिष्टः । सूर्ये राजोपसेवी भवति धरणिजे शस्त्रवृत्तिर्द्विजन्मा शीतांशौ वैश्यवृत्तिर्दिनकरतनये सेवकश्चान्त्यजानाम् ॥ ७ ॥ शन्यंशे ह्युद्यति मूर्खतार्कभागे क्रूरत्वं भवति च पापधीः कुजांशे । चन्द्रांशे त्वतिजडिमा बुधे पटुत्वं यज्ञत्वं गुरुभृगुभागयोर्गृणन्ति ॥ ८ ॥ सार्के जीवे निर्गुणोऽर्थेन हीनः क्रूरस्सारे स्यात्पटुः सत्समेते । भानोः पुत्रेणालसो निर्गुणश्च स्याच्छुक्रेन्दू जीववत्सप्र-कल्पौ ॥ ९ ॥ निर्दोषेष्वेषु धिष्ण्येषु वारेष्वपि कुजं विना । सुतिथौ दिनशुद्धौ च दिवा लग्ने शुभग्रहे ॥१०॥ विवाहवत्त्याज्यमृक्षदिनमासादि वर्जयेत् । पञ्चमे ग्रहनिर्मुक्ते लग्नेऽस्मिन् व्रतमाचरेत् ॥ ११ ॥" पूर्वं यथा-संपत्त्या उपनेयपुरुषस्य सप्ताहं नवाहं वा पञ्चाहं त्र्यहं वा सतैलनिषेकं स्नानं कारयेत् । ततो लग्नदिने गृह्य-गुरुस्तद्गृहे ब्राह्मे मुहूर्त्ते पौष्टिकं कुर्यात् । तदनन्तरमुपनेयशिरसि शिखावर्जितं केशवपनं कारयेत् । ततो वेदीस्थापनं तन्मध्ये वेदीचतुष्किका कार्या । वेदिप्रतिष्ठा विवाहाधिकाराद्वसेया । तत्र वेदिचतु-ष्किकायां समवसरणरूपं चतुर्मुखं जिनबिंबं निवेशयेत् तमभ्यर्च्य गुरुः उपनेयं सदशश्वेतनिवसन-

परिधानं कृतवस्त्रोत्तरासङ्गं अक्षतनालिकेरक्रमुकहस्तं त्रिः प्रदक्षिणां कारयेत् । ततो गुरुरुपनेयं वामपार्श्वे संस्थाप्य पश्चिमाभिमुखबिंबसम्मुखमुपविश्य शक्रस्तवं प्रथमार्हत्स्तोत्रयुक्तं पठेत् । पुनस्त्रिः प्रदक्षिणीकृत्य उत्तराभिमुखो जिनबिंबाभिमुखस्तथैव शक्रस्तवं पठेत् । एवं त्रिः प्रदक्षिणान्तरितं पूर्वाभिमुखदक्षिणाभिमुखजिनबिंबेपि शक्रस्तवं पठेत् । मङ्गलगीतवादित्रादि तत्र बहु विस्तारणीयं । ततस्तत्राचार्योपाध्यायसाधुसाध्वीश्रावकश्राविकारूपं श्रीश्रमणसङ्घं सङ्घट्टयेत् । ततः प्रदक्षिणाशक्रस्तवपाठादनन्तरं गृह्यगुरुरुपनयनप्रारंभहेतुं वेदमुच्चरेत् । उपनेयस्तु दूर्वाफलपरिपूर्णकर ऊर्ध्वस्थितो जिनाग्रे कृताञ्जलिः शृणुयात् । उपनयनारंभवेदमन्त्रो यथा—"ॐ अर्हं अर्हद्भ्यो नमः, दर्शनाय नमः, चारित्राय नमः, संयमाय नमः, सत्याय नमः, शौचाय नमः, ब्रह्मचर्याय नमः, आकिञ्चन्याय नमः, तपसे नमः, शमाय नमः, मार्दवाय नमः, आर्जवाय नमः, मुक्तये नमः, धर्माय नमः, सङ्घाय नमः, सैद्धांतिकेभ्यो नमः, धर्मोपदेशकेभ्यो नमः, वादिलब्धिभ्यो नमः, अष्टाङ्गनिमित्तज्ञेभ्यो नमः, तपस्विभ्यो नमः, विद्याधरेभ्यो नमः, इह लोकसिद्धेभ्यो नमः, कविभ्यो नमः, लब्धिमद्भ्यो नमः, ब्रह्मचारिभ्यो नमः, निष्परिग्रहेभ्यो नमः, दयालुभ्यो नमः, सत्यवादिभ्यो नमः, निःस्पृहेभ्यो नमः, एतेभ्यो नमस्कृत्यायं प्राणी प्राप्तमनुष्यजन्मा प्रविशति वर्णक्रमं अर्हं ॐ ॥" इति वेदोच्चारं विधाय पुनरपि पूर्ववत् त्रिः प्रदक्षिणीकृत्य चतुर्दिक्षु शक्रस्तवपाठं सयुगादिदेवस्तवं कुर्यात् । तद्दिने उपनेयस्य जलयवान्नभोजनेनाचाम्लप्रत्याख्यानं कारयेत् । ततश्च उपनेयं वामपार्श्वे संस्थाप्य सर्वतीर्थोदकैः अमृता-

मन्त्रेण कुशाग्रैरभिषिञ्चेत्। ततः परमेष्ठिमन्त्रं पठित्वा "नमोऽर्हत्सिद्धाचार्योपाध्यायसर्वसाधुभ्यः" इति कथयित्वा जिनप्रतिमाग्रे पूर्वाभिमुखमुपनेयं निवेशयेत्। ततो गृह्यगुरुश्चन्दनमन्त्रेणाभिमन्त्रयेत्। चन्दनमन्त्रो यथा —"ॐ नमो भगवते, चन्द्रप्रभजिनेन्द्राय, शशाङ्कहारगोक्षीरधवलाय, अनन्तगुणाय, निर्मलगुणाय, भव्यजनप्रबोधनाय, अष्टकर्ममूलप्रकृतिसंशोधनाय, केवलालोकविलोकितसकललोकाय, जन्मजरामरणविनाशकाय, सुमङ्गलाय, कृतमङ्गलाय, प्रसीद भगवन् इह चन्दननामामृताश्रवणं कुरु कुरु स्वाहा।" अनेन मन्त्रेण चन्दनमभिमन्त्र्य हृदि जिनोपवीतरूपां, कटौ मेखलारूपां, ललाटे तिलकरूपां रेखां कुर्यात्। तत उपनेयो गुरोः पादयोः "नमोऽस्तु" २ इति भणन्निपत्य ऊर्ध्वीभूतः कृताञ्जलिरिति वदेत्—"भगवन्! वर्णरहितोऽस्मि, आचाररहितोऽस्मि, मन्त्ररहितोऽस्मि, गुणरहितोऽस्मि, धर्मरहितोऽस्मि, शौचरहितोऽस्मि, ब्रह्मरहितोऽ[illegible] देवर्षिपित्रतिथिकर्मसु नियोजय मां। पुनः "नमोऽस्तु" २ वदन् गुरोः पादयोः निपतति। गुरुरपि [illegible]पत्त्या [illegible] पठन् उपनेयं शिखायां धृत्वा ऊर्ध्वं कुर्यात्—"ॐ अर्हं देहिन्निमग्नोऽसि भवार्णवे तत्कर्षति त्वां भगवतोऽर्हतः प्रवचनैकदेशरज्जुना गुरुस्तदुत्तिष्ठ प्रवचनादादाय श्रद्धधाहि अर्हं ॐ।" इति उपनेयमुत्थाप्य अर्हतः प्रतिमापुरः पूर्वाभिमुखमूर्ध्वीकुर्यात्। ततो गृह्यगुरुः त्रितन्तुवर्त्तितां एकाशीतिकरप्रमाणां मुञ्जमेखलां स्वकरद्वये निधाय अमुं वेदमन्त्रं पठेत्—"ॐ अर्हं आत्मन् देहिन् ज्ञानावरणेन बद्धोऽसि, दर्शनावरणेन बद्धोऽसि, वेदनीयेन बद्धोऽसि, मोहनीयेन बद्धोऽसि, आयुषा बद्धोऽसि, नाम्ना बद्धोऽसि, गोत्रेण बद्धोऽसि, अन्तरायेण

बद्धोऽसि, कर्माष्टकप्रकृतिस्थितिरसप्रदेशैर्बद्धोऽसि, तन्मोचयति त्वां भगवतोऽर्हतः प्रवचनचेतना, तद् बुध्यस्व, मा मुहः, मुच्यतां तव कर्मबन्धनमनेन मेखलाबन्धेन अर्हं ॐ।" इति पठित्वा उपनेयस्य कटौ नवगुणां मेखलां बध्नीयात् । तत उपनेयः "ॐ नमोऽस्तु" २ इति कथयन् गृह्यगुरोः पादयोर्निपतति । मेखलाया एकाशीति-हस्तत्वं विप्रस्यैकाशीतितन्तुगर्भजिनोपवीतसूचनाय, क्षत्रियस्य चतुःपञ्चाशत्करत्वात्तावत्तन्तुगर्भजिनोपवीत-सूचनाय । नवगुणबन्धना विप्रस्य, षड्गुणबन्धना क्षत्रियस्य, त्रिगुणबन्धना वैश्यस्य तथा । मौञ्जीकौपीनजि-नोपवीतानां पूजनं, गीतादिमङ्गलं, निशाजागरणं तत्पूर्वदिनस्य निशि कार्यं । ततः पुनर्गृह्यगुरुः उपनेयवित-स्तिपृथुलं त्रिवितस्तिदीर्घं कौपीनं करद्वये निधाय—"ॐ अर्हं आत्मन् देहिन् मतिज्ञानावरणेन, श्रुतज्ञानाव-रणेन, अवधिज्ञानावरणेन, मनःपर्यायावरणेन, केवलज्ञानावरणेन, इन्द्रियावरणेन, चित्तावरणेन आवृतोऽसि तन्मुच्यतां तवावरणमनेनाचरणेन अर्हं ॐ ॥" इति वेदमन्त्रं पठन् उपनेयस्य अन्तः कक्षं कौपीनं परिधाप-येत् । तत उपनेयो "नमोऽस्तु" २ वदन् पुनरपि गृह्यगुरोः पादयोर्निपतेत् । ततस्त्रिस्त्रिः प्रदक्षिणीकृत्य चतु-र्दिक्षु शक्रस्तवपाठः । ततो लग्नवेलायां जातायां गुरुः पूर्वोक्तं जिनोपवीतं स्वकरे निदध्यात् । तत उपनेयः पुनरूर्ध्वं स्थितः करौ संयोज्य इति वदेत्—"भगवन् वर्णोज्झितोऽस्मि, ज्ञानोज्झितोऽस्मि, क्रियोज्झितो-ऽस्मि, तज्जिनोपवीतदानेन मां वर्णज्ञानक्रियासु समारोपय" इत्युक्त्वा "नमोऽस्तु" २ कथयन् गृह्यगुरुपाद-योर्निपतेत् । गुरुः पुनः पूर्वेणोत्थापनमन्त्रेण तमुत्थाप्योर्ध्वीकुर्यात् । ततो गुरुर्दक्षिणकरतलघृतजिनोपवीतः

"ॐ अर्हं नवब्रह्मगुप्तीः स्वकरणकारणानुमतीर्धारयेस्तदनन्तरमक्षय्यमस्तु ते व्रतं स्वपरतरणतारणसमर्थो भव अर्हं ॐ।" क्षत्रियस्य पुनः—"करणकारणाभ्यां धारयेः स्वस्य तरणसमर्थो भव।" वैश्यस्य पुनः—"करणेन धारयेः स्वस्य तरणसमर्थो भव।" शेषं पूर्ववत्। इति वेदमन्त्रेण पञ्चपरमेष्ठिमन्त्रं भणन् उपनेयस्य कण्ठे जिनोपवीतं स्थापयेत्। तत उपनेयस्त्रिः प्रदक्षिणीकृत्य "नमोस्तु २" कथयन् गुरुं प्रणमति। गुरुरपि निस्तारपारगो भवेत्याशीर्वादयेत्। ततो गृह्यगुरुः पूर्वाभिमुखो जिनप्रतिमाग्रे शिष्यं वामपार्श्वे निवेश्य सर्वजगत्सारं महागमक्षीरोदधिनवनीतं सर्ववाञ्छितदायकं कल्पद्रुकामधेनुचिन्तामणितिरस्कारहेतुं निमेषमात्रस्मरणप्रदत्तमोक्षं पञ्चपरमेष्ठिमन्त्रं गन्धपुष्पपूजिते दक्षिणकर्णे त्रिः श्रावयेत्। ततस्त्रिस्तन्मुखेनैनमुच्चारयेत्। यथा—"नमो अरिहंताणं नमो सिद्धाणं नमो आयरियाणं नमो उवज्झायाणं नमो लोएसव्वसाहूणं।" तस्य मन्त्रप्रभावं श्रावयेत्। तद्यथा—"सोलससु अक्खरेसु इक्किकं अक्खरं जगुज्जोअं। भवसयसहस्समहणो जम्मिठिओ पंचनवकारो ॥ १ ॥ थंभेइ जलं जलणं चिंतिअमित्तोअ पंचनवकारो। अरिमारिचोरराउलघोरुवसग्गं पणासेई ॥२॥ एकत्र पञ्चगुरुमन्त्रपदाक्षराणि विश्वत्रयं पुनरनन्तगुणं परत्र। यो धारयेत्किल कुलानुगतं ततोऽपि वन्दे महागुरुतरं परमेष्ठिमन्त्रम् ॥ ३ ॥ ये केचनापि सुषमाद्यरका अनन्ता उत्सर्पिणीप्रभृतयः प्रययुर्विवर्त्ताः। तेष्वप्ययं परतरः प्रथितः पुरापि लब्ध्वैनमेव हि गताः शिवमत्र लोकाः ॥ ४ ॥ जग्मुर्जिनास्तदपवर्गपदं यदैव विश्वं वराकमिदमत्र कथं विनाऽस्मात्। एतद्विलोक्य भुवनोद्धरणाय धीरैर्मन्त्रात्मकं निजवपुर्निहितं तदात्र ॥ ५ ॥

इन्दुर्दिवाकरतया रविरिन्दुरूपः पातालमंबरमिला सुरलोक एव। किं जल्पितेन बहुधा भुवनत्रयेऽपि तन्नास्ति यन्न विषमं च समं च तस्मात् ॥ ६ ॥ सिद्धान्तोदधिनिर्मन्थान्नवनीतमिवोद्धृतम् । परमेष्ठिमहामन्त्रं धारयेद् हृदि सर्वदा ॥ ७ ॥ सर्वपातकहर्त्तारं सर्ववाञ्छितदायकम्। मोक्षारोहणसोपानं मन्त्रं प्राप्नोति पुण्यवान् ॥८॥ धार्योऽयं भवता यत्नात् न देयो यस्य कस्यचित्। अज्ञानेषु श्रावितोऽयं शपत्येव न संशयः ॥ ९ ॥ न स्पर्श्योऽपवित्रेण न शठेनान्यसंश्रयैः। नाविनीतेन नो दीर्घशब्देनापि कदाचन ॥ १० ॥ न बालानां नाशुचीनां नाधर्माणां न दुर्दृशाम् । नापूतानां न दुष्टानां दुर्जातीनां न कुत्रचित् ॥ ११ ॥ अनेन मन्त्रराजेन भूयास्त्वं[1] विश्वपूजितः। प्राणान्तेऽपि परित्यागमस्य कुर्यान्न कुत्रचित् ॥ १२ ॥ गुरुत्यागे भवेद्दुःखं मन्त्रत्यागे दरिद्रता। गुरुमन्त्रपरित्यागे सिद्धोऽपि नरकं व्रजेत् ॥ १३ ॥ इति ज्ञात्वा सुगृहीतं कुर्यान्मन्त्रममुं सदा । सेत्स्यन्ति सर्वकार्याणि तवास्मान्मन्त्रतो ध्रुवम् ॥ १४ ॥" गुरुणेति शिक्षित उपनीतस्त्रिः प्रदक्षिणीकृत्य "नमोऽस्तु" २ इति कथयन् गुरुं नमस्कुर्यात्। गुरवे स्वर्णजिनोपवीतं शुभ्रकौशेयनिवसनं स्वर्णमौञ्जीं च यथासंपत्त्या दद्यात्। सर्वस्यापि सङ्घस्य तांबूलवस्त्रदानम् ॥ इति उपनयने व्रतबन्धविधिः ॥ ॥ अथ व्रतादेशविधिः। तस्मिन्नेव क्षणे तस्मिन्नेव सङ्घसङ्गमे तस्मिन्नेव गीतवाद्याद्युत्सवे तस्मिन्नेव वेदिचतुष्किकाप्रतिस्थापनसंयोगे व्रतादेशमारभेत। तस्य चायं क्रमः—गृह्यगुरुः उपनीतपुरुषस्य कार्पासकौशेयानि अन्तरीयोत्तरीयान्यपनीय मौञ्जीकौपीनोपवी-

---

१ 'जातस्त्वं' इत्यपि पाठः।

तादीनि तद्देहे तथैव संस्थाप्य तदुपरि कृष्णसाराजिनं वा वृक्षवल्कलं वस्त्रं वा परिधापयेत् । तत्करे च पालाशदण्डं दद्यात् । इति मन्त्रं च पठेत्—"ॐ अर्हं ब्रह्मचार्यसि, ब्रह्मचारिवेषोऽसि, अवधिब्रह्मचर्योऽसि, धृतब्रह्मचर्योऽसि, धृताजिनदण्डोऽसि, बुद्धोऽसि, प्रबुद्धोऽसि, धृतसम्यक्त्वोऽसि, दृढसम्यक्त्वोऽसि, पुमानसि, सर्वपूज्योऽसि, तदवधि ब्रह्मव्रतं आगुरुनिर्देशं धारयेः अर्हं ॐ ।" इति पठित्वा व्याघ्रचर्ममये आसने कल्पितकाष्ठमयासने वा उपनीतं निवेशयेत् । तस्य दक्षिणकरप्रदेशिन्यां सदर्भां काञ्चनमयीं पञ्चगुञ्जामितषोडशमाषकतुलितां पवित्रिकां मुद्रिकां परिधापयेत् । पवित्रिकापरिधापनमन्त्रो यथा—"पवित्रं दुर्लभं लोके सुरासुरनृवल्लभम् । सुवर्णं हन्ति पापानि मालिन्यं च न संशयः ॥ १ ॥" तत उपनीतश्चतुर्दिक्षु मुखेन पञ्चपरमेष्ठिमन्त्रं पठन् गन्धपुष्पाक्षतधूपदीपनैवेद्यैर्जिनप्रतिमां पूजयेत् । ततो जिनप्रतिमां प्रदक्षिणीकृत्य गुरुं च प्रदक्षिणीकृत्य 'नमोऽस्तु २' भणन् योजितकर इति वदति, "भगवन् ! उपनीतोऽहं," गुरुः कथयति, "सुष्ठूपनीतो भव" पुनरुपनीतो 'नमोऽस्तु २' वदन् प्रणम्य वदति, "कृतो मे व्रतबन्धः" गुरुः कथयति, "सुकृतोऽस्तु" पुनः 'नमोऽस्तु' २ इति वदन् प्रणम्य शिष्यः कथयति, "भगवन् जातो मे व्रतबन्धः" गुरुः कथयति, 'सुजातोऽस्तु' पुनर्नमस्कृत्य शिष्यः कथयति, "जातोऽहं ब्राह्मणः क्षत्रियो वा वैश्यो वा?" गुरुः कथयति, "दृढव्रतो भव, दृढसम्यक्त्वो भव ।" पुनः शिष्यो नमस्कृत्य कथयति, "भगवन्, यदि त्वया ब्राह्मणोऽहं तदादिश कृत्यं ।" गुरुः कथयति, "अर्हद्गिरा आदिशामि ।" पुनर्नमस्कृत्य शिष्यः कथयति, "ब्रह्मन्,

नवब्रह्मगुप्तिगर्भं रत्नत्रयं समादिश।” गुरुः कथयति, “आदिशामि।” पुनः शिष्यः कथयति, “नवब्रह्मगुप्तिगर्भं रत्नत्रयं ममादिष्टं ?” गुरुः कथयति, ‘आदिष्टं’ । पुनर्न० मम समादिष्टं । गुरुः कथयति, ‘समादिष्टं’ । पुनः शिष्यः कथयति नव० ‘अनुजानीहि’ गुरुः कथयति, ‘अनुजानामि’ पुनः नव० ‘ममानुज्ञातं’ गुरुः कथयति, ‘अनुज्ञातं’ । पुनर्न० नव० ‘मया स्वयं करणीयं’ । गुरुः कथयति, ‘करणीयं’ पुनर्न० नव० ‘मया अन्यैः कारयितव्यं’ । गुरुः कथयति, ‘कारयितव्यं’। पुनर्न० नव० ‘कुर्वन्तोऽन्ये मया अनुज्ञातव्याः’ । गुरुः कथयति, ‘अनुज्ञातव्याः’ । क्षत्रियस्येदमन्तरं, “भगवन्, अहं क्षत्रियो जातः । आदेशसमादेशौ कथनीयौ अनुज्ञा न कथनीया । करणकारणे न कर्त्तव्ये कारयितव्यमिति कथनीयं । वैश्यस्य आदेश एव कथनीयः न समादेशानुज्ञे । कर्त्तव्यमेव कथनीयं न कारयितव्यानुज्ञातव्ये । तत उपनीतो योजितकरः कथयति, “भगवन् आदिश्यतां व्रतादेशः” । गुरुरादिशति, ब्राह्मणं प्रति व्रतादेशो यथा—“परमेष्ठिमहामन्त्रो विधेयो हृदये सदा । निर्ग्रन्थानां मुनीन्द्राणां कार्यं नित्यमुपासनम् ॥ १ ॥ त्रिकालमर्हत्पूजा च सामायिकमपि त्रिधा । शक्रस्तवैः सप्तवेलं वन्दनीया जिनोत्तमाः ॥ २ ॥ त्रिकालमेककालं वा स्नानं पूतजलैरपि । मद्यं मांसं तथा क्षौद्रं तथोदुंबरपञ्चकम् ॥ ३ ॥ आमगोरससंपृक्तं द्विदलं पुष्पितौदनम् । सन्धानमपि संसक्तं तथा वै निशिभोजनम् ॥ ४ ॥ शूद्रान्नं नैव नैवेद्यं नाश्नीयान्मरणेऽपि हि । प्रजार्थं गृहवासेऽपि संभोगो न तु कामतः ॥ ५ ॥ आर्यवेदचतुष्कं च पठनीयं यथाविधि । कर्षणं पाशुपाल्यं च सेवावृत्तिं विवर्जयेत् ॥ ६ ॥ सत्यं वचः प्राणिरक्षामन्यस्त्रीधन-

वर्जनम् । कषायविषयत्यागं विदध्याः शोकभागपि ॥ ७ ॥ प्रायः क्षत्रियवैश्यानां न भोक्तव्यं गृहे त्वया । ब्राह्मणानामार्हतानां भोजनं युज्यते गृहे ॥ ८ ॥ स्वज्ञातेरपि मिथ्यात्ववासितस्य विलासिनः । न भोक्तव्यं गृहे प्रायः स्वयंपाकेन भोजनम् ॥ ९ ॥ आमान्नमपि नीचानां न ग्राह्यं दानमञ्जसा । भ्रमता नगरे प्रायः कायस्पर्शो न केनचित् ॥ १० ॥ उपवीतं स्वर्णमुद्रां नान्तरीयमपि त्यजेः । कारणान्तरमुत्सृज्य नोष्णीषं शिरसि व्यधाः ॥ ११ ॥ धर्मोपदेशः प्रायेण दातव्यः सर्वदेहिनाम् । व्रतारोपं परित्यज्य संस्कारान् गृहमेधिनाम् ॥ १२ ॥ निर्ग्रन्थगुर्वनुज्ञातः कुर्यात्पञ्चदशापि हि । शान्तिकं पौष्टिकं चैव प्रतिष्ठामर्हदादिषु ॥ १३ ॥ निर्ग्रन्थानुज्ञया कुर्यात्प्रत्याख्यानं च कारयेः । धार्यं च दृढसम्यक्त्वं मिथ्याशास्त्रं विवर्जयेत् ॥ १४ ॥ नानार्यदेशे गन्तव्यं त्रिशुद्ध्या शौचमाचरेः । पालनीयस्त्वया वत्स व्रतादेशो भवावधिः॥ १५ ॥” इति ब्राह्मणव्रतादेशः ॥

अथ क्षत्रियव्रतादेशः । “परमेष्ठिमहामन्त्रः स्मरणीयो निरन्तरम् । शक्रस्तवैस्त्रिकालं च वन्दनीया जिनेश्वराः ॥ १ ॥ मद्यं मांसं मधु तथा सन्धानोदुंबरादि च । निशि भोजनमेतानि वर्जयेद्यतियत्नतः ॥ २ ॥ दुष्टनिग्रहयुद्धादि वर्जयित्वा च योगिनाम् । न विधेयः स्थूलमृषावादस्त्यक्तव्य एव च ॥ ३ ॥ परनारीं परधनं त्यजेद्न्यविकत्थनम् । युक्त्या साधूपासनं च द्वादशव्रतपालनम् ॥ ४ ॥ विक्रमस्याविरोधेन विधेयं जिनपूजनम् । धारणं च प्रयत्नेन सोपवीतान्तरीययोः ॥ ५ ॥ लिङ्गिनामन्यविप्राणामन्यदेवालयेष्वपि । प्रणामदानपूजादि विधेयं व्यवहारतः ॥ ६ ॥ सांसारिकं सर्वकर्म धर्मकर्मापि कारयेत । जैनविप्रैश्च निर्ग्रन्थैर्दृढसम्यक्त्ववासनः

॥ ७ ॥ रणे शत्रुसमाकीर्णे धार्यो वीर्यरसो हृदि । युद्धे मृत्युभयं नैव विधेयं सर्वथापि हि ॥ ८ ॥ गोब्राह्मणार्थे देवार्थे गुरुमित्रार्थ एव च । स्वदेशभङ्गे युद्धेऽत्र सोढव्यो मृत्युरप्यलम् ॥ ९ ॥ ब्राह्मणक्षात्रयोर्नैव क्रियाभेदोऽस्ति कश्चन । विहायान्यव्रतानुज्ञाविद्यावृत्तिप्रतिग्रहान् ॥ १० ॥ दुष्टनिग्रहणं युक्तं लोभं भूमिप्रतापयोः । ब्राह्मणव्यतिरिक्तं च क्षत्रियो दानमाचरेत् ॥ ११ ॥" इति क्षत्रियव्रतादेशः ॥ ॥ अथ वैश्यव्रतादेशः—"त्रिकालमर्हत्पूजा च सप्तवेलं जिनस्तवः । परमेष्ठिस्मृतिश्चैव निर्ग्रन्थगुरुसेवनम् ॥ १ ॥ आवश्यकं द्विकालं च द्वादशव्रतपालनम् । तपोविधिर्गृहस्थार्हो धर्मश्रवणमुत्तमम् ॥ २ ॥ परनिन्दावर्जनं च सर्वत्राप्युचितक्रमः । वाणिज्यपाशुपाल्याभ्यां कर्षणेनोपजीवनम् ॥ ३ ॥ सम्यक्त्वस्यापरित्यागः प्राणनाशेऽपि सर्वथा । दानं मुनिभ्य आहारपात्राच्छादनसद्मनाम् ॥ ४ ॥ कर्मादानविनिर्मुक्तं वाणिज्यं सर्वमुत्तमम्[1] । उपनीतेन वैश्येन कर्तव्यमिति यत्नतः ॥ ५ ॥" इति वैश्यव्रतादेशः ॥ ॥ अथ चातुर्वर्ण्यस्य समानो व्रतादेशः—"निजपूज्यगुरुप्रोक्तं देवधर्मादिपालनम् । देवार्चनं साधुपूजा प्रणामो विप्रलिङ्गिषु ॥ १ ॥ धनार्जनं च न्यायेन परनिन्दाविवर्जनम् । अवर्णवादो न क्वापि राजादिषु विशेषतः ॥ २ ॥ स्वसत्त्वस्यापरित्यागो दानं वित्तानुसारतः । आयोचितो व्ययश्चैव यथाकाले च भोजनम् ॥ ३ ॥ न वासोऽल्पजले देशे नदीगुरुविवर्जिते । न विश्वासो

1 यत्कर्मबन्धने निमित्तं न भवति तादृशं वाणिज्यं सर्वमेवोत्तममिति तात्पर्यम्, यत्तु तत्तु तादृशं तत्र संभवनीति धर्मशास्त्रनियममनुरुध्य सर्वविधं तदुत्तममिति तदाकूतम् ।

नरेन्द्राणां नागनीचनियोगिनाम् ॥ ४ ॥ नारीणां च नदीनां च लोभिनां पूर्ववैरिणाम् । कार्यं विना स्थाव-
राणां अहिंसा देहिनामपि ॥ ५ ॥ नासत्याहितवाक् चैव [illegible] गुरुभिर्न च । मातापित्रोर्गुरोश्चैव माननं
परतत्त्ववान् ॥ ६ ॥ शुभशास्त्राकर्णनं च तथा नाभक्ष्यभक्षणम् । अ[illegible]ज्यानां न च त्यागोऽप्यघात्यानामघा-
तनम् ॥ ७ ॥ अतिथौ च तथा पात्रे दीने दानं यथाविधि । दरिद्राणां [illegible]थान्धानामापदुद्धारभृतामपि ॥ ८ ॥
हीनाङ्गानां विकलानां नोपहासः कदाचन । समुत्पन्नक्षुत्पिपासाघृणाक्रोशादिगोपनम् ॥ ९ ॥ अरिषड्वर्ग-
विजयः पक्षपातो गुणेषु च । देशाचाराचरणं च भयं पापापवादयोः ॥ १० ॥ उद्वाहः सदृशाचारैः [1]समजा-
त्यन्यगोत्रजैः । त्रिवर्गसाधनं नित्यमन्योन्याप्रतिबन्धतः ॥ ११ ॥ परिज्ञानं स्वपरयोर्देशकालादिचिन्तनम् ।
सौजन्यं दीर्घदर्शित्वं कृतज्ञत्वं सलज्जता ॥ १२ ॥ परोपकारकरणं परपीडनवर्जनम् । पराक्रमः परिभवे सर्वत्र
क्षान्तिरन्यदा ॥ १३ ॥ जलाशयश्मशानानां तथा दैवतसद्मनाम् । निद्राहाररतादीनां सन्ध्यासु परिवर्जनम्
॥ १४ ॥ प्रदेशोल्लङ्घनं चैव तटे शयनमेव च । कूपस्य वर्जनं नद्या लङ्घनं तरणीं विना ॥ १५ ॥ गुर्वासनादि-
शय्यासु तालवृन्ते कुभूमिषु । दुर्गोष्ठीषु कुकार्येषु सदैवासनवर्जनम् ॥ १६ ॥ न लङ्घनं च गर्त्तादेर्न दुष्टस्वामिसे-
वनम् । न चतुर्थीन्दुनग्नस्त्रीशक्रचापविलोकनम् ॥ १७ ॥ हस्त्यश्वनखिनां [2]श्वापदादिनां दूरवर्जनम् । दिवा

१ जात्या ब्राह्मणत्वादिना समेन गोत्रेण काश्यपादिना भिन्नेन सदृशाचारेण वरेणाविवाहस्त्रिवर्गसाधनमन्यादृशस्य कामभात्रफलकत्वात्सभ्यसमागमः ।
२ "श्वापदादीनां" इत्यपि पाठः ।

संभोगकरणं वृक्षस्योपासनं निशि ॥ १८ ॥ कलहे तत्समीपं च वर्जनीयं निरन्तरम् । देशकालविरुद्धं च भोज्यकृत्यं गमागमौ ॥ १९ ॥ भाषितं व्यय आयश्च कर्त्तव्यानि न कर्हिचित् । चातुर्वर्ण्यस्य सर्वत्र व्रतादेशोऽयमुत्तमः ॥ २० ॥ इति चातुर्वर्ण्यस्य समानो व्रतादेशः । गृह्यगुरुरिति शिष्यस्य व्रतादेशं विधाय पुरतः गत्वा जिनप्रतिमां प्रदक्षिणयेत्[1] । पुनः पूर्वाभिमुखः शक्रस्तवं पठेत् । ततो गृह्यगुरुः आसने निविशेत् । शिष्यः नमोऽस्तु भणन् गुरोः पाद्योर्निपत्य इति वदेत्, "भगवन् भवद्भिर्मम व्रतादेशो दत्तः । गुरुः कथयति, दत्तः सुगृहीतोऽस्तु सुरक्षितोऽस्तु स्वयं तर परान् तारय संसारसागरात् ।" इत्युक्त्वा नमस्कारभणनपूर्वकमुत्थाय द्वाभ्यामपि चैत्यवन्दनं कार्यं । ततो ब्राह्मणेन क्षत्रियवैश्यगृहेषु भिक्षाटनं कार्यं । क्षत्रियेणशस्त्रग्रहः कार्यः । वैश्येनान्नदानं विधेयम् । इत्युपनयने व्रतादेशः ॥ ॥ अथ व्रतविसर्गः कथ्यते । ब्राह्मणेन वर्षाष्टकादारभ्य दण्डाजिनभृता भिक्षाभोजिना षोडशाब्दीं यावदध्यते अयमुत्तमः पक्षः । क्षत्रियेण दण्डाजिनभृता वर्षदशकादारभ्य षोडशाब्दीं यावत् स्वयं पाकभोजिना गुरुदेवसेवापरायणेनाध्यते । वैश्येन दण्डाजिनभृता स्वकृतपाकभोजिना द्वादशाब्दादारभ्य षोडशाब्दीं यावत् अध्यते अयमुत्तमः पक्षः । तथा चेत्कार्यव्यग्रतया तावन्ति दिनानि स्थातुं न शक्यन्ते तदा षण्मासीं यावत् स्थेयं । तद्भावे मासं तद्भावे पक्षं तद्भावे दिनत्रयं तद्भावे दिन एव व्रतविसर्गः । स कथ्यते–उपनीतस्त्रिः प्रदक्षिणीकृत्य चतुर्दिक्षु जिनप्र-

---

१ प्रदक्षिणां कारयेत् ।

तिमाग्रतः पूर्ववच्छक्रस्तवं पठेत् सयुगादिजिनस्तोत्रम् । तत आसनस्थस्य गुरोः पुरो नमस्कृत्य योजितकरो वदेत्—“भगवन्! देशकालाद्यपेक्षया व्रतविसर्गमादिश।” गुरुः कथयति, “आदिशामि।” पुनः प्रणम्य शिष्यः कथयति, “भगवन् मम व्रतविसर्ग आदिष्टः” गुरुः कथयति, ‘आदिष्टः’ पुनर्नमस्कृत्य शिष्यः कथयति, “भगवन् व्रतबन्धो विसृष्टः।” गुरुः कथयति, “जिनोपवीतधारणेन अविसृष्टोऽस्तु स्वजन्मनः षोडशाब्दीं ब्रह्मचारी पाठधर्मनिरतस्तिष्ठेः।” ततः पञ्च परमेष्ठिमन्त्रं भणन् पूर्वं शिष्यो मौञ्जीकौपीनवल्कलदण्डानपनीय गुर्वग्रे स्थापयेत्। स्वयं जिनोपवीतधारी श्वेतनिवसनोत्तरीयो भूत्वा गुर्वग्रे प्रणम्योपविशेत्। ततो गुरुः तस्य द्वादशतिलकभृतः पुरः उपनयनव्याख्यानं कुर्यात्। तद्यथा—“अष्टवर्षं ब्राह्मणमुपनयेत् दशवर्षं क्षत्रियं द्वादशवर्षं वैश्यं, तत्र गर्भमासा अप्यन्तर्भवन्ति। तथा च जिनोपवीतमिति, जिनस्य उपवीतं मुद्रासूत्रमित्यर्थः। नव ब्रह्मगुप्तिगर्भं रत्नत्रयमेतत् पुरा श्रीयुगादिदेवेन वर्णत्रयस्य गार्हस्थ्यभृतः स्वमुद्राधारणमाभवादुपदिष्टं। ततस्तीर्थव्यवच्छेदे माहनैर्मिथ्यात्वमुपगतैर्वेदचतुष्के हिंसाप्ररूपणेन मिथ्यापथं नीते पर्वतवसुराजाभ्यां यज्ञमार्गे प्रवर्त्तिते यज्ञोपवीतमिति नाम धृतं । प्रलपन्तु मिथ्यादृशो यथेष्टं । जिनमते जिनोपवीतमेवैतत्त्वया सुधारितं कार्यं। मासे मासे नव्यं परिधेयं। प्रमादाज्जिनोपवीते त्यक्ते त्रुटिते वा उपवासत्रयं विधाय नवीनं धार्यं। प्रेतक्रियायां दक्षिणस्कन्धोपरि वामकक्षाधो विपरीतं धार्यं । यतो विपरीतं कर्म तत्। मुनयोऽपि मृतमुनिपरित्यागे तथाविधं विपरीतमेव वस्त्रं परिदधति । तत्त्वं पुरा जन्मना शूद्रोऽभूः

सांप्रतं संस्कारविशेषेण ब्रह्मगुप्तिधारणाद्ब्राह्मणः, क्षतात् त्राणेन क्षत्रं वा न्यायधर्मोपदेशात्, वैश्यो वा जातोऽसि। तत्सक्रियमेतज्जिनोपवीतं सुगृहीतं कुर्याः सुरक्षितं कुर्याः। अस्तु ते क्षयरहितः सद्धर्मवासन उपनयनविधिः।" इति व्याख्याय परमेष्ठिमन्त्रं भणित्वा द्वावप्युत्तिष्ठतः। चैत्यवन्दनं साधुवन्दनं च। इति उपनयने व्रतविसर्गविधिः॥ ॥ अथ गोदानविधिः। यथा, तदा व्रतविसर्गानन्तरं गुरुः सशिष्यस्त्रिस्त्रिर्जिनं प्रदक्षिणीकृत्य पूर्ववच्चतुर्दिक्षु शक्रस्तवपाठं कुर्यात्। ततो गृह्यगुरुः आसने उपविशेत्। ततः शिष्यो गुरुं त्रिः प्रदक्षिणीकृत्य नमस्कृत्य योजितकरः ऊर्ध्वस्थितो गुरुं विज्ञपयेत्। यथा, भगवन् तारितोऽहं निस्तारितोऽहं उत्तमः कृतोऽहं, सत्तमः कृतोऽहं, पूतः कृतोऽहं, तद् भगवन्नादिश प्रमादबहुले गृहस्थधर्मे मम किञ्चनापि रहस्यभूतं सुकृतं।" ततो गुरुर्भणति, "वत्स! सुष्ठ्वनुष्ठितं सुष्ठु पृष्टं तत् श्रूयतां—"दानं हि परमो धर्मो दानं हि परमा क्रिया। दानं हि परमो मार्गस्तस्माद्दाने मनः कुरु॥ १॥ दया स्यादभयं दानं उपकारस्तथाविधः। सर्वो हि धर्मसङ्घातो दानेऽन्तर्भावमर्हति॥ २॥ ब्रह्मचारी च पाठेन भिक्षुश्चैव समाधिना। वानप्रस्थस्तु कष्टेन गृही दानेन शुध्यति॥ ३॥ ज्ञानिनः परमार्थज्ञा अर्हन्तो जगदीश्वराः। व्रतकाले प्रयच्छन्ति दानं सांवत्सरं च ते॥ ४॥ गृह्णतां प्रीणनं सम्यग् ददतां पुण्यमक्षयम्। दानतुल्यस्ततो लोके मोक्षोपायोऽस्ति नापरः॥ ५॥" तत् त्वं वत्स! ब्राह्मण्यं क्षत्रत्वं वैश्यत्वं वा प्रपन्नोऽसि गृहस्थधर्मस्य मोक्षसोपानरूपं दानधर्मप्रारंभं कुरु।" ततः प्रणम्य शिष्यः कथयति, "भगवन्नादिश मे दानविधिं।" गुरुः कथयति, 'आदि-

शामि' । यथा—"गावो भूमिः सुवर्णं च रत्नानि पञ्च नक्तकाः । गजाश्वा इति दानं तदष्टधा परिकीर्त्तयेत् ॥ १ ॥ एतच्चाष्टविधं दानं विप्राणां गृहमेधिनाम् । देयं, न चापि यतयो गृह्णन्त्येतच्च निःस्पृहाः ॥ २ ॥ यतिभ्यो भोजनं वस्त्रं पात्रमौषधपुस्तके । दातव्यं द्रव्यदानेन तौ द्वौ नरकगामिनौ ॥ ३ ॥" ततः पूर्वं गोदानं, उपनीतो धेनुं सवत्सां कपिलां पाटलां तदभावे श्वेतां वा स्नपितचर्चितभूषितां पुरः समानीय पुच्छे धृत्वा रूप्यखुरां स्वर्णशृङ्गीं ताम्रपृष्ठां कांस्यमयदोहनपात्रां गुरवे दद्यात् । गुरुस्तत्पुच्छं करे धृत्वा इति वेदमन्त्रं पठेत् । यथा—"ॐ अर्हं गौरियं, धेनुरियं, प्रशस्यपशुरियं, सर्वोत्तमक्षीरदधिघृतेयं, पवित्रगोमयमूत्रेयं, सुधास्राविणीयं, रसोद्भाविनीयं, पूज्येयं, हृद्येयं, अभिवाद्येयं, तद्दत्तेयं त्वया धेनुः, कृतपुण्यो भव प्राप्तपुण्यो भव, अक्षय्यं दानमस्तु अर्हं ॐ ।" इत्युक्त्वा गृह्यगुरुर्धेनुं गृह्णीयात् । शिष्यः तया सह द्रोणमात्राणि सप्त धान्यानि तुलामात्रान् षड्रसान् नरतृप्तिमात्राः सप्त विकृतीर्दद्यात् इति गोदानं । अन्येषु सर्वेषु भूमिरत्नादिदानेषु मन्त्रो यथा —"ॐ अर्हं एकमस्ति, दशकमस्ति, शतमस्ति, सहस्रमस्ति, अयुतमस्ति, लक्षमस्ति, प्रयुतमस्ति, कोट्यस्ति कोटिदशकमस्ति कोटिशतमस्ति, कोटिसहस्रमस्ति, कोट्ययुतमस्ति, कोटिलक्षमस्ति, कोटिप्रयुतमस्ति, कोटाकोटिरस्ति, सङ्ख्येयमस्ति, असङ्ख्येयमस्ति, अनन्तमस्ति अनन्तानन्तमस्ति, दानफलमस्ति, तदक्षय्यं दानमस्तु ते अर्हं ॐ ।" इति परेषां दानानां मन्त्रपाठः । अत्रोपनयने गोदानस्यैव निश्चयः । शेषाणि दानानि क्रमेणान्यदापि दीयन्तां । गोदानादि गृह्यगुरुविप्रेभ्य एव देयं न यतिषु निःस्पृहेषु । यतिभ्योऽन्नपानवस्त्रपात्रमे-

षजवसतिपुस्तकादिदाने धर्मलाभ एव मन्त्रः, न तेभ्यो द्रव्यापेक्षिदानं केवलमसङ्गत्वात् परिग्रहव्यावृत्तेः। अथ गृह्यगुरुरुपनीताद्गोदानं गृहीत्वा वर्णानुज्ञां दत्त्वा चैत्यवन्दनं साधुवन्दनं विधाप्य तथैव सङ्घे मिलिते मङ्गलगीतवाद्येषु प्रसरत्सु शिष्यं साधुवसतिं नयेत् । तत्र पूर्ववत् मण्डलीपूजा वासःक्षेपः साधुवन्दनं। ततश्चतुर्विधसङ्घस्य पूजा मुनिभ्यो वस्त्रान्नपात्रादिदानं इति गोदानविधिः। संपूर्णोऽयं चतुर्विध उपनयनविधिः॥ ॥ अथ शूद्रस्योत्तरीयकन्यासविधिः। सप्ताहं तैलनिषेकस्नानं पूर्ववत्। तदनन्तरं पौष्टिकं यथाविधि सर्वशीर्षमुण्डनं वेदिकरणं चतुष्किकाकरणं जिनप्रतिमास्थापनं पूर्ववत्। ततो गृह्यगुरुर्जिनस्याष्टप्रकारां पूजां कुर्यात्। चतुर्दिक्षु शक्रस्तवपाठश्च। ततो गुरुरासने उपविशेत्। शिष्यः समवसरणं गुरुं च प्रदक्षिणीकृत्य परिधृतश्वेतनिवसनोत्तरासङ्गो 'नमोऽस्तु' २ कथयन् गुरुं प्रणम्य योजितकर ऊर्ध्वीभूय विज्ञपयेत्—"भगवन् प्राप्तमनुष्यजन्मार्यदेशार्यकुलस्य मम बोधिरूपां जिनाज्ञां देहि।" गुरुः कथयति, 'ददामि।' शिष्यः पुनः प्रणम्य कथयति, "न योग्योऽहमुपनयनस्य तज्जिनाज्ञां देहि।" गुरुः कथयति, 'ददामि'। ततो द्वादशगर्भतन्तुरूपं कार्पासं वा कौशेयं वा उत्तरीयकं जिनोपवीतदीर्घं परमेष्ठिमन्त्रभणनपूर्वं जिनोपवीतवत्परिधापयेत्। ततो गुरुः पूर्वाभिमुखस्य शिष्यस्य चैत्यवन्दनं कारयेत्। ततः शिष्यः 'नमोऽस्तु' २ भणन् सुखोपविष्टस्य गुरोः पादयोर्निपत्य पुनरप्यूर्द्ध्वीभूतो बद्धाञ्जलिरिति कथयेत्, "भगवन् उत्तरीयकन्यासेन जिनाज्ञामारोपितोऽहं।" गुरुः कथयति, "सम्यगारोपितोऽसि तर भवसागरं।" ततो गुरुरग्रत उपविष्टस्य शूद्रस्य

पुरो व्रतानुज्ञा दद्यात् । सा यथा—"सम्यक्त्वेनाधिष्ठितानि व्रतानि द्वादशैव हि । धार्याणि भवता नैव कार्यः कुलमदस्त्वया ॥ १ ॥ जैनर्षीणां तथा जैनब्राह्मणानामुपासनम् । विधेयं चैव गीतार्थाचीर्णं कार्यं तपस्त्वया ॥ २ ॥ न निन्द्यः कोऽपि पापात्मा न कार्यं स्वप्रशंसनम् । ब्राह्मणेभ्यस्त्वयामान्नं दातव्यं हितमिच्छता ॥ ३ ॥ शेषं चतुर्वर्णशिक्षाश्लोकव्याख्यानमाचरेत् । उत्तरीयपरिभ्रंशे भङ्गे वाप्युपवीतवत् ॥ ४ ॥ कार्यं व्रतं प्रेतकर्मकरणं वृषल त्वया । युक्तिरेषोत्तरासङ्गानुज्ञायां च विधीयते ॥ ५ ॥ क्षत्राणामथ वैश्यानां देशकालादियोगतः । त्यक्तोपवीतानां कार्यमुत्तरासङ्गयोजनम् ॥ ६ ॥ धर्मकार्ये गुरोर्दृष्टौ देवगुर्वालयेऽपि च । धार्यस्तथोत्तरासङ्गः सूत्रवत्प्रेतकर्मणि ॥ ७ ॥ अन्येषामपि कारूणां गुर्वनुज्ञां विनापि हि । गुरुधर्मादिकार्येषु उत्तरासङ्ग इष्यते ॥ ८ ॥" इति व्याख्याय गुरुः शिष्यस्य चैत्यवन्दनं कारयेत् । परमेष्ठिमन्त्रोच्चारणं च मन्त्रव्याख्यानं पूर्ववत् । नवरं शूद्रादीनां 'नमो' स्थाने 'णमो' उच्चारयेत् इति गुरुसंप्रदायः । तत्र सशिष्यो गुरुरुत्सवे क्रियमाणे धर्मागारं व्रजेत् । तत्र मण्डलीपूजा गुरुनमस्कृतिवासःक्षेपादि पूर्ववत् । ततो मुनिभ्योऽन्नवस्त्रपात्रदानं । चतुर्विधसङ्घपूजा च ॥ इत्युपनयने शूद्रादीनां उत्तरीयकन्यासोत्तरासङ्गानुज्ञाविधिः ॥ ॥ अथ बटूकरणविधिः । यतो ब्राह्मणाः सम्यगुपनीता वेदविद्यागर्भा दुष्प्रतिग्रहवर्जिता अशूद्रान्नभोजिनो माहनाचाररताः सर्वगृह्यसंस्कारप्रतिष्ठादिकर्मकृतः पूज्या भवन्ति । न ते माहनाः क्षत्रियादीनां नृपाणां शुश्रूषान्नपाकतदाज्ञाकरणाभ्युत्थानचाटुप्रशंसानमस्कारविनाभूताशीर्वाददानादिज्ञानकर्मकृषिवाणिज्यकरणतुरङ्गवृषभादि-

शिक्षाकरणाय कल्पन्ते। अतस्तथाविधेषु पूर्वोक्तेषु कर्मसु बटूकृता ब्राह्मणा योजयितुं योग्या भवन्ति। अतस्तेषां बटूकरणविधिर्विधीयते। उक्तं च, यतः—"च्युतव्रतानां व्रात्यानां तथा नैवेद्यभोजिनाम्। कुकर्मणामवेदानामजपानां च शस्त्रिणाम् ॥ १ ॥ ग्राम्याणां कुलहीनानां विप्राणां नीचकर्मणाम्। प्रेतान्नभोजिनां चैव मागधानां च बन्दिनाम् ॥ २ ॥ घाण्टिकानां सेवकानां गन्धतांबूलजीविनाम्। नटानां विप्रवेषाणां परशुरामान्ववायिनाम् ॥ ३ ॥ अन्यजात्युद्भवानां च बन्दिवेषोपजीविनाम्। इत्यादि विप्ररूपाणां बटूकरणमिष्यते ॥ ४ ॥" तस्य चायं विधिः—पूर्वं तस्य गृहे गृह्यगुरुर्यथोक्तविधिना पौष्टिकं कुर्यात्। ततस्तं शिष्यं संस्थाप्य मुण्डनं कारयेत्। ततस्तं तीर्थोदकैर्मन्त्राभिमन्त्रितैः स्नपयेत्। तीर्थोदकाभिमन्त्रणमन्त्रो यथा—"ॐ वं वरुणोऽसि, वारुणमसि, गाङ्गमसि, यामुनमसि, गौदावरमसि, नार्मदमसि, पौष्करमसि, सारस्वतमसि, शातद्रवमसि, वैपाशमसि, सैन्धवमसि, चान्द्रभागमसि, वैतस्तमसि, ऐरावतमसि, कावेरमसि, कारतोयमसि, गौतममसि, शैतमसि, शैतोदमसि, रौहितमसि, रौहितांशमसि, सारयवमसि, हारिकान्तमसि, हारिसलिलमसि, नारीकान्तमसि, नारकान्तमसि, रौप्यकूलमसि, सौवर्णकूलमसि, सालिलमसि, रात्तवतमसि, नैम्नगसलिलपाद्ममसि, औन्निम्नग्नमसि, पाद्ममसि, माहापद्ममसि, तौंगिच्छमसि, कैशरमसि, पौण्डरीकमसि, ह्रादमसि, नादेयमसि, कौपमसि, सारसमसि, कौण्डमसि, नैर्झरमसि, वापेयमसि, तैर्थमसि, अमृतमसि, जीवनमसि, पवित्रमसि, पावनमसि, तदमुं पवित्रय कुलाचाररहितमपि देहिनं।" अनेन

मन्त्रेण कुशाग्रेण सप्तवारमभिषिञ्चेत्। ततो नदीकूले तीर्थे देवायतने वा पवित्रे वा गृहे स्थाने तस्य बटूकरणीयस्य पूर्वं त्रिगुणा कुशमयमेखलां त्रिधा बध्नीयात्। मेखलाबन्धमन्त्रो यथा—"ॐ पवित्रोऽसि, प्राचीनोऽसि, नवीनोऽसि, सुगमोऽसि, अजोऽसि, शुद्धजन्मासि, तदमुं देहिनं धृतव्रतमव्रतं वा पावय, पुनीहि अब्राह्मणमपि ब्राह्मणं कुरु।" इति त्रिवेलं पाठः। ततस्तस्य कौपीनं परिधापयेत्। कौपीनमन्त्रो यथा—"ॐ अब्रह्मचर्यगुप्तोऽसि ब्रह्मचर्यधरोऽपि वा। वृतः कौपीनबन्धेन ब्रह्मचारी निगद्यते॥ १॥" इति त्रिवेलं पठित्वा कौपीनं परिधापयेत्। ततः पूर्वोक्तं ब्राह्मणसदृशमुपवीतं मन्त्रपूर्वं परिधापयेत्। मन्त्रो यथा—"ॐ सधर्मोऽसि, अधर्मोऽसि, कुलीनोऽसि, अकुलीनोऽसि, सब्रह्मचर्योऽसि, अब्रह्मचर्योऽसि, सुमना असि, दुर्मना असि, श्रद्धालुरसि, अश्रद्धालुरसि, आस्तिकोऽसि, नास्तिकोऽसि, आर्हतोऽसि, सौगतोऽसि, नैयायिकोऽसि, वैशेषिकोऽसि, साङ्ख्योऽसि, चार्वाकोऽसि, सलिङ्गोऽसि, अलिङ्गोऽसि, तत्त्वज्ञोऽसि, अतत्त्वज्ञोऽसि, तद्भव ब्राह्मणोऽमुनोपवीतेन भवन्तु ते सर्वार्थसिद्धयः।" अनेन मन्त्रेण नववारं पठितेनोपवीतस्थापनम्। ततस्तस्य करे पालाशदण्डं दद्यात्। मृगाजिनं च परिधापयेत्। भिक्षामार्गणं च कारयेत्। ततो भिक्षामार्गणानन्तरमुपवीतवर्जितं मेखलाकौपीनाजिनदण्डाद्यपनयेत्। तदपनयनमन्त्रो यथा—"ॐ ध्रुवोऽसि, स्थिरोऽसि, तदेकमुपवीतं धारय।" इति त्रिः पठेत्। ततो गुरुस्तं धृतश्वेतनिवसनोत्तरासङ्गं पुरो निवेश्य शिक्षयेत्। यथा—

"परनिन्दां परद्रोहं परस्त्रीधनवाञ्छनम्। मांसाशनं म्लेच्छकन्दभक्षणं चैव वर्जयेत्॥ १॥ वाणिज्ये स्वा-

मिसेधायां कपटं मा कृथाः क्वचित् । ब्रह्मस्त्रीभ्रूणगोरक्षादेवर्षिगुरुसेवनम् ॥ २ ॥ अतिथीनां पूजनं च कुर्या दानं यथाधनम् । अघात्यघातं मा कुर्या मा वृथा परतापनम् ॥ ३ ॥ उपवीतमिदं स्थाप्यमाजन्म विधिवत्त्वया । शेषः शिक्षाविधिः[1] कथ्यश्चातुर्वर्ण्यस्य पूर्ववत् ॥ ४ ॥" ततः स बटूकृतो गृह्यगुरवे स्वर्णवस्त्रधेन्वन्नदानं कुर्यात् । अत्र बटूकरणे वेदीचतुष्किकासमवसरणचैत्यवन्दनव्रतानुज्ञाव्रतविसर्गगोदानवासःक्षेपादि नास्ति । इति बटूकरणविधिः—"पौष्टिकस्योपकरणं मौञ्जी कौपीनवल्कले । उपवीतं स्वर्णमुद्रा गावः सहस्य सङ्गमः ॥ १ ॥ तीर्थोदकानि वस्त्राणि चन्दनं दर्भ एव च । पञ्चगव्यं बलिकर्म तथा वेदी चतुष्किका ॥ २ ॥ चतुर्मुखप्रतिमा च दण्डः पालाश एव च । इत्यादिवस्तुसंयोगो व्रतबन्धे विधीयते ॥ ३ ॥" इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने उपनयनादिकीर्त्तनो नाम द्वादश उदयः ॥ १२ ॥

त्रयोदश उदयः ।

अथाध्ययनारंभविधिः ।

"विद्यारंभोऽश्विनीमूलपूर्वासु मृगपञ्चके । हस्ते शतभिषक्स्वातिचित्रासु श्रवणद्वये ॥ १ ॥ बुधो गुरु-

---

1 'शिक्षाक्रमः' इत्यपि पाठः ।

स्तथा शुक्रो वारा विद्यागमे शुभाः । मध्यमौ दिननाथेन्दू त्याज्यौ कुजशनैश्वरौ ॥ २ ॥ अमावास्याष्टमी चैव प्रतिपच चतुर्दशी । पाठे वर्ज्याः सदारंभे रिक्ताष्टमी नवम्यपि ॥ ३ ॥" अथोपनयनसदृशे दिने लग्ने च विद्यारंभसंस्कारमारभेत । तस्य चायं विधिः—गृह्यगुरुः प्रथमविधिनोपनीतस्य पुरुषस्य गृहे पौष्टिकं कुर्यात् । ततो गुरुर्देवायतने धर्मागारे वा कदंबवृक्षतले वा कुशासनस्थः स्वयं शिष्यं च वामपार्श्वे कुशासने निवेश्य तद्दक्षिणकर्णं संपूज्य सारस्वतमन्त्रं त्रिः पठेत् । ततो गुरुः स्वगृहे वा अन्योपाध्यायशालायां वा पौषधागारे वा शिष्यं नरवाहनाश्वाद्यधिरूढं मङ्गलगीतेषु गीयमानेषु दानेषु दीयमानेषु वाद्येषु वाद्यमानेषु यतिगुरोः सकाशं नीत्वा मण्डलीपूजापूर्वं वासःक्षेपं कारयित्वा पाठशालायां नयेत् । ततः शिष्यो गुरोः पुरो निवेश्य इति शिक्षाश्लोकान् पठेत्, यथा—"अज्ञानतिमिरान्धानां ज्ञानाञ्जनशलाकया । नेत्रमुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ १ ॥ यासां प्रसादादधिगम्य सम्यक् शास्त्राणि विन्दन्ति परंपराज्ञाः[1] । मनीषितार्थप्रतिपादिकाभ्यो नमोऽस्तु ताभ्यो गुरुपादुकाभ्यः ॥ २ ॥ सत्येतस्मिन्नरतिरतिदं गृह्यते वस्तु दूरादप्यासन्नेऽप्यसति तु मनः स्थाप्यते नैव किञ्चित् । पुंसामित्यप्यवगतवतामुन्मनीभावहेतावित्थं बाढं भवति न कथं सद्गुरूपासनायाम् ॥ ३ ॥ इति मत्वा त्वया वत्स त्रिशुद्ध्योपासनं गुरोः । विधेयं येन जायन्ते गीर्धीकीर्त्तिधृतिश्रियः ॥ ४ ॥" इति शिष्यस्य शिक्षां दत्वा तस्माच स्वर्णवस्त्रदक्षिणां गृहीत्वा स्वगृहं व्रजेत् । तत उपाध्यायः स-

१ पदज्ञाः इत्यपि पाठः ।

र्वेषां पूर्वं मातृकापाठं पाठयेत् ततो विप्रस्य पूर्वमायुर्वेदं ततः षडङ्गीं ततो धर्मशास्त्रं पुराणादि । क्षत्रस्याप्येवमेव चतुर्दशविद्यास्ततश्च आयुर्वेदं धनुर्वेदं दण्डनीतिमाजीविकां च, वैश्यस्य धर्मशास्त्रं नीतिशास्त्रं, कामशास्त्रमर्थशास्त्रं नीतिशास्त्रमाजीविकाशास्त्रं, कारूणां तदुचितं विज्ञानशास्त्रमध्यापयेत् । ततः साधुभ्यश्चतुर्विधाहारवस्त्रपात्रपुस्तकदानम्—"पौष्टिकस्योपकरणं गीतं वादित्रमेव च । मन्त्रोपदेशः पाठस्य संस्कारवस्तुसङ्ग्रहः ॥ १ ॥" इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने विद्यारंभसंस्कारकीर्त्तनो नाम त्रयोदश उदयः ॥ १३ ॥

चतुर्दश उदयः ।

अथ विवाहविधिः ।

इह हि विवाहः समकुलशीलयोरेव भवति । यत उक्तं—"ययोरेव समं शीलं ययोरेव समं कुलम् । तयोर्मैत्री विवाहश्च नतु पुष्टविपुष्टयोः ॥ १ ॥" ततः समकुलशीलौ समज्ञाती ज्ञातदेशकुलान्वयौ विवाहसंबन्धे योज्यौ । ततश्च योऽविकृतस्तेन न विकृतकुलस्य कन्या ग्राह्या । विकृतकुलं यथा—"रोमशश्चार्शसो ह्रस्वो व्रणश्वित्रिकुष्ठिनः । नेत्रोदररुजो बभ्रुवंशास्त्याज्याः कनीग्रहे ॥ १ ॥" एभ्यः कुलेभ्यो न कन्या ग्राह्या ।

स्ता विकृता यथा—"अधिकाङ्गी च हीनाङ्गी कपिला व्योमदृक् तथा । भीषणा भीषणाह्वा च त्याज्या कन्या विचक्षणैः ॥ १ ॥ देवर्षिग्रहताराभिर्नदीवृक्षादिनामिकाम् । वर्जयेद्रोमशां कन्यां पिङ्गाक्षीं घर्घरस्वराम् ॥ २ ॥" कन्यादाने वरस्य विकृतं कुलं यथा—"हीनक्रूरवधूकं च दरिद्रं व्यसनान्वितम् । कुलं विवर्जयेत्कन्यादानेऽल्पपुत्रकं[1] तथा ॥ १ ॥ मूर्खनिर्धनदूरस्थशूरमोक्षाभिलाषिणाम् । त्रिगुणाधिकवर्षाणामपि देया न कन्यका ॥ २ ॥" ततः अविकृतकुलयोर्द्वयोर्विवाहसंबन्धो योग्यः । विकृतकुलयोर्द्वयोरपि तथा पञ्चशुद्धीर्निरीक्ष्य वधूवरयोः संयोगो विधेयः । ता यथा—"राश्योर्योन्योश्च गणयोर्नाड्योस्तत्र च वर्गयोः । शुद्धिं निरीक्ष्य कर्त्तव्यो वरवध्वोश्च सङ्गमः ॥ १ ॥" तथा च—"कुलं च शीलं च सनाथता च विद्या च वित्तं च वपुर्वयश्च । वरे गुणाः सप्त विलोकनीया अतः परं भाग्यवशा हि कन्या ॥ १ ॥ गर्भाष्टमात्परं पाणिग्रहमर्हति कन्यका । एकादशाब्दीं यावच्च तत ऊर्ध्वं रजस्वला ॥ २ ॥ राकेति कथ्यते सा तु विवाहं शीघ्रमर्हति । वरं प्राप्य चन्द्रबले तुच्छेऽपि हि महोत्सवे ॥ ३ ॥" यत उक्तं—"वर्षमासदिनादीनां शुद्धिं राकाकरग्रहे । नालोकयेच्चन्द्रबलं वरं प्राप्य विवाहयेत्[2] ॥ १ ॥ नरस्याब्दाष्टकादूर्ध्वं विवाहो[3]ऽशीतिमध्यतः । ततो न कल्पते येन स शुक्ररहितो

---

१ 'पुरुषं' इत्यपि क्वचित् । २ 'विधापयेत्' इत्यपि पाठः । ३ अशीतिवर्षवयस्कः पुमान् विवाहं कुर्यादिति नास्य वचनस्य तात्पर्यं, ततः परमेव शुक्ररहितत्वस्य तस्योपदेशात्, किन्तु मध्यत इति कथनात् तत्पर्यन्तमेव शुक्रानुवृत्तिरिति ज्ञात्वैव सत्यवशिष्टे संभोगक्षम आयुषि योग्ये विवाहं कुर्यादित्येतत्तात्पर्यम् । एतदपि शतायुरधिकृत्योक्तं, सम्प्रति तु शुक्ररहितत्वमसुरहितत्वं वा षष्टिसप्ततिवर्षायुष्कस्येति न परोक्षमितिज्ञात्वैव विवाहं कुर्यात् तदवधिश्च तादृशसंयोगाधीनः ।

भवेत् ॥ २ ॥" "ब्राह्मं प्राजापत्यं तथार्षमथ दैवतं च चत्वारि । करपीडनानि धर्म्याणि मातृपितृवचनयोगेन ॥ १ ॥ गान्धर्वं १ आसुरश्चाथ २ राक्षसस्तदनु ३ चैव पैशाचः ४ । एते पापविवाहाश्चत्वारः स्वेच्छया विहिताः ॥ २ ॥" ब्राह्मविवाहविधिः । यथा शुभदिने शुभलग्ने पूर्वोदितगुणं वरं समाकार्य तस्मै स्नातालङ्कृताय अलङ्कृतां कन्यां दद्यात् । मन्त्रो यथा—"ॐ अर्हं सर्वगुणाय, सर्वविद्याय, सर्वसुखाय, सर्वपूजिताय, सर्वशोभनाय सुवस्त्रगन्धमाल्यालङ्कृतां कन्यां ददामि, प्रतिगृह्णीष्व भद्रं भवते अर्हं ॐ ।" इति मन्त्रेण बद्धाञ्चलौ दंपती स्वगृहं गच्छतः । इति धर्म्यो ब्राह्मविवाहः । प्राजापत्यस्तु जगत्प्रसिद्धत्वाद्विस्तरेण कथयिष्यते । आर्षे च विवाहे वनस्थमुनयो गृहस्थाः स्वसुतामन्यृषिपुत्राय गा अनडुहश्च सह दत्वा कन्यां ददति । न तत्रान्यत्किञ्चिदुत्सवादि । एतदीयो वेदमन्त्रो जैनवेदेषु नास्ति जैनानां तदकृत्यत्वात् । दैवतविवाहे तु पिता पुरोहिताय इष्टपूर्तकर्मतः[1] । स्वकन्यां दक्षिणावद् दद्यात् । इति दैवतो धर्म्यविवाहः । अमी चत्वारो धर्म्या विवाहाः—"पित्राद्यप्रामाण्येऽन्योन्यप्रीत्युद्यमश्च गान्धर्वः । पणबन्धेनासुर इति पालादो हठकनीग्रहणात् ॥ १ ॥ सुप्तप्रमत्तकन्याग्रहणात् पैशाचिकः समाख्यातः । चत्वारोऽमी पापा उपयामाः कीर्त्तितास्तज्ज्ञैः ॥ २ ॥" इति पितृमातृगुर्वनुज्ञारहितत्वाच्चत्वारः ...विवाहाः तथा च ब्राह्मार्षदैवता विवाहा दुःषमाकाले कलियुगे न प्रवर्त्तन्ते । पापविवाहानां चतुर्णां वेदोक्तो विधिरपि न अधर्मत्वात् । यत उक्तं—"गोमेधनरमेधाद्या

---

१ 'कर्मान्ते' इत्यपि पाठः ।

यज्ञाः पाणिग्रहत्रयम् । सुताश्च गोत्रजगुरोर्न भवन्ति कलौ युगे ॥ १ ॥" इति वचनात् । संप्रति वर्त्तमानस्य प्राजापत्यविवाहस्य विधिरुच्यते । स यथा—"मूलानुराधारोहिण्यो मघा मृगशिरः करः । रेवतीत्र्युत्तरा स्वातीधिष्ण्येष्वेषु करग्रहः ॥ १ ॥ वेधैकार्गलत्ता पापोपग्रहयुतेषु धिष्ण्येषु । न विवाहः कर्त्तव्यो न युतौ वा क्रान्तिसाम्ये च ॥ १ ॥ न त्रिदिनस्पृशि नावमतिथौ च न क्रूरदग्धरिक्तासु । नामावास्याष्टमीषष्ठिकासु न द्वादशी द्विव्येशे ॥ २ ॥ भद्रायां गण्डान्ते न चर्क्षतिथिवारदुष्टयोगेषु । न व्यतिपाते नो वैधृतौ च नो निन्द्यवेलासु ॥ ३ ॥ रविक्षेत्रगते जीवे जीवक्षेत्रगते रवौ । दीक्षाविवाहप्रमुखान् प्रतिष्ठां च विवर्जयेत् ॥ ४ ॥ चतुर्मास्यामधिमासे तथास्ते गुरुशुक्रयोः । मलमासे जन्ममासे विवाहादि न कारयेत् ॥ ५ ॥ मासान्ते चैव सङ्क्रातौ तद्द्वितीये तथा दिने । ग्रहणादिदिने तस्मिन् दिने सप्ताहके ततः ॥ ६ ॥ न जन्मतिथिवारर्क्षलग्ने-ष्वपि करग्रहः । राशिजन्मेश्वरे चास्तं गते क्रूरहतेऽपि च ॥ ७ ॥ न जन्मराशौ नो जन्मराशिलग्नान्त्यमा-ष्टमे । न लग्नांशाधिपे लग्नं षष्ठाष्टमगते विधौ ॥ ८ ॥ लग्ने स्थिरे द्विस्वभावे सद्गुणे वा चरेऽपि च । उदयास्त-विशुद्धे च नोत्पातादिविदूषिते ॥ ९ ॥ लग्ने ग्रहविनिर्मुक्ते सप्तमे च तथा विधौ । त्रिषडेकादशगते रवौ भौमे शनावपि ॥ १० ॥ राहौ च षट्त्रिके पापग्रहमुक्ते च पञ्चमे । सुतलग्नांबुदशमधर्मसंस्थे बृहस्पतौ ॥ ११ ॥ शुक्रे बुधे तथा संस्थे मूर्त्तिनाथेऽप्यखण्डिते । मूर्त्तिषष्ठाष्टमं त्यक्त्वान्यत्र युक्ते निशाकरे ॥ १२ ॥ क्रूरदृष्टं क्रूरयुक्तं चन्द्रं तत्र विवर्जयेत् । त्याज्यौ क्रूरान्तरस्थौ च लग्नपीयूषरोचिषौ ॥ १३ ॥ इत्यादिगुणसंयुक्ते लग्ने

दोषविवर्जिते। शुभेऽंशके शुभैर्दृष्टे लग्नं पाणिग्रहे शुभम् ॥ १४ ॥" इत्यादि श्रीभद्रबाहुवराहगर्गलल्लपृथुयशःश्रीपतिविरचितविवाहशास्त्रावलोकनात् सम्यग् लग्नं विलोक्य विवाहारंभः—"ततश्च कुलदेशादि गुरुवाक्यैर्विशेषतः। अनुज्ञातं विवाहादि गर्गादिमुनिभिः पुरा ॥ १ ॥ सूर्यः षट्त्रिदशस्थितस्त्रिदशषट्सप्ताद्यगश्चन्द्रमा जीवः सप्तनवद्विपञ्चमगतो वक्रार्कजौ षट्त्रिगौ । सौम्यः षट्द्विचतुर्दशाष्टमगतः सर्वेऽप्युपान्ते शुभाः शुक्रः सप्तमषट्दशर्क्षसहितः शार्दूलवत् त्रासकृत् ॥ २ ॥ सुरगुरुबलमबलानां पुरुषाणामहिमरश्मिबलमेव। चन्द्रबलं दंपत्योरवलम्ब्य विशोधयेल्लग्नम् ॥ २ ॥" तथा च पूर्वं कन्यादानविधिः । पूर्वोदितसमानकुलशीलेभ्योऽन्यगोत्रेभ्यः कन्यां याचयेत्। तादृशाय वराय कन्या दातव्या। कन्याकुलज्येष्ठेन वरकुलज्येष्ठाय नालिकेरक्रमुकजिनोपवीतव्रीहिदूर्वाहरिद्रादानेन स्वस्वदेशकुलोचितेन कन्यादानं कार्यं। तत्र गृह्यगुरुर्वेदमन्त्रं पठेत्। स यथा—"ॐ अर्हं परमसौभाग्याय, परमसुखाय, परमभोगाय, परमधर्माय, परमयशसे, परमसन्तानाय भोगोपभोगान्तरायव्यवच्छेदाय, इमाममुकनाम्नीं कन्याममुकगोत्राममुकनाम्ने वराय अमुकगोत्राय ददाति, प्रतिगृह्णाण अर्हं ॐ।" ततः सर्वेभ्यो लोकेभ्यः कन्यापक्षीयास्ताम्बूलं ददति। तथा च दूरस्थे विवाहकाले वरपितर्यमृते नान्यस्मै सा कन्या देया। उक्तं च यतः—"सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति पण्डिताः। सकृत् प्रदीयते कन्या त्रीण्येतानि सकृत् सकृत् ॥ १ ॥" तथा वरोऽपि तस्यै कन्यायै वस्त्राभरणगन्धप्रसाधनादि सोत्सवं तत्पितृगृहे दद्यात्। कन्यापित्रापि वराय सपरिजनाय भोजनं समहो-

त्सवं वस्त्राङ्गुलीयादि च देयं। तथा च लग्नदिनात् प्राक् मासे वा पक्षे वा वैयग्र्यानुसारेण उभयोः पक्षयोः परिजनं सङ्घय्य सांवत्सरमुत्तमासने निवेश्य तत्करेण विवाहलग्नं शुभभूमौ लेखयेत्। रूप्यस्वर्णमुद्राफलपुष्पदूर्वाभिर्जन्मलग्नवद् विवाहलग्नमर्चयेत्। ततो ज्योतिषिकाय उभयपक्षवृद्धैर्वस्त्रालङ्कारताम्बूलदानं देयं इति विवाहारंभः। ततः कौरशरावेषु यववापनं। ततः कन्यागृहे मातृस्थापनं षष्ठ्याः स्थापनं षष्ठ्यादिप्रक्रमोक्तप्रकारेण। वरगृहे जिनसमयानुसारेण मातृकुलकरस्थापनं। परसमये गणपतिकन्दर्पस्थापनं। गणपतिकन्दर्पस्थापनं सुगमं लोकप्रसिद्धं। कुलकरस्थापनविधिरुच्यते। गृह्यगुरुर्भूमिपतितगोमयलिप्तभूमौ स्वर्णमयं रूप्यमयं ताम्रमयं श्रीपर्णकाष्ठमयं पट्टकं स्थापयेत्। पट्टस्थापनमन्त्रः—"ॐ आधाराय नमः, आधारशक्तये नमः, आसनाय नमः,।" अनेन मन्त्रेणैकवारं परिजप्य पट्टं स्थापयेत्। तं पट्टं अमृतामन्त्रेण तीर्थजलैरभिषिञ्चेत्। ततश्चन्दनाक्षतदूर्वाभिः पट्टं पूजयेत्। तत आदौ—"ॐ नमः प्रथमकुलकराय, काञ्चनवर्णाय, श्यामवर्णचन्द्रयशःप्रियतमासहिताय, हाकारमात्रोच्चारस्थापित[1]न्यायपथाय, विमलवाहनाभिधाय, इह विवाहमहोत्सवादौ आगच्छ २, इह स्थाने तिष्ठ २, सन्निहितो भव २, क्षेमदो भव २, उत्सवदो भव २, आनन्ददो भव २, भोगदो भव २, कीर्त्तिदो भव २, अपत्यसन्तानदो भव २, स्नेहदो भव २, राज्यदो भव २, इदमर्घ्यं पाद्यं बलिं चरुं आचमनीयं गृहाण २, सर्वोपचारान् गृहाण २। तत ॐ गन्धं नमः, ॐ पुष्पं नमः, ॐ धूपं नमः,

१ स्थापित इत्यपि पाठः।

ॐ दीपं नमः, ॐ उपवीतं नमः, ॐ भूषणं नमः, ॐ नैवेद्यं नमः, ॐ तांबूलं नमः । पूर्वेण मन्त्रेण आहूय संस्थाप्य संनिहितां कृत्य अर्घ्यपाद्यबलिचर्वाचमनीयदानं दद्यात् । अपरे ॐकारादिभिर्मन्त्रैर्गन्धतिलकद्वयं पुष्पद्वयं धूपद्वयं दीपद्वयं उपवीतमेकं स्वर्णमुद्राद्वयं नैवेद्यद्वयं तांबूलद्वयं दद्यात् १ ततः द्वितीयस्थाने—"ॐ नमो द्वितीयकुलकराय, श्यामवर्णाय, श्यामवर्णचन्द्रकान्ताप्रियतमासहिताय, हाकारमात्रख्यापितन्यायपथाय, चक्षुष्मदभिधानाय, शेषं पूर्ववत् २ ॐ नमस्तृतीयकुलकराय, श्यामवर्णाय, श्यामवर्णसुरूपाप्रियतमासहिताय, माकारमात्रख्यापितन्यायपथाय, यशस्व्यभिधानाय, शेषं पूर्ववत् ३ ॐ नमश्चतुर्थकुलकराय, श्वेतवर्णाय, श्यामवर्णप्रतिरूपाप्रियतमासहिताय, माकारमात्रख्यापितन्यायपथाय, अभिचन्द्राभिधानाय, शेषं पूर्ववत् ४ ॐ नमः पञ्चमकुलकराय, श्यामवर्णाय, श्यामवर्णचक्षुःकान्ताप्रियतमासहिताय, धिक्कारमात्रख्यापितन्यायपथाय, प्रसेनजिदभिधानाय, शेषं पूर्ववत् ५ ॐ नमः षष्ठकुलकराय, स्वर्णवर्णाय, श्यामवर्णश्रीकान्ताप्रियतमासहिताय, धिक्कारमात्रख्यापितन्यायपथाय, मरुदेवाभिधानाय, शेषं पूर्ववत् ६ ॐ नमः सप्तमकुलकराय, काञ्चनवर्णाय, श्यामवर्णमरुदेवाप्रियतमासहिताय, धिक्कारमात्रख्यापितन्यायपथाय, नाभ्यभिधानाय शेषं पूर्ववत् ७॥ इति कुलकरस्थापनापूजनविधिः । इयं कुलकरस्थापना परसमये गणेशमदनस्थापना च विवाहानन्तरमपि सप्ताहोरात्रपर्यन्तं रक्षणीया । ततः शान्तिकं पौष्टिकं च वरगृहे कुर्यात् । कन्यागृहे मातृपूजां पूर्ववत् । ततः सप्तसु नवसु एकादशसु त्रयोदशसु विवाहकालात्पूर्वदिवसे वधूवरयोः

स्वस्वगृहे मङ्गलगीतवादित्रवादनपूर्वं तैलाभिषेकः स्नानं च विवाहपर्यन्तं नित्यं तथैव वधूवरयोः स्नानं। प्रथमतैलाभिषेकदिने वरगृहात्कन्यागृहे तैलशिरःप्रसाधनगन्धवस्तुद्राक्षादिखाद्यशुष्कफलप्रेषणं सर्वैर्नागरवधूजनैर्वरगृहे कन्यागृहे च तैलधान्यादिढौकनं विधेयं। वधूवरगृहसत्कवृद्धनारीभिः ताभ्यो धान्यतैलढौकनीभ्यो नारीभ्यः अपूपादि पक्वान्नं देयं। तत्र धारणाप्रभृति देशाचारकुलाचारैर्विधेयं। तैलाभिषेककुलकरगणेशादिस्थापनं कङ्कणबन्धनमन्यविवाहोपचारादि सर्वं वधूवरयोश्चन्द्रबले वैवाहिके नक्षत्रे च विधेयं। तथा धूलिभक्तकौरभक्तसौभाग्यजलानयनप्रभृति मङ्गलकर्म मङ्गलगीतवाद्यसहितं देशाचारकुलाचारविशेषाद्विधेयं। ततो यदि वरोऽन्यत्र ग्रामान्तरे नगरान्तरे देशान्तरे वा भवति तदा तस्य यज्ञयात्रा कन्यानिवासस्थानं प्रति विधीयते तस्यायं विधिः। एकस्मिन् प्रथमेऽहनि मातृपूजापूर्वं पूर्वेषां जनानां भोजनं देयं। ततो द्वितीयेऽह्नि वरः सुस्नातश्चन्दनानुलिप्तः सर्ववस्त्रगन्धमाल्यसंस्कृतः[२] किरीटभूषितशिरा अश्वाधिरूढो गजाधिरूढो वा नरयानाधिरूढो वा चलति। तत्समीपे जनाः सुवसनाः सप्रमोदाः सतांबूलवदनाः संबन्धिज्ञातिजनाः स्वसंपत्त्या तुरंगाद्यधिरूढाः पदातयो वा वरेण सार्द्धं चलन्ति। पार्श्वयोरुभयोर्मङ्गलगानप्रसक्ताः चलन्ति ज्ञातिनार्यः। पुरतोऽस्य ब्राह्मणा ग्रहशान्तिमन्त्रं पठन्तश्चलन्ति। स यथा—"ॐ अर्हं आदिमोऽर्हन्, आदिमो नृपः, आदिमो नियन्ता, आदिमो गुरुः, आदिमः स्रष्टा, आदिमः कर्ता, आदिमो भर्त्ता,

१ वरगृहे कन्यागृहे च इति पुस्तकान्तरे। २ 'माल्यालङ्कृतः' इत्यपि।

आदिमो जयी, आदिमो नयी आदिमः शिल्पी, आदिमो विद्वान्, आदिमो जल्पकः, आदिमः शास्ता, आदिमो रौद्रः, आदिमः सौम्यः, आदिमः काम्यः, आदिमः शरण्यः, आदिमो दाता, आदिमो वन्द्यः, आदिमः स्तुत्यः, आदिमो ज्ञेयः, आदिमो ध्येयः, आदिमो भोक्ता, आदिमः सोढा, आदिम एकः, आदिमोऽनेकः, आदिमः स्थूलः, आदिमः कर्मवान्, आदिमोऽकर्मा, आदिमो धर्मवित्, आदिमोऽनुष्ठेयः, आदिमोऽनुष्ठाता, आदिमः सहजः, आदिमो दशावान्, आदिमः सकलत्रः, आदिमो विकलत्रः, आदिमो विवोढा, आदिमः ख्यापकः, आदिमो ज्ञापकः, आदिमो विदुरः, आदिमः कुशलः, आदिमो वैज्ञानिकः, आदिमः सेव्यः, आदिमो गम्यः, आदिमो विमृष्यः, आदिमो विमृष्टा, सुरासुरनरोरगप्रणतः, प्राप्तविमलकेवलो, यो गीयते यत्यवतंसः, सकलप्राणिगणहितो, दयालुरपरापेक्षः, परात्मा, परं ज्योतिः, परं ब्रह्म, परमैश्वर्यभाक्, परंपरः परापरोऽपरंपरः, ज[illegible], सर्वगः, सर्ववित्, सर्वजित्, सर्वीयः, सर्वप्रशस्यः, सर्ववन्द्यः, सर्वपूज्यः, सर्वात्मा असंसारः, अ[illegible]अवार्यवीर्यः, श्रीसंश्रयः, श्रेयःसंश्रयः, विश्वावश्यायहृत्, संशयहृत्, विश्वसारो, निरञ्जनो, निर्ममो, [1]निष्कलङ्को, निष्पाप्मा, निष्पुण्यः, निर्मनाः, निर्वचाः, निर्देहो, निःसंशयो, निराधारो, निरवधिः, प्रमाणं, प्रमेयं, प्रमाता, जीवाजीवाश्रयबन्धसंवरनिर्जरामोक्षप्रकाशकः, स एव भगवान् शान्तिं करोतु, तुष्टिं करोतु, पुष्टिं करोतु, ऋद्धिं करोतु, वृद्धिं करोतु, सुखं करोतु, श्रियं करोतु, लक्ष्मीं करोतु

१ निष्कलत्रः इत्यपि ।

अर्हं ॐ ।" इत्यार्यवेदपाठिनो ब्राह्मणाः पुरतो गच्छन्ति । ततश्च अनेनैव विधिना महोत्सवेन च चैत्यपरिपाटीं गुरुवन्दनं मण्डलीपूजनं पुरदेवतादिपूजनं विधाय पुरोपान्ते तिष्ठेत् । ततः पथि गच्छेत् । तथा अनयैव रीत्या कन्याधिष्ठितपुरप्रवेशोऽपि विधेयः । तत्रैव पुरे विवाहाय चलतो वरस्याप्ययमेव विधिः । तथा नित्यस्नानानन्तरं वधूवरयोः कौसुंभसूत्रेण शरीरमानं । ततः समागते विवाहदिने विवाहलग्नाद्र्वाक् तत्पुरवासी वा अन्यदेशागतो वा वरः तेऽन्ध पूर्वोक्तेन विधिना पाणिग्रहणाय चलेत् । तद्भगिन्यो विशेषेण लवणाद्युत्तारणं कुर्वन्ति । ततो वरस्याडंबरध्वजस्थगुरुसहितः रथ्यागृहद्वारि गच्छेत् । तत्र तिष्ठतस्तस्य श्वश्रूजनः कर्पूरदीपादिभिरारात्रिकं कुर्यात् । ततोऽन्या शरावसंपुटं ज्वलदङ्गारलवणगर्भं त्रडत्रडिति शब्दायमानं वरस्य निरुञ्छनं विधाय वरप्रवेशवाममार्गे स्थापयेत् । ततोऽन्या मन्थानं कौसुंभवस्त्रालङ्कृतं समानीय त्रिवेलं तेन वरललाटं स्पृशेत् । ततो वरो वाहनादुत्तीर्य वामपादेन तदग्निलवणगर्भं शरावसंपुटं खण्डयेत् । ततो वरश्वश्रूः कन्यामातुलपत्नी वा कन्यामातुलो वा कौसुंभवस्त्रं वरकंठे निक्षिप्याकृष्यमाणं मातृगृहं नयेत् । तत्र पूर्वमासने निविष्टाया विभूषितायाः कृतकौतुकमङ्गलायाः कन्याया वामपार्श्वे मातृदेव्यभिमुखं वरं निवेशयेत् । ततो गृह्यगुरुर्लग्नवेलायां शुभांशके चन्दनद्रव्यसंपिष्टशमीत्वक्पिप्पलत्वक्मिश्रितलिप्तौ वधूवरयोर्दक्षिणहस्तौ योजयेत् । उपरि कौसुंभसूत्रेण बध्नीयात् । हस्तबन्धनमन्त्रः—"ॐ अर्हं आत्मासि, जीवोऽसि, समकालोऽसि, समचित्तोऽसि, समकर्मासि, समाश्रयोऽसि, समदेहोऽसि, समक्रियोऽसि, समस्नेहोऽसि, समचे-

ष्ठितोऽसि, समाभिलाषोऽसि, समेच्छोऽसि, समप्रमोदोऽसि, समविषादोऽसि, समावस्थोऽसि, समनिमि-त्तोऽसि, समवचा असि, समक्षुत्तृष्णोऽसि, समगमोऽसि, समागमोऽसि, समविहारोऽसि, समविषयोऽसि, समशब्दोऽसि, समरूपोऽसि, समरसोऽसि, समगन्धोऽसि, समस्पर्शोऽसि, समेन्द्रियोऽसि, समाश्रवोऽसि, समबन्धोऽसि, समसंवरोऽसि, समनिर्जरोऽसि, सममोक्षोऽसि, तदेह्येकत्वमिदानीं अर्हं ॐ।" इति हस्तब-न्धनमन्त्रः। अत्र समयान्तरे देशान्तरे कुलान्तरे लग्नसाधनवेलायां मधुपर्कप्राशनं वराय गोयुग्मदानं क-न्याया आभरणपरिधापनं इत्यादि कुर्वन्ति। ततः वधूवरयोः मातृगृहोपविष्टयोः सतोः कन्यापक्षीया वेदिर-चनां कुर्वन्ति। तस्या विधिरयं—कैश्चित् काष्ठस्तंभैः काष्ठाच्छादनैः मण्डपान्तश्चतुष्कोणा वेदी क्रियते। कै-श्चिच्च यथोपरि लघुलघुभिश्चतुष्कोणनिहितैरुपर्युपरिधृतैः स्वर्णरूप्यताम्रमृत्कलशैः सप्त सप्त सङ्ख्यैः चतुःपार्श्व-चतुश्चतुरार्द्रवंशबद्धैर्वेदी क्रियते। चतुर्ष्वपि द्वारेषु वस्त्रमयानि काष्ठमयानि वा तोरणानि वन्दनमालिकाश्च। अन्तस्त्रिकोणमग्निकुण्डं। ततो गृह्यगुरुः पूर्वोक्तवेषधारी वेदीप्रतिष्ठां कुर्यात्। तस्याश्चायं विधिः—वासपुष्पा-क्षतपरिपूर्णहस्तः, "ॐ नमः क्षेत्रदेवतायै शिवायै क्षाँ क्षीँ क्षूँ क्षौँ क्षः इह विवाहमण्डपे आगच्छ २, इह बलिपरिभोग्यं गृह्ण[1] २ भोगं देहि, सुखं देहि, यशो देहि, सन्ततिं देहि, ऋद्धिं देहि, वृद्धिं देहि, सर्वसमी-हितं देहि देहि स्वाहा।" इति पठित्वा चतुर्ष्वपि कोणेषु प्रत्येकं वासमाल्याक्षतक्षेपः। तोरणस्य प्रतिष्ठा

१ गृहाणेत्यर्थः।

चैवं । तन्मन्त्रो यथा—"ॐ ह्रीँ श्रीँ नमो द्वारश्रिये सर्वपूजिते सर्वमानिते सर्वप्रधाने इह तोरणस्था सर्वं समीहितं देहि २ स्वाहा ।" इति तोरणप्रतिष्ठा । ततोऽग्निकुण्डे वेदिमध्याग्नेयकोणेऽग्निं न्यसेत् मन्त्रपूर्वं । अग्निन्यासमन्त्रो यथा—"ॐ रं रं रीं रौं रः नमोऽग्नये, नमो बृहद्भानवे, नमोऽनन्ततेजसे, नमोऽनन्तवीर्याय, नमोऽनन्तगुणाय, नमो हिरण्यरेतसे, नमः छागवाहनाय, नमो हव्याशनाय, अत्र कुण्डे आगच्छ २, अवतर २, उत्तिष्ठ २, स्वाहा ।" समयान्तरे देशान्तरे कुलान्तरे च हस्तलेपनं वेद्यन्तरेव कुर्वन्ति । देशकुलाचारादौ मधुपर्कप्राशनानन्तरं वेदिहस्तलेपात् प्रथमं परस्परं कम्बायुद्धकण्ठायुधवधूवरास्फालनवेडानयनमणिग्रथनस्नानप्राष्ट्रकर्मपर्याणकर्मवस्त्रकौसुंभसूत्राकर्षणप्रभृतिकर्माणि कुर्वन्ति । तानि च देशविशेषाल्लोकेभ्यो विज्ञेयानि न व्यवहारशास्त्रेषूक्तानि । परं स्त्रीभिः सौभाग्यप्राप्तये सपत्न्याद्यभावाय वरवशीकरणाय च क्रियन्ते । ततो वधूवरौ युक्तहस्तावेव नारीनरकट्यारूढौ गीतवाद्यादिडंबरे महति दक्षिणद्वारेण प्रवेश्य वेदिमध्यमानयेत् । ततो देशकुलाचारेण काष्ठासनयोर्वेत्रासनयोः सिंहासनयोः अधोमुखीकृत्य शरमयस्वार्योर्वा वधूवरौ पूर्वाभिमुखावुपवेशयेत् । तथा हस्तलेपे वेदिकर्मणि च कुलाचारानुसारेण सदशकौरवस्त्राणि वा कौसुंभवस्त्राणि वा स्वभाववस्त्राणि वधूवरयोः परिधाप्यन्ते । ततो गृह्यगुरुरुत्तराभिमुखः मृगाजिनासीनो वह्निं शमीपिप्पलकपित्थकुटजबिल्वामलकसमिद्भिः प्रबोध्य अनेन मन्त्रेण घृतमधुतिलयवनानाफलानि जुहुयात् । मन्त्रो यथा—"ॐ अर्हं ॐ अग्ने प्रसन्नः सावधानो भव, तवायमवसरः, तदाकारयेन्द्रं

यमं नैर्ऋतिं वरुणं वायुं कुबेरमीशानं नागान् ब्रह्माणं लोकपालान्, ग्रहांश्च सूर्यशशिकुजसौम्यबृहस्प-
तिकविशनिराहुकेतून‌सुरांश्चासुरनागसुपर्णविद्युदग्निद्वीपोदधिदिक्कुमारान् भवनपतीन् पिशाचभूतयक्ष-
राक्षसकिन्नरकिंपुरुषमहोरगगन्धर्वान् व्यन्तरान् चन्द्रार्कग्रहनक्षत्रतारकान् ज्योतिष्कान् सौधर्मेशानश्री-
वत्साखंडलपद्मोत्तरब्रह्मोत्तरसनत्कुमारमाहेन्द्रब्रह्मलान्तकशुक्रसहस्रारानतप्राणतारणाच्युतग्रैवेयकानुत्तरभ-
वान् वैमानिकान् इन्द्र सामानिकान् पार्षद्यत्रयस्त्रिंशल्लोकपालानीकप्रकीर्णकलोकान्तिकाभियोगिकभेदभि-
न्नांश्चतुर्णिकायानपि सभार्यान् साधुधवलवाहनान् स्वस्वोपलक्षितचिह्नान्, अप्सरसश्च परिगृहीतापरिगृ-
हीताभेदभिन्नाः ससखीकाः सदासीकाः साभरणा रुचकवासिनीर्दिक्कुमारिकाश्च सर्वाः, समुद्रनदीगिर्या-
करवनदेवतास्तदेतान् सर्वांश्च, इदं अर्घ्यं पाद्यमाचमनीयं बलिं चरुं हुतं न्यस्तं ग्राहय २, स्वयं गृहाण २,
स्वाहा अर्हं ॐ।" ततः सुष्ठुहुतप्रहुतप्रदीप्तेऽग्नौ सति गृह्यगुरुस्तत उत्थाय वरस्य दक्षिणपार्श्वे स्थिताया
वध्वाः पुरः सम्मुखीन उपविश्य इति वदेत्—"ॐ अर्हं इदमासनमध्यासीनौ स्वध्यासीनौ स्थितौ सुस्थितौ
तदस्तु वां सनातनः सङ्गमः अर्हं ॐ।" इत्युक्त्वा कुशाग्रेण तीर्थोदकैस्तावभिषिञ्चेत्। ततो वध्वाः पितामहः
पिता वा पितृव्यो वा भ्राता वा मातामहो वा मातुलो वा कुलज्येष्ठो वा कृतधर्मानुष्ठानोचितवेषो वधूवरयोः
पुर उपविशेत्। ततः शान्तिकपौष्टिकाभ्यामारभ्य विवाहमासपर्यन्तं मङ्गलगानवादित्रवादिनां भोजनतांबू-
लवस्त्रसामग्री सदैव गवेष्यते। ततो गृह्यगुरुः "ॐ नमोऽर्हत्सिद्धाचार्योपाध्यायसर्वसाधुभ्यः" इत्युक्त्वा दूर्वा-

क्षतपूर्णकरो वधूवरयोः गुरुर् इति वक्ति—“विदितं वां गोत्रं संबन्धकरणेनैव ततः प्रकाश्यतां जनाग्रतः।” ततः पूर्वं वरपक्षीयाः[1] स्वगोत्रप्रवरज्ञात्यन्वयप्रकाशनं कुर्वते। ततश्च ते पुनः वरस्य मातृपक्षीया गोत्रप्रवरज्ञात्यन्वयान् प्रकाशयन्ति ततः कन्यापक्षीयाः स्वगोत्रप्रवरज्ञात्यन्वयान् प्रकाशयन्ति। ते पुनः कन्याया मातृपक्षीया गोत्रप्रवरज्ञात्यन्वयादि प्रकाशयन्ति। ततो गृह्यगुरुः—“ॐ अर्हं अमुकोऽमुकगोत्रीयः, इयत्प्रवरः, अमुकज्ञातीयः, अमुकान्वयः, अमुकप्रपौत्रः, अमुकपौत्रः, अमुकपुत्रः, अमुकगोत्रीयः, इयत्प्रवरः, अमुकज्ञातीयः, अमुकान्वयः, अमुकप्रदौहित्रः, अमुकगोत्रीयः, इयत्प्रवरः अमुकज्ञातीयः, अमुकान्वयः, अमुकदौहित्रः, अमुकगोत्रीया, इयत्प्रवरा, अमुकज्ञातीया, अमुकान्वया, अमुकप्रपौत्री, अमुकपौत्री, अमुकपुत्री, अमुकगोत्रीया, इयत्प्रवरा, अमुकज्ञातीया, अमुकान्वया, अमुकप्रदौहित्री, अमुकगोत्रीया, इयत्प्रवरा, अमुकज्ञातीया, अमुकान्वया, अमुकदौहित्री, अमुकावर्या, तदेतयोर्वर्यावरयोर्वरवर्ययोर्निबिडो विवाहसंबन्धोऽस्तु, शान्तिरस्तु, पुष्टिरस्तु, तुष्टिरस्तु धृतिरस्तु, बुद्धिरस्तु, धनसन्तानवृद्धिरस्तु अर्हं ॐ।”, ततो गृह्यगुरुर्वरवधूसकाशात् गन्धपुष्पधूपनैवेद्यैर्वैश्वानरपूजां कारयेत्। ततो वधूर्लाजाञ्जलिं वह्नौ निक्षिपेत्। ततः पुनस्तथैव दक्षिणे वधूः वामे वर उपविशेत्। ततो गृह्यगुरुर्वेदमन्त्रं पठेत्—“ॐ अर्हं अनादि विश्वमनादिरात्मा, अनादिः कालोऽ-

१ अनेनोपदेशेन वरकन्याभ्यामुभाभ्यामेवोभयवंशशुद्धाभ्यां भाव्यमित्युपपाद्यते एतेनानादृतगोत्रप्रवरज्ञातिव्यवहारा वर्णसंकरसंकीर्णतादिप्रचारतत्परा गोत्रादिनिरपेक्षो विवाह इतिवादिनो नवीनाः परास्ताः.

नादि कर्म, अनादिः संबन्धो देहिनां देहानुगतानुगतानां क्रोधाहङ्कारच्छद्मलोभैः संज्वलनप्रत्याख्यानवरणानन्तानुबन्धिभिः शब्दरूपरसगन्धस्पर्शैरिच्छानिच्छापरिसङ्कलितैः संबन्धोऽनुबन्धः प्रतिबन्धः संयोगः सुगमः सुकृतः सुनिवृत्तः सुतुष्टः सुपुष्टः सुप्राप्तः सुलब्धो द्रव्यभावविशेषेण अर्हं ॐ" इति मन्त्रं पठित्वा पुनरिति कथयेत्। "तदस्तु वां सिद्धप्रत्यक्षं, केवलिप्रत्यक्षं, चतुर्निकायदेवप्रत्यक्षं, विवाहप्रधानाग्निप्रत्यक्षं, नामप्रत्यक्षं, नरनारीप्रत्यक्षं, नृपप्रत्यक्षं, जनप्रत्यक्षं, गुरुप्रत्यक्षं, मातृप्रत्यक्षं, पितृप्रत्यक्षं, मातृपक्षप्रत्यक्षं, पितृपक्षप्रत्यक्षं, ज्ञातिस्वजनबन्धुप्रत्यक्षं, संबन्धः सुकृतः, सदनुष्ठितः सुप्राप्तः सुसङ्गतः तत् प्रदक्षिणीक्रियतां तेजोराशिर्विभावसुः।" इति कथयित्वा तथैव ग्रथिताञ्चलौ वधूवरौ वैश्वानरं प्रदक्षिणीकुरुतः। तथा प्रदक्षिणीकृत्य तथैव पूर्वरीत्योपविशतो लाजात्रयस्य प्रदक्षिणात्रये पुरतो वधूः पश्चाद्वरः दक्षिणे वध्वासनं वामे वरासनं इति प्रथमलाजाकर्म। तत आसनोपविष्टयोस्तयोर्गुरुर्वेदमन्त्रं पठेत्। "ॐ अर्हं कर्मास्ति, मोहनीयमस्ति, दीर्घस्थितिरस्ति, निबिडमस्ति, दुश्छेद्यमस्ति, अष्टाविंशतिप्रकृतिरस्ति, क्रोधोऽस्ति, मानोऽस्ति, मायास्ति, लोभोऽस्ति, संज्वलनोऽस्ति, प्रत्याख्यानावरणोऽस्ति, अप्रत्याख्यानावरणोऽस्ति, अनन्तानुबन्ध्यस्ति, चतुश्चतुर्विधोऽस्ति, हास्यमस्ति, रतिरस्ति, अरतिरस्ति, भयमस्ति, जुगुप्सास्ति, शोकोऽस्ति, पुंवेदोऽस्ति, स्त्रीवेदोऽस्ति, नपुंसकवेदोऽस्ति, मिथ्यात्वमस्ति, मिश्रमस्ति, सम्यक्त्वमस्ति, सप्ततिकोटाकोटिसागरस्थितिरस्ति, अर्हं ॐ।" इति वेदमन्त्रं पठित्वा पुनरिति कथयेत्—"तदस्तु वां निकाचितनिबिडबद्धमोहनीयकर्मोदयकृतः स्नेहः सुकृ-

तोऽस्तु, सुनिष्ठितोऽस्तु, सुसंबद्धोऽस्तु, आभवमक्षयोऽस्तु तत्प्रदक्षिणीक्रियतां विभावसुः ।” पुनरपि तथैव वह्निं प्रदक्षिणीकुर्यात् । इति द्वितीयलाजाकर्म । चतसृष्वपि लाजासु प्रदक्षिणाप्रारंभे वधूर्वरौ लाजामुष्टिं क्षिपेत् । ततस्तयोस्तथैवोपविष्टयोर्गुरुरिति वेदमन्त्रं पठेत्—“ॐ अर्हं कर्मास्ति, वेदनीयमस्ति, सातमस्ति, असातमस्ति, सुवेद्यं सातं दुर्वेद्यमसातं, सुवर्गणाश्रवणं सातं दुर्वर्गणाश्रवणमसातं, शुभपुद्गलदर्शनं सातं दुष्पुद्गलदर्शनमसातं, शुभषड्साखादनं सातं अशुभषड्साखादनमसातं, शुभगन्धाघ्राणं सातं अशुभगन्धाघ्राणमसातं, शुभपुद्गलस्पर्शः सातं अशुभपुद्गलस्पर्शोऽसातं, सर्वं सुखकृत्सातं सर्वं दुःखकृदसातं, अर्हं ॐ ।” इति वेदमन्त्रं पठित्वा इति कथयेत्—“तदस्तु वां सातवेदनीयं माभूदसातवेदनीयं तत्प्रदक्षिणीक्रियतां विभावसुः ।” इति वैश्वानरं प्रदक्षिणीकृत्य वधूवरौ तथैवोपविशतः इति तृतीयलाजाकर्म । ततो गृह्यगुरुरिति वेदमन्त्रं पठेत्—“ॐ अर्हं सहजोऽस्ति, स्वभावोऽस्ति, संबन्धोऽस्ति, प्रतिबद्धोऽस्ति, मोहनीयमस्ति, वेदनीयमस्ति, नामास्ति, गोत्रमस्ति, आयुरस्ति, हेतुरस्ति, आश्रवबद्धमस्ति, क्रियाबद्धमस्ति, कायबद्धमस्ति, तदस्ति सांसारिकः संबन्धः अर्हं ॐ ।” इति वेदमन्त्रं पठित्वा कन्यायाः पितुः पितृव्यस्य भ्रातुः कुलज्येष्ठस्य वा हस्तं तिलयवकुशदूर्वागर्भेण जलेन पूरयित्वा इति वदेत्, “अद्यामुकसंवत्सरे अमुकायने अमुकर्त्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवारे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकमुहूर्त्ते पूर्वकर्मसंबन्धानुबद्धां वस्त्रगन्धमाल्यालङ्कृतां सुवर्णरूप्यमणिभूषणभूषितां ददात्ययं, प्रतिगृह्णीष्व” इति कथयित्वा वधूवरयोर्युक्त-

हस्तान्तराले इति जलं निक्षेपयेत्। वरः कथयति—"प्रतिगृह्णामि प्रतिगृहीता।" गुरुः कथयति, "सुप्रतिगृहीतास्तु, शान्तिरस्तु, पुष्टिरस्तु, ऋद्धिरस्तु, वृद्धिरस्तु, धनसन्तानवृद्धिरस्तु, ततः पूर्वे लाजात्रये वरहस्तोपरिस्थं कन्याहस्तं अधः कुर्यात्। वरहस्तं चोपरि कुर्यात्। ततो वरवध्वावासनादुत्थाप्य वरं पुरः कुर्यात् वधूं च पश्चात्। ततो लाजमुष्टिं वह्नौ निक्षिप्य गृह्यगुरुरिति कथयेत्—"प्रदक्षिणीक्रियतां विभावसुः।" वरवध्वोर्हुताशं प्रदक्षिणीकुर्वतोः कन्यापिता यावत्कुलज्येष्ठो वा सर्वं वरवध्वोर्देयं वस्तु वस्त्राभरणस्वर्णरूप्यताम्रकांस्यभूमिनिष्क्रयकरितुरगदासीगोवृषपल्यङ्कतूलिकोच्छीर्षकदीपशं[1]स्त्रपाकभाण्डप्रभृति सर्वं वेद्यन्तः समाहरेत्। अन्येऽपि तदीया बन्धुसंबन्धिसुहृदादयः स्वसंपदानुसारेण तत्पूर्वोक्तं वस्तु वेद्यन्तरानयन्ति। ततः प्रदक्षिणान्ते वरवध्वौ तथैवासने उपविशतः। नवरं चतुर्थलाजानन्तरं वरस्यासनं दक्षिणे वध्वा आसनं वामे। ततो गृह्यगुरुः कुशदूर्वाक्षतवासपूर्णकरः इति कथयेत्—"येनानुष्ठानेनाद्योऽर्हन् शक्रादिदेवकोटिपरिवृतो भोग्यफलकर्म भोगाय संसारिजीवव्यवहारमार्गसंदर्शनाय सुनन्दासुमङ्गले पर्यणैषीत्, ज्ञातमज्ञातं वा तदनुष्ठानमनुष्ठितमस्तु।" इत्युक्त्वा वासदूर्वाक्षतकुशान् वरवधूमस्तके क्षिपेत्। ततो गृह्यगुरुणादिष्टो वधूपिता जलं यवतिलकुशान् करे गृहीत्वा वरकरे दत्वा इति वदेत्, "सुदायं ददामि प्रतिगृहाण।" वरः कथयति, "प्रतिगृह्णामि प्रतिगृहीतं परिगृहीतं।" गुरुः कथयति, "सुगृहीतमस्तु सुपरिगृहीतमस्तु। पुनस्तथैव वस्त्र-

---

१ इदं पुस्तकादीनामुपलक्षणम् व्यवस्था शक्त्या जात्या वा कार्या। क्षत्रियस्य शस्त्रं प्रधानमन्येषामप्यावश्यकम्.

भूषणहस्त्यादिदायदानेषु वधूपितुर्वरस्य इदमेव वाक्यं अयमेव विधिः । ततः सर्ववस्तुषु दत्तेषु गुरुरिति कथयेत्, "वधूवरौ वां पूर्वकर्मानुसंबन्धेन निबिडेन निकाचितबद्धेन अनुपवर्त्तनीयेन अघातनीयेन अनुपायेन अश्लथेन अवश्यभोग्येन विवाहः प्रतिबद्धो बभूव, तदस्त्वखण्डितोऽक्षयोऽव्ययो निरपायो निर्व्याबाधः सुखदोऽस्तु, शान्तिरस्तु, पुष्टिरस्तु, ऋद्धिरस्तु, वृद्धिरस्तु, धनसन्तानवृद्धिरस्तु ।" इत्युक्त्वा तीर्थोदकैः कुशाग्रेणाभिषिञ्चेत् । पुनर्गुरुस्तथैव वधूवरावुत्थाप्य मातृगृहं नयेत् । तत्र नीत्वा वधूवरयोरिति वदेत्, "अनुष्ठितो वां विवाहो वत्सौ! सस्नेहौ, सभोगौ, सायुषौ, सधर्मौ, समदुःखसुखौ, समशत्रुमित्रौ, समगुणदोषौ, समवाङ्मनःकायौ, समाचारौ, समगुणौ भवतां ।" ततः कन्यापिता करमोचनाय गुरुं प्रति वदति । गुरुरिति वेदमन्त्रं पठेत्, "ॐ अर्हं जीव त्वं कर्मणा बद्धः, ज्ञानावरणेन बद्धः, दर्शनावरणेन बद्धः, वेदनीयेन बद्धः, मोहनीयेन बद्धः, आयुषा बद्धो, नाम्ना बद्धो, गोत्रेण बद्धः, अन्तरायेण बद्धः, प्रकृत्या बद्धः, स्थित्या बद्धः, रसेन बद्धः, प्रदेशेन बद्धः, तदस्तु ते मोक्षो गुणस्थानारोहक्रमेण अर्हं ॐ ।" इति वेदमन्त्रं पठित्वा पुनरिति वदेत्, "मुक्तयोः करयोरस्तु वां स्नेहसंबन्धोऽखण्डितः ।" इत्युक्त्वा करौ मोचयेत् । कन्यापिता करमोचनपर्वणि जामात्रा प्रार्थितं स्वसंपत्त्यनुसारि वा बहु वस्तु दद्यात् । तद्दानविधिः, पूर्वयुक्तयैव ततः पुनर्मातृगृहादुत्थाय पुनर्वेदिगृहमागच्छतः । ततो गृह्यगुरुरासनोपविष्टयोस्तयोरिति वदेत्—"पूर्वं युगादिभगवान् विधिनैव येन विश्वस्य कार्यकृतये किल पर्यणैषीत् । भार्याद्वयं तदमुना विधिनास्तु युग्ममेतत्सुकामपरिभोगफ-

लानुबन्धि ॥ १ ॥” इत्युक्त्वा पूर्वोक्तविधिनाञ्चलमोचनं कृत्वा, “वत्सौ ! लब्धविषयौ भवतां” इति गुर्वनुज्ञातौ दंपती विविधविलासिनीगणवेष्टितौ शृङ्गारगृहं प्रविशतः। तत्र पूर्वस्थापितमदनस्य कुलवृद्धानुसारेण मदनपूजनं कुरुतः। ततः वधूवरयोः सममेव क्षीरान्नभोजनं ततो यथायुक्त्या सुरतप्रचारः। ततस्तथैवागमनरीत्या सोत्सवं स्वगृहं व्रजतः। ततो वरस्य मातापितरौ वधूवरयोः निरुञ्छनमङ्गलविधिं स्वदेशकुलाचारेण कुरुतः। कङ्कणबन्धनकङ्कणमोचनद्यूतक्रीडावेणीग्रन्थनादिकर्माणि सर्वाण्यपि तद्देशकुलाचारेण कर्त्तव्यानि। विवाहात्पूर्वं वधूवरपक्षद्वयेऽपि भोजनदानं। तदनन्तरं धूलिभक्तजन्यभक्तप्रभृति देशकुलाद्याचारेण। ततः सप्ताहानन्तरं वरवधूविसर्जनं। तस्य चायं विधिः, सप्ताहं विविधभक्त्या पूजितस्य जामातुः पूर्वोक्तरीत्या अञ्चलग्रन्थनं विधाय अनेकवस्तुदानपूर्वं तेनैवाडंबरेण स्वगृहप्रापणं कुर्यात्। ततः सप्तरात्रिकमासिकषाण्मासिकवार्षिकमहोत्सवकरणं स्वकुलसंपत्तिदेशाचारानुसारेण विधेयं। सप्तरात्रानन्तरं मासानन्तरं वा कुलाचारानुसारेण कन्यापक्षे मातृविसर्जनं पूर्वोक्तरीत्या करणीयं। गणपतिमदनादिविसर्जनविधिर्लोकप्रसिद्धः। वरपक्षे कुलकरविसर्जनविधिस्तु कथ्यते। कुलकरस्थापनानन्तरं नित्यं कुलकरपूजा विधेया। विसर्जनकाले कुलकरान् संपूज्य गृह्यगुरुः पूर्ववत्, “ॐ अमुककुलकराय” इत्यादि पूर्ववत्संपूर्णं मन्त्रं पठित्वा, “पुनरागमनाय स्वाहा” इति सर्वानपि कुलकरान् विसर्जयेत्, “ॐ आज्ञाहीनं क्रियाहीनं मन्त्रहीनं च यत्कृतम्। तत्सर्वं कृपया देव क्षमस्व परमेश्वर ॥ १ ॥” इति कुलकरविसर्जनविधिः। ततो मण्डलीपूजा गुरुपूजा वासक्षेपादि पूर्व-

वत्। साधुभ्यो वस्त्रपात्रदानं । ज्ञानपूजा विप्रेभ्योऽपरमार्गणेभ्यो यथासंपत्ति दानं । तथा च देशकुलसमयान्तरे विवाहलग्ने प्राप्ते वरे श्वशुरगृहं प्रविष्टे षडाचारकरणं । पूर्वमङ्गणे आसनदानं, श्वशुरः कथयति, "विष्टरं प्रतिगृहाण ।" वरः कथयति, "ॐ प्रतिगृह्णामि" इत्यासने उपविशति । ततः श्वशुरो वरस्य पादौ प्रक्षालयेत्। ततोऽर्घदानं दधिचन्दनाक्षतदूर्वाकुशपुष्पश्वेतसर्षपजलैः श्वसुरो जामात्रे अर्घं ददाति। तथाचमनदानं। ततो गन्धाक्षतपूजातिलककरणं ततो मधुपर्कप्राशनं इति विष्टरपाद्यार्घ्याचमनीयगन्धमधुपर्कैः षडाचाराः। ततो गृहान्तः वधूवरयोः परस्परं दृष्टिसंयोगः परस्परं द्वयोर्नामग्रहणं शेषं पूर्ववत्—"इति देशकुलाचारैर्विवाहस्य विधिः परः। विधेयश्च स्वसंपत्तिबन्धपक्षानुसारतः ॥ १ ॥ मूलशास्त्रं समालोक्य विधिरेष प्रदर्शितः। स्वदेशकुलजाचारः परो ज्ञेयो महात्मभिः ॥ २ ॥ वरकार्यं रात्रिमातृकुलदेव्यादिपूजनम् । स्वस्ववंशानुसारेण विधेयं स्याद्यथाविधि ॥ ३ ॥ वेद्यानयनकर्मापि तथा मण्डपबन्धनम् । कुलवृद्धादिवचनैर्विधेयं विधिवेदिभिः ॥ ४ ॥ कार्यः कङ्कणबन्धस्तु विवाहादौ कुलोचितः । विवाहान्ते तस्य मोक्षः कार्यो वृद्धगिरा परम् ॥ ५ ॥ ऊर्णामयं सूत्रमयं कौशेयमयमित्यपि। परे मुञ्जमयं प्राहुः कङ्कणं कुलयुक्तितः॥ ६ ॥ केचिन्मातृगृहे प्राहुर्दपत्योः करबन्धनम्। मधुपर्काशनात्पश्चात्परे वेद्यासनस्थयोः॥ ७॥ अग्निप्रदक्षिणाकाले शिलालोष्ट्वोः पदेन च। वध्वाः स्पर्शनमित्याहुः परे नैवच किञ्चन ॥ ८ ॥ क्वचिद् देशान्तरे चैव वरकन्यासमागमे । विवाहमाहुः कुत्रापि तयोरञ्चलकर्षणात् ॥ ९ ॥ देशाचारे विवाहान्तरुपहासं च गानतः। मिथः कुर्वन्ति महिला ज्ञेयो

देशकुलादितः ॥ १० ॥ पितृमातृगिरा यस्तु सङ्गमो वरकन्ययोः । ज्ञेयो विवाहधर्मः स विधिना येन केनचित् ॥ ११ ॥ बहुनाडंबरेणापि बहुद्रव्यव्ययेन च । ज्ञेयः पापविवाहः स पितृमातृवचोविना ॥ १२ ॥ अत्रान्तः कथितो यस्तु स वेदोक्तो विधिः परः । देशान्वयव्यवहाराद्न्यः कार्यः पृथग्विधः ॥ १३ ॥" नलिखषउ वेश्यायाः सर्वकामुककाम्याया विवाहविधिरुच्यते । स चायं । पूर्वोक्ते विवाहलग्ने शुद्धे कुमारिकां भाविनीं वेश्यां स्नातविलिप्तालङ्कृतां कृतकौतुकमाङ्गल्यां वेश्याजनपरिवृतां समीपस्थबहुगीतवादित्रां गृह्यगुरुर्मदनप्रासादे स्थापितमदनसमीपे वा समानयेत् । ततस्तस्या द्वावपि हस्तौ कौसुंभसूत्रेण प्रतिमामदनहस्ताभ्यां सह बध्नीयात् । ततः पञ्चबाणमन्त्रेण अष्टोत्तरशतपठितेन कुशाग्रोद्धृतेन गन्धोदकेन तामभिषिञ्चेत् । ततो गृह्यगुरुर्वेदमन्त्रं पठन् तत्प्रतिमायाः तां त्रिः प्रदक्षिणयेत् । मन्त्रो यथा—"ॐ अर्हं कामोऽसि, अभिलाषोऽसि, चित्तजन्मासि, सङ्कल्पजन्मासि, काम्योऽसि, सेव्योऽसि, प्रियोऽसि, मान्योऽसि, शब्दोऽसि, रूपोऽसि, रसोऽसि, गन्धोऽसि, स्पर्शोऽसि, सर्वगोऽसि, सर्वव्यापकोऽसि, सर्वार्थोऽसि, आनन्ददोऽसि, ऊष्मोऽसि, मदनोऽसि, मथनोऽसि, उन्मादनोऽसि, मोहनोऽसि, तापनोऽसि, शोषणोऽसि, मारणोऽसि, विकृति-

---

१ इति ग्रन्थेन सूत्रसम्मतेन पित्रादिनिरपेक्षो वरवधूप्रीतिमात्रपर्याप्तेतिकर्तव्यो विवाहो धर्म्य इति वादिनः परास्ताः । २ ईदृशः प्रयोगः पुनः पुनरायातीति न परिवृत्यते.

रसि, अजेयोऽसि, दुर्जयोऽसि, प्रभुरसि, नमस्ते अर्हं ॐ ॥" इति मन्त्रं पठित्वा त्रिःप्रदक्षिणानन्तरं इति वदेत्—"नमोऽस्तु ते भगवन् गृहाण परभागममुष्याः, वत्से ! त्वमस्यैव पाणिगृहीती यत्र यत्रास्य भगवतो हृदये निवासस्तत्र काम्यापूरणं विधेयं" इत्युक्त्वा तां मदनसमीपे रजनीमेकां स्थापयेत् । ततः स्वेच्छया चरतु इति वेश्याया विवाहः । इतरातांई—"तैलाभिषेको वैवाहवस्तु प्रारंभ एव च । वैवाहिकेषु धिष्ण्येषु करणीयो महात्मभिः ॥ १ ॥ वाद्यं नार्यः कुलवृद्धा द्वयोः स्वजनसंमतिः । मण्डपो मातृपूजां च तथा कुलकरार्चनम् ॥ २ ॥ वेदिस्तोरणमर्घ्यादि वस्तु शान्तिकपौष्टिकैः । बहुभोजनसामग्री कौसुंभे सूत्रवाससी ॥ ३ ॥ आरूढकद्धिवृद्धी च यवादिवपनं तथा । गुरोर्वस्त्रं भूषणं च वरे देयं गवादि च ॥ ४ ॥ पाकभोजनपात्राणि दानशक्तिधनं तथा । इमान्यन्यानि संयोगो विवाहस्य विनिर्दिशेत् ॥ ५ ॥ इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने विवाहसंस्कारकीर्त्तनो नाम चतुर्दश उदयः ॥ १४ ॥

---

१ वेश्याविवाहविधिलेखेनासामप्यावश्यकत्वं स्वीकृतमिति नाशङ्कनीयम् विवाहविधिर्वेश्यानामप्यावश्यक इत्येतन्निबन्धाशयात् । आसामावश्यकतावेतिनेतिच विषयान्तरमत्रोपेक्ष्यम्.

पञ्चदश उदयः ।

अथ व्रतारोपविधिः ।

इह हि गर्भाधानादारभ्य विवाहपर्यन्तैश्चतुर्दशभिः संस्कारैः संस्कृतोऽपि पुमान् न व्रतारोपसंस्कारं विनेह जन्मनि श्लाघाश्रेयोलक्ष्मीपात्रं स्यात्, परत्र च नार्यदेशादि[1]भावपवित्रितमनुष्यजन्मस्वर्गमोक्षादिभाजनं स्यात् अतो व्रतारोप एव परमसंस्काररूपो नृणां । यत उक्तमागमे—"बंभणो खत्तियो वावि वैसो सुद्दो तहेव य। पई य वावि धम्मेण हुत्तो मोक्खस्स भायणं ॥ १ ॥" अपि च—"बाहत्तरिकलाकुसला विवेअ-सहिआ न ते नरा कुसला । सव्वकलाणयपवरं जे धम्मकलं ण जाणंति ॥ १ ॥" परसमयेऽपि—"उपनीतोऽपि पूज्योऽपि कलावानपि मानवः । न परत्रेह सौख्यानि प्राप्नोति च कदाचन ॥ १ ॥" अतः सर्वसंस्कारप्रधान-भूतो व्रतारोपसंस्कारः कथ्यते, तस्य चायं विधिः—पूर्वे विवाहान्ताः संस्कारा गृह्यगुरुणा जैनब्राह्मणेन क्षुल्ल-केन वा भवन्ति, व्रतारोपस्तु निर्ग्रन्थगुरुणा यतिनैव भवति । गुरुगवेषणा यथा—"पञ्चमहव्वयजुत्तो पंच-विहायारपालणसमत्थो । पंचसमिओ तिगुत्तो छत्तीसगुणो गुरू होई ॥ १ ॥ पडिरूवो ते अस्सी जुगप्पहा-

---

१ वर्णधर्मधर्मविरोधिभिर्गुणादितस्तद्विभाग इति वादिभिर्वा मननीयोयमागमः.

णागमो महुरवक्को । गंभीरो धीमंतो उवएसपरो स आयरिओ ॥ २ ॥ अपरिस्सावी सोमो संगहसीलो अभिग्गहमई य । अविकत्थणो अचवलो पसंतहिअओ गुरू होई ॥ ३ ॥ कइआ वि जिणवरिंदा पत्ता अयरामरं पहं दाउं । आयरिण (प) हिववयणं धारिज्जइ संपयं सयलं ॥ ४ ॥" षट्त्रिंशद्गुणा गुरोर्यथा—"आयारे १ सुअविणये २ विक्खवणे चेव होइ बोधव्वे । दोसस्स परीघाए विणए चउहेव पडिवत्ती ॥ १ ॥" अथवा—"समत्तनाणचरणा पत्तेयं अट्ठ अट्ठ भेइल्ला । बारसभेओ अ तवो सूरिगुणा हुंति छत्तीसं ॥ २ ॥" अथवा—"संविग्गो १ मज्झत्थो २ संतो ३ मओ ४ ऊ ५ विऊ ६ सु संतुत्थो ७ । गीयत्थो ८ कडयोगी ९ भावन्नू १० लद्धिसंपन्नो ११ ॥ १ ॥ देसणिओ १२ आदेओ १३ मइमं १४ विन्नाणिओ १५ निरववाई १६ । नेमित्ती १७ ओअंसी १८ उवयारी १९ धारणावलिओ २० ॥ २ ॥ बहुदिट्ठो २१ नयनिउणो २२ पिअंवओ २३ सुस्सरो २४ तवोनिरओ । २५ । सुसरीरो २६ सुप्पइभो २७ चाईओ २८ आणंदओ २९ चक्खो ३० ॥ ३ ॥ गंभीरो ३१ अणुवत्ती ३२ पडिवन्नयपालगो ३३ थिरो ३४ धीरो ३५ । उचियन्नं ३६ सूरीणं छत्तीसगुणा सुअक्खाया ॥ ४ ॥" ईदृशे गुरौ पितृपरंपरामानिते तदभावेऽन्यस्मिन् गुरुगुणयुक्ते प्राप्ते गृहिणो व्रतारोपविधिर्युज्यते । स चायं संस्कारचतुर्दशकसंस्कृतो गृही गृहिधर्माय कल्पते । यत उक्तमागमे—"धम्मरयणस्सजुगो अक्खुद्दो १ रूववं २ पगइसोमो ३ । लोअप्पिओ ४ अक्रूरो ५ भीरू ६ असढो ७ सुदप्पिणो ८ ॥ १ ॥ लज्जालुओ ९ दयालू १० मज्झत्थो ११ सोमदिट्ठि १२ गुणरागी १३ । सक्कहसपक्खबहुत्तो १४ सुदीहदंसी १५ विसे-

सम्भू १६ ॥ २ ॥ वुड्ढाणुगो १७ विणीओ १८ कयन्नुओ १९ परहिअत्थकारी २० अ । तह चेव लद्धलक्खो २१ इगवीसगुणो हवइ सड्ढो ॥३॥" योगशास्त्रे श्रीहेमचन्द्राचार्योक्तिर्यथा—"न्यायसंपन्नविभवः शिष्टाचारप्रशंसकः । कुलशीलसमैः सार्द्धं कृतोद्वाहोऽन्यगोत्रजैः॥१॥पापभीरुः प्रसिद्धं च देशाचारं समाचरन् । अवर्णवादी न क्वापि राजादिषु विशेषतः ॥२॥ अनतिव्यक्तगुप्ते च स्थाने सुप्रातिवेश्मिके । अनेकनिर्गमद्वारे विवर्जितनिकेतनः ॥३॥ कृतसङ्गः सदाचारैर्मातापित्रोश्च पूजकः । त्यजन्नुपप्लुतं स्थानमप्रवृत्तश्च गर्हिते ॥ ४ ॥ व्ययमायोचितं कुर्वन् वेषं वित्तानुसारतः । अष्टभिर्धीगुणैर्युक्तः शृण्वानो धर्ममन्वहम् ॥५॥ अजीर्णे भोजनत्यागी काले भोक्ता च सात्म्यतः। अन्योऽन्याप्रतिबन्धेन त्रिवर्गमपि साधयन् ॥ ६ ॥ यथावदतिथौ साधौ दीने च प्रतिपत्तिकृत् । सदानभिनिविष्टश्च पक्षपाती गुणेषु च ॥ ७ ॥ अदेशाकालयोश्चर्यां त्यजन् जानन् बलाबलम् । वृत्तस्थज्ञानवृद्धानां पूजकः पोष्यपोषकः ॥ ८ ॥ दीर्घदर्शी विशेषज्ञः कृतज्ञो लोकवल्लभः । सलज्जः सदयः सौम्यः परोपकृतिकर्मठः ॥९॥ अन्तरङ्गारिषड्वर्गपरिहारपरायणः । वशीकृतेन्द्रियग्रामो गृहिधर्माय कल्पते ॥ १० ॥" ईदृशस्य पुरुषस्य व्रतारोपो विधीयते । प्रायेण व्रतारोपे गुरुशिष्यवचनानि प्राकृतभाषया यतो गर्भाधानादिविवाहपर्यन्तेषु संस्कारेषु गुरुवचनान्येव प्रायेण सन्ति न शिष्यवचनानि । गुरवश्च प्रायेण शास्त्रविदः संस्कृतवादिनो भवन्ति । अत्र तु व्रतारोपे बालानां स्त्रीणां मूर्खाणां च क्षमाश्रमणदानपूर्वं शिष्याणां वचनाधिकारः तत-

१ शिष्टाचारनिन्दादौरस्समगोत्रविवाहसमर्थनपरैश्च युगप्रधानश्रीहेमचन्द्राचार्यमतं द्रष्टव्यम् ।

स्तेषां संस्कृतोच्चारासामर्थ्ये प्राकृतानि वाक्यानि तत्साहचर्यात्तत्प्रबोधार्थं गुरुवाक्यान्यपि प्राकृतानि । यत उक्तमागमे—"मुत्तूण दिट्ठिवायं कालिय उत्कालियंगसिद्धंतं । थीबालवायणत्थं पाइयमुइयं जिणवरेहिं ॥१॥" तथा च—"बालस्त्रीवृद्धमूर्खाणां नृणां चारित्रकाङ्क्षिणाम् । उच्चारणाय तत्त्वज्ञैः सिद्धान्तः प्राकृतः कृतः ॥१॥" दृष्टिवादस्तु द्वादशमङ्गं परिकर्म १ सूत्र २ पूर्वानुयोग ३ पूर्वगत ४ चूलिका ५ रूपं पञ्चविधं संस्कृतमेव न बालस्त्रीमूर्खैः पठनीयं । संसारपारगामिभिर्विदिततत्त्वोपन्यासैर्गीतार्थैरेव पठनीयं । शेषमेकादशाङ्गं कालिकोत्कालिकादिसाधुसाध्वीशिशुभिर्व्रतिभिर्योगवाहिभिः पठनीयम् । अतएव भगवद्भिरर्हद्भिः प्राकृतं कृतं । ततो व्रतारोपेऽपि गृहिणां बालस्त्रीमूर्खावस्थाभृतां तादृशां यतीनामपि वचांसि प्राकृतानि । अथ—"मृदुध्रुवचरक्षिप्रैर्वारैर्भौमं शनिं विना । आद्याटनतपोनन्द्यालोचनादिषु भं शुभम् ॥१॥" वर्षमासदिननक्षत्रलग्नशुद्धौ विवाहदीक्षाप्रतिष्ठावत् शुभलग्ने गुरुस्तद्गृहे शान्तिकपौष्टिके विधाय पुनर्देवगृहे धर्मगृहे शुभाश्रमेऽन्यत्र वा यथाकल्पितं समवसरणं स्थापयेत् । ततः श्राद्धं स्नातं शुचिं स्वगृहान्महोत्सवेन समायातं सकक्षश्वेतनिवसनं श्वेतोत्तरासङ्गं मुखवस्त्रिकाकरं बद्धधम्मिल्लं चन्दनकृतभालतिलकं स्ववर्णानुसारेण जिनोपवीतोत्तरीयोत्तरासङ्गधारिणं गुरुः पूर्वाभिमुखो वामपार्श्वे संस्थाप्य इति कथयेत्—"समत्तमिउ लद्धेठइयाइं नरयतिरियदाराइं । दव्वाणि माणुसाणि य मुक्खसुहाइ सुहीणाइं ॥१॥" ततो गुर्वाज्ञया श्राद्धो नालिकेराक्षतक्रमुकपूर्णकरः समवसरणं परमेष्ठिमन्त्रं भणन् त्रिः प्रदक्षिणयेत् । ततो गुरुपार्श्वे समेत्य गुरुश्राद्धौ द्वावपि ईर्यापथिकीं प्रति-

क्राम्यतः। ततो निषद्यानिषण्णस्य गुरोः पुरः श्राद्धः "इच्छामि खमासमणो वंदिउं जावणिज्जाए निस्सीहि-याए मत्थेएण वंदामि भगवन्निच्छाकारेण तुम्हे अम्ह सम्मत्तमारोवणियं नंदिकड्ढावणियं वासक्खेवं करेह।" ततो गुरुर्वासान् सूरिमन्त्रेण गणिविद्यया वा अभिमन्त्र्य परमेष्ठिकामधेनुमुद्रे विधाय पूर्वाभिमुख ऊर्ध्वीभूतो वामपार्श्वस्थस्य श्राद्धस्य शिरसि निक्षिपेत्। तन्मस्तके हस्तं न्यस्य गणधरविद्यया रक्षां कुर्यात्। ततो गुरु-र्निषद्यायां निषीदति। श्राद्धः पूर्ववत्समवसरणं प्रदक्षिणीकृत्य गुर्वग्रे क्षमाश्रमणं दत्वा भणति—"इच्छाका-रेण तुम्हे अम्हं सम्मत्ताइतिगारोवणिअं चेईआइं वंदावेह।" ततो गुरुश्राद्धौ चतसृभिर्वर्द्धमानस्तुतिभिश्चै-त्यवन्दनं कुरुतः। वर्द्धमानस्तुतयस्तु छन्दसा वर्द्धमानाश्चरमजिनस्तुतिपूर्वाश्च। ततश्चतुर्थस्तुतिकथनान्ते श्री-शान्तिनाथदेवाराधनार्थं—"करेमि काउसग्गं वंदणवत्तियाए० जाव अप्पाणं वोसिरामि।" सप्तविंशत्यु-च्छ्वासचतुर्विंशतिस्तवचिन्तनम्। ततोऽर्हन्नमस्कारेण पारयित्वा, "नमोऽर्हत्सिद्धाचार्योपाध्यायसर्वसाधुभ्यः। "श्रीमते शान्तिनाथाय नमः शान्तिविधायिने। त्रैलोक्यस्यामराधीशमुकुटाभ्यर्चिताङ्घ्रये॥ १॥" अथवा— "शान्तिः शान्तिकरः श्रीमान् शान्तिं दिशतु मे गुरुः। शान्तिरेव सदा तेषां येषां शान्तिर्गृहे गृहे॥१॥" पुनरपि श्रुतदेवताराधनार्थं "करेमि काउसग्गं अन्नत्थउस्ससेणं जाव अप्पाणं वोसिरामि।" कायोत्सर्ग एव परमेष्ठिमन्त्र-चिन्तनम्। ततो "नमो अरिहंताणं, नमोऽर्हत्सिद्धा० "सुअदेवया भगवई नाणावरणीयकम्मसंघायं। तेसिं खवेउ सययं जेसिं सुअसायरे भत्ती॥ १॥" अथवा—"श्वसितसुरभिगन्धाल्लब्धभृङ्गीकुरङ्गं मुखशशिनमजस्रं

बिभ्रती या बिभर्त्ति । विकचकमलमुच्चैः सास्त्वचिन्त्यप्रभावा सकलसुखविधात्री प्राणभाजां श्रुताङ्गी ॥ १ ॥" पुनरपि क्षेत्रदेवताराधनार्थं, "करेमि काउसग्गं० जाव अप्पाणं वोसिरामि ।" कायोत्सर्ग एकवेलं च परमेष्ठिमन्त्रचिन्तनं । ततो "नमो अरिहंताणं० नमोऽर्हत्सिद्धाचार्यो० ।" "यस्याः क्षेत्रं समाश्रित्य साधुभिः साध्यते क्रिया । सा क्षेत्रदेवता नित्यं भूयान्नः सुखदायिनी ॥ १ ॥" पुनरपि भुवनदेवताराधनार्थं, "करेमि काउसग्गं अन्नत्थ उससेएणं० जाव अप्पाणं वोसिरामि ।" कायोत्सर्ग एकवेलं परमेष्ठिमन्त्रचिन्तनं पारयित्वा, "नमो अरिहंताणं० नमोऽर्हत्सिद्धा० "ज्ञानादिगुणयुतानां नित्यं स्वाध्यायसंयमरतानाम् । विदधातु भुवनदेवी शिवं सदा सर्वसाधूनाम् ॥१॥" शासनदेवताराधनार्थं, "करेमि काउसग्गं अन्नत्थ उससेणं० जाव अप्पाणं वोसिरामि ।" कायोत्सर्ग एकवेलं परमेष्ठिमन्त्रचिन्तनं । अर्हन्नमस्कारेण पारयित्वा, 'नमोऽर्हत्सिद्धा० "या पाति शासनं जैनं सद्यः प्रत्यूहनाशिनी । साभिप्रेतसमृद्ध्यर्थं भूयाच्छासनदेवता ॥ १ ॥" समस्तवैयावृत्त्यकराराधनार्थं, "करेमि काउसग्गं अन्नत्थ उससेणं० जाव अप्पाणं वोसिरामि ।" कायोत्सर्ग एकवेलं परमेष्ठिमन्त्रचिन्तनं पारयित्वा नमोऽर्हत्सिद्धा० "ये ते जिनवचनरता वैयावृत्त्योद्यताश्च ये नित्यम् । ते सर्वे शान्तिकरा भवन्तु सर्वाणुयक्षाद्याः ॥१॥" 'नमोअरिहंताणं' उपविश्य 'सनमुत्थुणं०' 'जावंति चेइयाइं०' अर्हणादिस्तोत्रपठनं । यथा—"अरिहाणं नमो पूअं अरहंताणं रहस्सरहियाणं । पयओ परमिट्ठीणं अरहंताणं धुअरयाणं ॥१॥ निद्दढअट्ठकम्मिंधणाणं वरनाणदंसणधराणं । मुत्ताणं नमो सिद्धाणं परमपरिमिट्ठिभूयाणं ॥२॥

आयारधराण नमो पंचविहायारसुट्ठियाणं च। नाणीणायरिआणं आयारुवए सयाणसया ॥ ३ ॥ बारसविहं अपुव्वं दिन्ताणसुअं नमो सुयहराणं। सययमुवज्झायाणं सज्झायज्झाणजुत्ताणं ॥ ४ ॥ सव्वेसिं साहूणं नमो तिगुत्ताण सव्वलोएवि। तवनियमनाणदंसणजुत्ताणं बंभयारीणं ॥५॥ एसो परमिट्ठीणं पंचहवि भावओ नमु-कारो। सव्वस्स कीरमाणो पावस्स पणासणो होई ॥ ६ ॥ भुवनेवि मंगलाणं मणुयासुरअमरखयरमहियाणं। सव्वेसिमिमो पढमो होइ महामंगलं पढमं ॥ ७ ॥ चत्तारि मंगलं मे हुंतु अरहा तहेव सिद्धाय। साहूअ सव्व-कालं धम्मो अतिलोअमंगल्लो ॥ ८ ॥ चत्तारि चेव ससुरासुरस्स लोगस्स उत्तमा हुंति। अरिहंतसिद्धसाहू-धम्मो जिणदेसियमुयारो ॥९॥ चत्तारिवि अरहंते सिद्धे साहूतहेव धम्मं च। संसारघोररक्खसभएण सरणं पवज्जामि ॥ १० ॥ अह अरहओ भगवओ महइमहावद्धमाणसामिस्स। पणयसुरेसरसेहरवियलिअकुसुमुच्चय-कम्मस्स ॥ ११ ॥ जस्स वरधम्मचक्कं दिणयरबिंबव्व भासुरच्छायं। तेएण पज्जलंतं गच्छइ पुरओ जिणंदस्स ॥१२॥ आयासं पायालं सयलं महिमंडलं पयासंतं। मिच्छत्तमोहतिमिरं हरेइ तिण्हंपि लोआणं ॥१३॥ सय-लंमिवि जिअलोए चिंतिअमित्तो करेइ सत्ताणं। रक्खं रक्खसडाइणिपिसायगहभूअजक्खाणं ॥ १४ ॥ लहइ विवाए वाए ववहारे भावओ सरंतो अ। जूए रणे अरायं गणे अ विजयं विसुद्धप्पा ॥१५॥ पञ्चूसपओसेसुं सययं भव्वो जणो सुहज्झाणो। एअं झाएमाणो मुक्खं पइ साहगो होई ॥१६॥ वेआलरुद्ददाणवनरिंदकोहंडि-रेवईणं च। सव्वेसिं सत्ताणं पुरिसो अपराजिओ होइ ॥१७॥ विज्जुव्व पज्जलंती सव्वेसुवि अक्खरेसु मत्ताओ।

पंच नमुक्कारपए इक्किक्के उवरिमा जाव ॥१८॥ ससिधवलसलिलनिम्मलआयारसहं च वन्नियं बिंदुं। जोयणसयप्पमाणं जालासयसहस्सदिप्पंतं ॥१९॥ सोलससु अक्खरेसु इक्किक्कं अक्खरं जगुज्जोअं। भवसयसहस्समहणो जंमि ठिओ पंचनवक्कारो ॥ २० ॥ जो थुणई हु इक्कमणो भविओ भावेण पंचनवक्कारं। सो गच्छइ सिवलोअं उज्जोअंतो दसदिसाओ ॥२१॥ तवनियमसंयमरहो पंचनमोक्कारसारहिनिउत्तो। नाणतुरंगमजुत्तो नेइ फुडं परमनिव्वाणं ॥ २२ ॥ सुद्धप्पा सुद्धमणा पंचसु समईसु संजयतिगुत्ता। जे तम्मि रहे लग्गा सिग्घं गच्छंति सिवलोअं ॥२३॥ थंभेइ जलजलणं चिंतिअमित्तो वि पंचनवक्कारो। अरिमारिचोरराउलघोरुवसग्गं पणासेई ॥ २४ ॥ अट्ठेवयंअट्ठसयं अट्ठसहस्सं च अट्ठकोडीओ। रक्खंतु मे सरीरं देवासुरपणमिआ सिद्धा ॥२५॥ नमो अरहंताणं तियलोअपुज्जो असंथुओ भयवं। अमरनररायमहिओ अणाइनिहणो सिवं दिसओ ॥ २६ ॥ निट्ठविअअट्ठकम्मो सिवसुहभूओ निरंजणो सिद्धो। अमरनररायमहिओ अणाइनिहणो सिवं दिसओ ॥ २७ ॥ सव्वे पओसमच्छरआहिं अहिअया पणासमुवयंति। दुगणीकयधणुसहं सोओपि महाधणुसहस्सं ॥२८॥ इय तिहुअणप्पमाणं सोलसपत्तं जलंतदित्तसरं। अट्ठारअद्धवलयं पंचनमुक्कारचक्कमिणं ॥ २९ ॥ सयलुज्जोइअभुवणं विद्दाविअसेससत्तुसंघायं। नासिअमिच्छत्ततमं वियलिअमोहं गयतमोहं ॥३०॥ एयस्स यमज्झत्थो सम्मदिट्ठीवि सुद्धचारित्ती। नाणी पवयणभत्तो गुरुजुणसस्सूसणापरमो ॥ ३१ ॥ जो पंचनमुक्कारं परमोपुरिसो पराइभत्तीए। परियत्तेइ पइदिणं पयओ सुद्धप्पओ गप्पा॥ ३२ ॥ अट्ठेवय अट्ठसया अट्ठसहस्सं

च उभयकालंपि। अट्ठेवयकोडीओ सो तइअभवे लहइ सिद्धिं ॥३३॥ एसो परमो मंतो परमरहस्सं परं परं तत्तं। नाणं परमं णेअं सुद्धं झाणं परऽझेयं ॥ ३४ ॥ एवं कवयमभेयं खाइयमत्थं परा भुवणरक्खा। जोईसुन्नं बिंदुं ताओ तारालवो मत्ता ॥ ३५ ॥ सोलस्सपरमक्खरवीअबिंदुगब्भो जगुत्तमो जोओ। सुअबारसंगसायरमहत्थपुवत्थपरमत्थो ॥ ३६ ॥ नासेइ चोरसावयविसहरजलजलणबंधणसयाइं। चिंतिज्जंतो रक्खसरणरायभयाइं भावेणं ॥ ३७ ॥" इति अरिहणादिस्तोत्रं पठित्वा, "जयवीयराय जगगुरु०" इत्यादिगाथाकथनं। आचार्योपाध्यायगुरुसाधुवन्दनम्। इति शक्रस्तवविधिं गुरुश्राद्धौ द्वावपि कुरुतः। चैत्यवन्दनानन्तरं श्राद्धः क्षमाश्रमणदानपूर्वकं कथयति, "भगवन्, सम्यक्त्वसामायिक श्रुतसामायिक देशविरतिसामायिक आरोवणियं नंदिकड्ढावणियं काउस्सग्गं करेमि।" गुरुः कथयति, "करेह।" ततः श्राद्धः सम्मत्ता इतिगारोवणिअं करेमि काउस्सग्गं अन्नत्थऊससिएणं जाव अप्पाणं वोसिरामि।" इति कायोत्सर्गं करोति सप्तविंशत्युच्छ्वासप्रमाणं चतुर्विंशतिस्तवचिन्तनं। ततो अर्हन्नमस्कारेण पारयित्वा चतुर्विंशतिस्तवभणनं। ततो मुखवस्त्रिकालेखनपूर्वकं श्राद्धो द्वादशावर्त्तवन्दनं दद्यात्। पुनः क्षमाश्रमणं दत्वा भणति, "भगवन् सम्मत्ताइतिगं आरोवेह।" गुरुः कथयति, "आरोवेमि।" ततः श्राद्धो गुर्वग्रे ऊर्ध्वीभूय कृताञ्जलिर्मुखवस्त्राच्छादितवदनस्त्रिवेलं परमेष्ठिमन्त्रं भणति। ततः सम्यक्त्वदण्डकं भणति। स यथा—"अहण्णं भंते तुम्हाणं समीवे मिच्छत्ताओ पडिक्कमामि सम्मत्तं उवसंपज्जामि, तंजहा दव्वओ खेत्तओ कालओ भावओ दव्वओ मिच्छत्तकारणाइं पच-

क्खामि समस्तकारणाइं उवसंपज्जामि नो मे कप्पेइ अज्जप्पभिई अन्नओतितित्थिएवा अन्नउत्थिअदेवयाणि वा अन्नउत्थिअपरिग्गाहियाणि अर्हंतचेइआणि वंदित्तएवा नमंसित्तएवा पुव्विं अणालत्तेणं आलवित्तएवा संलवित्तएवा तेसिं असणं वा पाणं वा खाइमं वा साइमं वा दाउं वा अणुप्पयाउं वा खित्तओणं इहेव वा अन्नत्थ वा कालओणं जावज्जीवाए भावओणं जाव गहेणं न गहिज्जामि जावच्छलेण नच्छलिज्जामि जाव सन्निवाएणं नाभिभविज्जामि जाव अन्नेण वा केणइ परिणामवसेण परिणामो मे न परिवड्ढइ ताव मे एअं सम्मद्दंसणं अन्नत्थ रायाभिओगेणं बलाभिओगेणं गणाभिओगेणं देवयाभिओगेणं गुरुनिग्गहेणं वित्तीकंतराएणं वोसिरामि" इति वारत्रयं दण्डकपाठः ॥ अन्ये तु दण्डकमित्थमुच्चारयन्ति यथा—"अहणं भंते तुम्हाणं समीवे मिच्छित्ताओ पडिक्कमामि सम्मत्तं उवसंपज्जामि नो मे कप्पइ अज्जप्पभिई अन्नउत्थिए वा अन्नउत्थिअदेवयाणि वा अन्नउत्थिअपरिग्गहियाणि चेईआणि वंदित्तए वा नमंसित्तए वा पुव्विं अणालत्तेणं आलवित्तए वा संलवित्तए वा तेसिं असणं वा पाणं वा खाइमं वा साइमं वा दाउं वा अणप्पयाउं वा अन्नत्थ रायाभिओगेणं गणाभिओगेणं बलाभिओगेणं देवयाभिओगेणं गुरुनिग्गहेणं वित्तीकंतारेणं तं चउव्विहं तं जहा दव्वओ खत्तओ कालओ भावओ दव्वओणं दंसणदव्वाइं अंगीकयाइं खित्तओणं उड्ढलोए वा अहोलोए वा तिरिअलोए वा कालओणं जावज्जीवाए भावओणं जाव गहेणं न गहिज्जामि जाव छलेणं नच्छलिज्जामि जाव सन्निवाएणं नाभिभविज्जामि जाव अन्नेण वा केणइ परिणामवसेण परिणामो मे न परिवडइ

ताव मे एसा दंसणपडिवत्ती।" इति गुरुविशेषेण द्वितीयो दण्डकः पूर्वदण्डको वा अयं वा एकतम उच्चारणी यस्त्रिः। ततः गाथा—"इअमिच्छाओ विरमिअ सम्मं उवगम्म भणइ गुरुपुरओ। अरिहंतो निस्संगो मम देवो दक्खणा साहू॥१॥" गुरुर्वारत्रयमिति गाथां पठित्वा श्राद्धमस्तके वासान् क्षिपति। तदनु गुरुर्निषद्यायामुपविशति। तत्रोपविश्य गन्धाक्षतवासान् सूरिमन्त्रेण गणिविद्यया वाभिमन्त्रयति। तान् गन्धक्षतवासान् करे गृहीत्वा जिनपादान् स्पर्शयति। तांश्च साधुसाध्वीश्रावकश्राविकाभ्यो ददाति। ते च मूर्ध्न्यन्तः स्थापयन्ति। ततः श्राद्धो निषद्यासीनगुरोः पुरतः क्षमाश्रमणं दत्वा भणति, "भयवं, तुब्भे अम्हं सम्मत्ताइसामाईअं आरोवेह"। गुरुः कथयति, 'आरोवेमि'। पुनः श्राद्धः क्षमाश्रमणं दत्वा भणति—"संदिसह किं भणामि।" गुरुः कथयति, 'वंदित्तुपवेयह'। पुनः श्राद्धः क्षमाश्रमणं दत्वा भणति, "भयवं, तुब्भेहिं अम्हं सामाइअतिअ मा रोवियं।" गुरुः कथयति, "आरोवियं २ खमासमणेणं हत्थेणं सुत्तेणं अत्थेणं तदुभएणं गुरुगुणेहिं वड्ढाहि नित्थारगपारगो होहि।" पुनः श्राद्धः "इच्छामो अनुसट्ठिं" इति भणित्वा पुनः क्षमाश्रमणं दत्वा भणति, "तुम्हाणं पवेइयं संदिसह साहूणं पवेएमि।" गुरुः कथयति, 'पवेअय'। ततः श्राद्धः परमेष्ठिमन्त्रं पठन् समवसरणं प्रदक्षिणीकरोति। सङ्घस्तु पूर्वदत्तान् वासान् तन्मस्तके क्षिपति। गुरोर्निषद्योपवेशादारभ्य सङ्घवासक्षेपपर्यन्ता क्रिया त्रिवेलमनयैव रीत्या विधेया। पुनः श्राद्धः क्षमाश्रमणं दत्वा भणति, "तुम्हाणं पवेइयं।" पुनः क्षमाश्रमणपूर्वं भणति, "साहूणं पवेइयं संदिसह काउस्सग्गं करेमि।" गुरुः कथयति, 'करेह'। ततः श्राद्धः "सत्ताइतिगस्स थिरीकरणत्थं करेमि काउसग्गं अन्नत्थऊससिएणं जाव अप्पाणं वोसिरामि।" सप्तषादि-

त्रिंशत्युच्छ्वासः चतुर्विंशतिसूत्रचिन्तनं पारयित्वा मुखेन चतुर्विंशतिस्तवपाठः । भूयश्चतुःस्तुतिवर्जितं शक्रस्तवेन चैत्यवन्दनं । ततः श्राद्धो गुरुं त्रिः प्रदक्षिणयेत् । गुरुर्निषद्यासीनः श्राद्धं पुरो निवेश्य नियमं ददाति । नियमयुक्तिर्यथा—"पंचुंबरि चउविगई अनायफलकुसुमहिमविसकरेय । मट्टिअ राईभोअण घोलवडा रिंगणा चेव ॥१॥ पंपुट्टय सिंघाडय वायंगण कायबाणि अ तहेव । बावीसं दव्वाई अभक्खणीयाइं सड्ढाणं ॥२॥" इति नियमान् दत्वा पुनरुच्चारयेत्—"अरिहंतो मह देवो जावज्जीवं सुसाहुणो गुरुणो । जिणपन्नत्तं तत्तं इयसंमत्तं मए गहियं ॥ १ ॥" तदनन्तरं अर्हन्तं मुक्त्वा अन्यदेवान्नमस्कर्त्तुं जैनयतीन् मुक्त्वान्ययतिविप्रादीन् भावेन वन्दितुं जिनोक्ततत्वसप्तकं मुक्त्वा तत्त्वान्तरश्रद्धानं कर्त्तुंहि नियम एव कार्यः । अन्यदेवलिङ्गिविप्रादिनमस्कारदानं च लोकव्यवहाराय । तथान्यशास्त्रश्रवणपठने तद्वत् । ततो गुरुः सम्यक्त्वदेशनां कुर्यात् । सा यथा—"मानुष्यमार्यदेशश्च जातिः सर्वाक्षपाटवम् । आयुश्च प्राप्यते तत्र कथञ्चित्कर्मलाघवात् ॥ १ ॥ प्राप्तेषु पुण्यतः श्रद्धाकथकश्रवणेष्वपि । तत्त्वनिश्चयरूपं तद्बोधिरत्नं सुदुर्लभम् ॥ २ ॥" "कुसमयसुईणमहणं सम्मत्तं जस्स सुट्ठियं हिअए । तस्स जगुज्जोअकरं नाणं चरणं च भवमहणं ॥१॥" "या देवे देवताबुद्धिर्गुरौ च गुरुतामतिः । धर्मे च धर्मधीः शुद्धा सम्यक्त्वमिदमुच्यते ॥ १ ॥ अदेवे देवबुद्धिर्या गुरुधीरगुरौ च या । अधर्मे धर्मबुद्धिश्च मिथ्यात्वं तद्विपर्ययात् ॥२॥ सर्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः । यथास्थितार्थवादी च देवोऽर्हन् परमेश्वरः ॥३॥ ध्यातव्योऽयमुपास्योऽयमयं शरणमिष्यताम् । अस्यैव प्रतिपत्तव्यं शासनं चेतनास्ति चेत् ॥ ४ ॥ ये स्त्रीशस्त्राक्षसूत्रादिरागाद्यङ्ककलङ्किताः । निग्रहानुग्रहपरास्ते देवाः स्युर्न मुक्तये ॥ ५ ॥ नाट्याट्टहाससङ्गीताद्यु-

पल्लवविसंस्थुलाः । लंभयेयुः पदं शातं प्रपन्नान् प्राणिनः कथम् ॥ ६ ॥ महाव्रतधरा धीरा भैक्ष्यमात्रोपजीविनः । सामायिकस्था धर्मोपदेशका गुरवो मताः ॥ ७ ॥ सर्वाभिलाषिणः सर्वभोजिनः सपरिग्रहाः । अब्रह्मचारिणो मिथ्योपदेशा गुरवो न तु ॥८॥ परिग्रहारम्भमग्नास्तारयेयुः कथं परान् । स्वयं दरिद्रो न परमीश्वरीकर्त्तुमीश्वरः ॥९॥ दुर्गतिप्रपतत्प्राणिधारणाद्धर्म उच्यते । संयमादिर्दशविधः सर्वज्ञोक्तो विमुक्तये ॥ १० ॥ अपौरुषेयं वचनमसंभवि भवेद्यदि । न प्रमाणं भवेद्वाचां ह्याप्ताधीना प्रमाणता ॥११॥ मिथ्यादृष्टिभिराम्नातो हिंसाद्यैः कलुषीकृतः । स धर्म इति वित्तोऽपि भवभ्रमणकारणम् ॥१२॥ सरागोऽपि हि देवश्चेद्गुरुरब्रह्मचार्यपि । कृपाहीनोऽपि धर्मः स्यात्कष्टं नष्टं हहा जगत् ॥ १३ ॥ समसंवेगनिर्वेदानुकंपास्तिक्यलक्षणैः । लक्षणैः पञ्चभिः सम्यक् सम्यक्त्वमुपलक्ष्यते ॥१४॥ स्थैर्यं प्रभावना भक्तिः कौशलं जिनशासने । तीर्थसेवा च पञ्चास्य भूषणानि प्रचक्षते ॥१५॥ शङ्का काङ्क्षा विचिकित्सा मिथ्यादृष्टिप्रशंसनम् । तत्संस्तवश्च पञ्चापि सम्यक्त्वं दूषयन्त्यलम्॥१६॥ इति व्याचक्षीत । श्रेणिकसंप्रतिदशार्णभद्रादिनृपदृष्टं सम्यक्त्वचरितव्याख्यानं सम्यक्त्वविषये कुर्यात् । तथा सङ्ग्रहः—“चियवंदणवंदणयं गिहिवयउवसग्गपइवउच्चरणं । जहसत्तिवयग्गहणं पयाहिणं देसणं चेव ॥१॥” तद्दिने श्राद्ध एकभक्ताचाम्लादि कुर्यात् । साधुभ्योऽन्नवस्त्रपुस्तकवसतिदानं । मण्डलीपूजा । चतुर्विधसङ्घवात्सल्यं । सङ्घपूजा च । इति व्रतारोपसंस्कारे सम्यक्त्वसामायिकारोपणविधिः ॥ ॥ अथ देशविरतिसामायिकारोपणविधिः । स चायं तदैव सम्यक्त्वसामायिकारोपणानन्तरं तत्कालमेव तद्वासनानुसारेण दिनमासवर्षादिव्यतिक्रमे वा देशविरतिसामायिकमारोप्यते । तत्र नन्दिचैत्यवन्दनकायोत्सर्गवासक्षेपक्षमाश्रमणप्र-

भूति सर्वं पूर्ववत् । परं सर्वत्र सम्यक्त्वसामायिकस्थाने देशविरतिसामायिकनामग्रहणं सर्वत्र। तत्तथैव कृत्वा पुनरपि द्वितीया नन्दिर्दण्डकोच्चारणपूर्वं विधेया । व्रतोच्चारकाले नमस्कारत्रयपाठानन्तरं हस्तगृहीतपरिग्रहप्रमाणादिटिप्पनकस्य श्राद्धस्य गुरुर्देशविरतिसामायिकदण्डकमुच्चारयेत्। स यथा–"अहण्णं भंते तुम्हाणं समीवे थूलगं पाणाइवायं संकप्पओ बीअंदिआइजीवनिकायनिग्गहनियट्टिरूवं निरवराहं पच्चक्खामि जावज्जीवाए दुविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि तस्स भंते पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि ।" वारत्रयं भणनीयं १ । एवं अहण्णं भंते तुम्हाणं समीवे थूलगं मुसावायं जीहाछेयाइं निग्गहहेऊअं कन्नागोभूमिनिक्खेवावहारकूडसक्खाइं पंचविहं दक्खिनाइअविसए अहागहिअभंगएणं पच्चक्खामि जावज्जीवाए दुविहं तिविहेणंत्रिः २ एवं अहण्णं भंते तुम्हाणं समीवे थूलगं अदिन्नादाणं खत्तखणणाइ चोरकारकरं रायनिग्गहकरं सचित्ताचित्तवत्थुविसयं पच्चक्खामि जावज्जीवाए दुविहं तिविहे त्रि० ३ एवं अहण्णं भंते तुम्हाणं समीवे थूलगमेहुणं उरालियवेउव्विअभेयं अहागहिअभंगएणं तत्थ दुविहं तिविहेणं दिव्वं एगविहं तिविहेणं तेरित्थं एगविहमेगविहेणं माणुसं पच्चक्खामि जावज्जीवाए दुविहं तिवि०त्रिः ४ एवं अहण्णं भंते तुम्हाणं समीवे अपरिमिअं परिग्गहं धणधन्नाइनवविहं वत्थुविसयं पच्चक्खामि इच्छापरिमाणं अहागहिअभंगएणं उवसंपज्जामि जावज्जीवाए दुविहेणं त्रिः ५ एवं अहण्णं भंते तुम्हाणं समीवे पढमं गुणव्वयं दिसिपरिमाणरूवं पडिवज्जामि जावज्जीवाए दुवि० त्रिः ६ एवं अहण्णं भंते तुम्हाणं समीवे उवभोगपरिभोगवयं भोअणओ अणंतकायबहुबीअराईभोअणाइ बावीसवत्थुरूवं कम्मणा पनरसकम्मादाणइंगालकम्माइबहुसा-

वज्जं खरकम्माइरायनिओगं च परिहरामि परमिअं भोगउवभोगं उवसंपज्जामि जावज्जीवाए० दुविहं तिविहे० त्रि० ७ एवं अहण्णं भंते तुम्हाणं समीवे अणत्थदंडगुणव्वयं अट्टरुद्दज्झाणपावोवएसहिंसोवयारदाणपमायकरणरूवं चउव्विहं जहासत्तीए परिहरामि जावज्जीवाए दुविहं तिविहे० त्रि० ८ एवं अहण्णं भंते तुम्हाणं समीवे सामाइयं जहासत्तीए पडिवज्जामि जावज्जीवाए दुविहं तिविहे० त्रि० ९ एवं अहण्णं भंते तुम्हाणं समीवे पोसहोववासं जहासत्तीए पडिवज्जामि जावज्जीवाए दुविहं तिविहे० १० एवं अहण्णं भंते तुम्हाणं समीवे देसावगासिअं जहासत्तीए पडिवज्जामि जावज्जीवाए दुविहं तिविहं० ११ एवं अहण्णं भंते तुम्हाणं समीवे अतिहिसंविभागं जहासत्तीए पडिवज्जामि जावज्जीवाए दुविहं तिविहे १२ इच्चेअं सम्मत्तमूलं पंचाणुव्वइयं तिगुणव्वइयं चउसिक्खावइयं दुवालसविहं सावगधम्मं उवसंपज्जित्ताणं विहरामि । इति दण्डकोच्चारणानन्तरं कायोत्सर्गवन्दनकक्षमाश्रमणप्रदक्षिणावासक्षेपादिकं पूर्ववत् । परिग्रहपरिमाणटिप्पनकयुक्तिर्यथा —"पणमिअ अमुगजिणंदं अमुगासड्ढीअ अमुगसड्ढो वा। गिहिधम्मं पडिवज्जइ अमुगस्स गुरुस्स पासंमि॥१॥ अरहंतं मुत्तूणं न करेमि अ अन्नदेवयपणामं । मत्तूणं जिणसाहू न चेव पणमामि धम्मत्थं ॥ २ ॥ जिणवयणभाविआइं तत्ताइं सच्चमेव जाणामि। मित्थत्तसत्थसवणे पढणे लिहणे अ मे निअमो ॥३॥ परतित्थिआण पणमण उब्भावणथुणणभत्तिरागं च । सक्कारं सम्माणं दाणं विणयं च वज्जेमि॥४॥ धम्मत्थ मन्नतित्थे न करे तवदाणन्हाणहोमाइं । तेसिं च उचिअकम्मे करणिज्जे होउ मे जयणा ॥५॥ तिअपंचसत्तवेलं चियवंदणयं जहाणु-

सत्तीए । इगदुन्निअवाराओ सुसाहुगमणं च संवासो ॥ ६ ॥ इगदुन्नितिन्निवेलं जिणपूआ निचपच्चक्खाणं च । जयणा य कुलायारे पाणवहं सव्वजीवाणं ॥७॥ न करेमि अकज्जेणं कज्जे एगिंदिआण मह जयणा । कन्नाइवि अलि-[1]आइं वज्जेमिअ पंचनिअमेणं ॥८॥ वज्जेमि धणं चोरं कारकरं रायनिग्गहकरं च । दुविहतिविहेणं दिव्वं एगविहं तिविहंओ[2] अतेरिच्छं ॥ ९ ॥ निअमुत्तिअणुभवेणं बंभवयं नियमणंमि धारेमि । माणुस्से जावजीवं काएणं मेहुणं वज्जे ॥१०॥ परनारीं परपुरिसं वज्जेमि अ अन्नओ अ जयणामे । अह य परिग्गहसंखा परिग्गहे नवविहे एसा ॥११॥ इत्तिअमित्ता टंका इत्तिअमित्ताइं अहव दंमा वा । तेसिं च वत्थुगहणं इत्तिअमित्ताइं संखा वा ॥ १२ ॥ इत्तियमित्ताण टंकयाण गणिमस्स वत्थुणो गहणं । तुलिमस्स इत्तियाण य मेअस्स य इत्तियाणं च ॥१३॥ हत्थंगुलमेयाणं इत्तिअमित्ताण मज्झ संगहणं । तह दिट्ठिमुल्लयाणं इत्तिअमित्ताण टंकाणं ॥१४॥ इत्तियत्थारी अन्नाणं इत्तिय मह परिग्गहे भूमी । पुरगामहट्टगेहा खित्ता मह इत्तियपमाणा ॥ १५ ॥ इत्तिअमित्तं कणयं इत्तियमित्तं तहेव रूप्पं च । कंसं तंबं लोहं तउं सीसं इत्तियं च घरे॥१६॥ इत्तियमित्ता दासा दासीओ इत्तिआओ महसंखा । संखा सेवयचेडाण इत्तियाणं च मह होउ ॥ १७ ॥ इत्तियमित्ता करिणो इत्तिअतुरयाय इत्तियावसहा । इत्तिअ अरहा य सगडा गोमहिसीओ इयपमाणा ॥१८॥ इत्तियमित्ता मेसा इत्तिअ छगलाओ इत्तिआय हला । अमुगस्स य अमुगस्स य कम्मस्स उ होइ मे नियमो ॥१९॥ दससुवि दिसासु इत्तिअ जो-

१ इविसयअलियं पाठः । २ तिवहतेरिच्छं पाठः ।

अणगमणं च जावजीवं मे । अप्पस्सवसेणं विय जयणा पुण तित्थजत्तासु ॥ २० ॥ कम्मे भोगुवभोगे खरकम्मं कम्मदाणपनरसगं । दुप्पोलाहारं विअ अन्नाय पुप्फं फलं वज्जे ॥ २१ ॥ पंचुंबरि चउविगई हिम विस करगेअ सव्वमट्टीअ । राईभोयणगं विअ बहुबीयअणंतसंधाणा ॥ २२ ॥ घोलवडा वायंगण अमुणिअनामाइं पुप्फफल-याइं । तुच्छफलं चलिअरसं वज्जे वज्जाणि बावीसं ॥ २३ ॥ एआइं मुत्तूणं अन्नाणफलानं पुप्फपत्ताणं । एआई एआइं पाणं ते विहु न भक्खेमि ॥२४॥ इत्तिअमित्तअणंते फासुअरइएण होउ मे जयणा । इत्तिअफले अपक्के अखंडिए विहु न भक्खेमि ॥ २५ ॥ आजम्मं सचित्ता इत्तिअमित्ता य भक्खणिज्जा मे । इत्तिअमित्ता दवा वंजणघियदुद्धदहिपभिई ॥२६॥ इत्तिअमित्ता विगई इत्तिअमित्ता यमेपइत्ताणा। इत्तिअमित्ता गयतुरगरथरह-वरा हुंतु जयणा मे ॥२७॥ इत्तिअमित्ता पूगा इत्तिअमित्ता लवंगपत्ता य । एला जाइफलाइ अ मह निच्चं इत्ति-अपमाणा ॥२८॥ चउविहवच्छाणंपि अ इत्तिअमत्ताणमब्भपरिहाणं । इअजाई इयसंखा पुप्फाणं अंगभोगे मे ॥२९॥ आसंदी सिंहासण पीढअ पट्टाइ चउक्किआओअ । इत्तिअमित्ता पल्लंक तूलिआ खट्टमाईओ ॥ ३० ॥ कप्पूरागरुकत्थूरिआओसिरीहंडकुंकुमाईअ । इत्तिअमित्तामह अंगलेवणे पूअणेजयणा ॥ ३१ ॥ इत्तिअमित्ता नारीओ मज्झसंभोगमित्तियं कालं । इत्तिअघडेहिं पूएहि फासुएहिं च मे ह्णाणं ॥ ३२ ॥ इत्तिअवारा इत्तिअ-तिल्लेहिं इत्तिअप्पयारेहिं । इत्तिअमित्तं भत्तं इत्तिअवाराइं भुंजामि ॥ ३३ ॥ इह जावजीवं चिअ सचित्ताइण-भोगपरिभोगा । एएसिं पुण संखं दिवसे दिवसे करिस्सामि ॥ ३४ ॥ इत्तियमित्तं मणिकणयरूप्यमुत्ताइभूसणं

अंगे। इत्तिअमित्तं गीअं नट्टं वज्जं च उवभुज्जं ॥३५॥ वज्जेमि अट्टरुद्दं झाणं अरिघाय वयरमाईयं। दक्खिणणाविसए पुण सावज्जुवएसदाणं च ॥३६॥ तह दक्खिणाविसएहिं सगगेहो वगरणाइदाणं च। तहकामसत्थपढणं जूयं मज्जं परिहरेमि ॥३७॥ हिंडोलायविणोअं भत्तिच्छीदेसरायथुइनिंदं। पसुपक्खीजोहणंविअ अकालनिद्दं सयलरयणी ॥ ३८ ॥ इच्चाइपमायाइं अणत्थदंडे गुणव्वएवज्जे। वरिसे इत्तिअसामाइआइं तह पोसहाइं इत्ताइं ॥३९॥ इत्ताइं जोअणाइं मह दिवसे दसदिसासु गमणं च। साहूण संविभागं भोअणवत्थाइसु करेमि ॥४०॥ पढमं जईण दाऊण अप्पणा पणमिऊण पारेमि। असईइ सुविहियाणं भुंजेमि अकयदिसालोओ ॥ ४१ ॥ इय बारसविह मिमिणा विहिणा पालेमि सावगं धम्मं। अगलिअजलस्स पाणं न्हाणं मरणेवि वज्जेमि॥४२॥ कंदप्पदप्पनिट्ठीवणाइ सुहणं चउविहाहारं। सजिणजिणमंडवंते विकहं कलहं च मुंचामि ॥ ४३ ॥ अमुगम्मि महागच्छे अमुगस्स गुरुस्स सूरिसंताणे। अमुगस्स सीसपासे पायंते अमुगसूरिस्स ॥ ४४ ॥ अमुगंमि वत्थरे अमुगमासि अमुगम्मि पक्खसमयंमि। अमुगतिहि अमुगवारे अमुगे रिक्खे अ अमुगपुरे ॥ ४५ ॥ अमुगस्स सुओ अमुगो सड्ढो गिह्णेइ इत्थगिहिधम्मं। अमुगस्स अमुगकंता अमुगी वा साविआ चेव ॥४६॥" नवरं—क्षत्रियस्य प्राणातिपातस्थाने गाथाद्वयमधिकं यथा—"जुज्झंमि गोगहम्मि अ चेइअगुरुसाहुसंघउवसग्गे। तह दुट्ठनिग्गहे चिअ जीवविघाए न मह दोसो ॥१॥ जणदेसरक्खणत्थं हणणे मह सीहवग्घसत्तूणं। नहु दोसो जलपिअणे गलणं अन्नत्थ जहसत्ती ॥ २॥" "इत्थेव पमाएणं गुरुवयणेणं इमं तवं कुव्वे। अप्पबहुभंगएणं तेणं

जायइ मह विसोही ॥४७॥" इतिपरिग्रहप्रमाणटिप्पनकविधिः। एतेषु द्वादशस्वपि व्रतेषु कोऽपि कियन्ति व्रतानि गृह्णाति तस्य तावन्त्युच्चार्यन्ते। यस्य षाण्मासिकं सामायिकव्रतमारोप्यते तस्यायं विधिः। चैत्यवन्द-नानन्दिक्षमाश्रमणादि सर्वं पूर्ववत् सामायिकाभिलापेन। विशेषश्चायं कायोत्सर्गानन्तरं तत्करगतनूतनमुख-वस्त्रिकायां वासक्षेपः कार्यः। तथैव मुखवस्त्रिकया षण्मासमुभयकालं सामायिकं गृह्णाति। ततो वारत्रयं नमस्कारपाठं कृत्वा दण्डकं पाठयेत्। स यथा—"करेमि भंते सामाइयं सावज्जं जोगं पच्चक्खामि जावनियमं पज्जुवासामि दुविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि तस्स भंते पडिक्कमामि निंदामि अप्पाणं वोसिरामि से सामाइए चउव्विहे तं जहा दव्वओ खित्तओ कालओ भावओ दव्वओणं सामाइअं पडुच्च खित्तओणं इहेववा अन्नत्थ वा कालओणं जाव छम्मासं भावओणं जाव गहेणं न गहिज्जामि जाव च्छलेणं न छलिज्जामि जाव सन्निवाइएणं नाभिभविज्जामि ताव मे एसा सामाइअपडिवित्ती।" वारत्रयमुच्चार्यते शिरसि वासदानं अक्षतवासाद्यभिमन्त्रणं सद्गुरुकरे वासदानं च नास्ति। प्रदक्षिणात्रयं कार्यते। इति षाण्मासिकस-म्यक्त्वारोपणविधिः। एवमनयैव रीत्या सम्यक्त्वस्य अन्येषां द्वादशानां व्रतानामपि अनेनैव दण्डकेन तद-भिलापेन मासं षण्मासान् वर्षं वा अवधिसम्यक्त्वव्रतानामुच्चारणं। नवरं सम्यक्त्वस्य सम्यक्त्वदण्डकेनोच्चा-रणं। नवरं कालओणं पुरतः अवधिसम्यक्त्वे 'जावज्जीवाए' न वक्तव्यं 'मासं छम्मासं वरिसं' इत्यादि वक्तव्यं। शेषेष्वपि व्रतेषु 'जावज्जीवाए' स्थाने 'मासं छम्मासं वरिसं' इत्यादि वक्तव्यं इति॥ ॥ अथ प्रतिमोद्वहनविधिः।

प्रतिमा यावज्जीवं नियमस्य स्थिरीकरणप्रतिज्ञा । न तत्र कालादौ नियमव्यवच्छेदः । ताश्चैकादश गृहिणां । ता यथा—"दंसण १ वय २ सामाइय ३ पोसह ४ पडिमाय ५ बंभ ६ अचित्ते । आरंभ ८ पेस ९ उद्दिट्ठ १० वज्जए समणभूए ११ य ॥१॥" तत्र श्रावको यस्यां निःशङ्कितादिसम्यग्दर्शनो मासं स्यात्सा प्रथमा १ व्रताधारी द्वितीया २ कृतसामायिकस्तृतीया ३ अष्टमीचतुर्दश्यादिषु चतुर्विधपौषधकर्त्ता चतुर्थी ४ पौषधकाले रात्रिक्यादि प्रतिमादिप्रतिपत्ता अस्नानः प्रासुकभोजी दिवा ब्रह्मचारी रात्रौ कृतपरिमाणः कृतपौषधस्तु रात्रावपि ब्रह्मचर्यं चेत्येषा पञ्चमी ५ सदा ब्रह्मचारी षष्ठी ६ सचित्ताहारवर्जकः सप्तमी ७ आरंभस्वयङ्करणवर्जकाऽष्टमी ८ प्रेष्यैरारंभवर्जको नवमी ९ उद्दिष्टकृताहारवर्जकः क्षुरमुण्डितः शिखी वा निराधारी कृतार्थजातनिदर्शनश्चेति दशमी १० क्षुरमुण्डो लुञ्चितो वा रजोहरणप्रतिग्रहधारी श्रमणभूतो निर्ममत्वः स्वज्ञातिषु[1] विहरतीत्येकादशी ११ । अत्र च प्रथमा मासं यावत्, द्वितीया द्वौ मासौ, तृतीया त्रयमेवं यावदेकादशी एकादशमासान् । तथा यत्पूर्वस्यां भणितं तदुत्तरस्यामपि सर्वं भणनीयम् । एतासु वितथप्रज्ञापनाश्रद्धानादिना अतिचार इति । तत्र प्रथमं दर्शनप्रतिमा तस्यां नन्दिचैत्यवन्दनकक्षमाश्रमणवासक्षेपविधिः दर्शनप्रतिमाभिलापेन । स एव दण्डकस्त्वेवं—"अहन्नं भंते तुम्हाणं समीवे मिच्छत्तं दव्वभावभेयभिन्नं पच्चक्खामि दंसणपडिमं उवसंपज्जामि नो मे कप्पई अज्जपभिई अ अन्नउत्थिअ देवयाणि वा अन्नउत्थियपरिग्गहिआणि वा अर्हंतचेइआणि वा वंदि-

१ "स्वजातिषु" इत्यपि पाठः ।

त्तए वा नमंसित्तए वा पुव्विअणालत्तेणं आलवित्तए वा संलवित्तए वा तेसिं असणं वा पाणं वा खाइमं वा साइमं वा दाउं वा अणुप्पयाउं वा तिविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि तहा अईयं निंदामि पडुप्पन्नं संवरेमि अणागयं पच्चक्खामि अरहंतसक्खिअं सिद्ध-सक्खियं साहुसक्खियं अप्पसक्खियं वोसिरामि तहा दव्वओ खित्तओ कालओ भावओ दव्वओणं एसा दंसण-पडिमा खित्तओणं इहेव वा अन्नत्थ वा कालओणं जाव मासं भावओणं जाव गहेणं न गहिज्जामि जाव छ-लेणं न छलिज्जामि जाव सन्निवाएणं नाभिभविज्जामि ताव मे एसा दंसणपडिमा" शेषं पूर्ववत् प्रदक्षिणात्र-यादिकं। दर्शनप्रतिमास्थिरीकरणार्थं कायोत्सर्गादि। अत्राभिग्रहा मासं यथाशक्त्या आचाम्लादिप्रत्याख्यानं त्रिसन्ध्यं विधिना देवपूजनं पार्श्वस्थादिवन्दनपरिहारः शङ्कादिपञ्चातीचारपरित्यागः राजाभियोगादिषट्के-ऽपि न त्याज्या प्रतिमेयमिति दर्शनप्रतिमा १॥ अथ द्वितीया व्रतप्रतिमा॥ सा च मासद्वयं यावन्निरतीचार-पञ्चाणुव्रतपरिपालनविषया गुणव्रतशिक्षाव्रतप्रतिपालनं सहैव। अत्रैव नन्दिक्षमाश्रमणादि तत्तदभिलापेन पूर्ववत्प्रत्याख्याननियमचर्याद्यास्तथैव दण्डकस्स एव तदभिलापेन इति व्रतप्रतिमा २॥ अथ तृतीया सामायि-कप्रतिमा। सा च मासत्रयं यावदुभयसन्ध्यं सामायिकं कुर्वतो भवति। शेषो नियमनन्दिव्रतादिविधिः स एव दण्डकतदभिलापेन इति सामायिकप्रतिमा ३॥ अथ चतुर्थी पौषधप्रतिमा॥ सा च मासचतुष्टयं यावदष्टमी-चतुर्दश्योः चतुर्विधाहारप्रत्याख्यानरतस्य चतुर्विधपौषधकृतो भवति। द्रव्यादिभेदतः द्विमासादिकालमानेन

यथास्वं चीर्यते ॥ अथ नन्दिव्रतनियमादिविधिः स एव दण्डकस्तदभिलापेन इति पौषधप्रतिमा चतुर्थी ४ ॥ एवं शेषास्वपि प्रतिमासु पञ्चमासादिकालासु अयमेव पूर्वोक्तो विधिः नन्दिक्षमाश्रमणदण्डकादि तत्तदभिलापेन व्रतचर्या सैव परं संप्रति कालविपर्ययात् संहननशैथिल्याद्वा पञ्चमाद्येकादशान्तप्रतिमानुष्ठानविधिर्न दृश्यते। तत्र समकालानुक्रमणिकायां क्रियमाणायां पूर्वप्रतिमारम्भ एव शुभमुहूर्त्ताद्यवलोकनं शेषास्तदनुक्रमेण निरन्तरा विधेया न तासु मुहूर्ताद्यवलोकनं। भिन्नासु तासु च क्रियमाणासु तत्तदारम्भे मुहूर्ताद्यवलोकनं ॥ इति व्रतारोपसंस्कारे सम्यक्त्वसामायिकारोपणविधिः ॥ ॥ अथ श्रुतसामायिकारोपणविधिः ॥ तत्र यतीनां श्रुतसामायिकारोपणं योगोद्वहनविधिभिः श्रुतारोपणमागमपाठेन गृहिणां च योगोद्वहनागमपाठरहितानां श्रुतसामायिकारोपणमुपधानोद्वहनेन श्रुतारोपणं च परमेष्ठिमन्त्रैर्यापथिकीशक्रस्तवचैत्यस्तवचतुर्विंशतिस्तवश्रुतस्तवसिद्धस्तवादि पठेन्। उपधीयते ज्ञानादि परीक्ष्यते अनेनेत्युपधानम्। अथवा चतुर्विधसंवरसमाधिरूपायां सुखशय्यायां उत्तमत्वेनोच्छीर्षकस्थाने उपधीयत इत्युपधानं। तत्रोपधाने षण्णां श्रुतस्कन्धानां परमेष्ठिमन्त्रस्य १ ऐर्यापथिक्याः २ शक्रस्तवस्य ३ अर्हच्चैत्यस्तवस्य ४ चतुर्विंशतिस्तवस्य ५ श्रुतस्तवस्य ६ सिद्धस्तवस्य ७ प्रथमगाथात्रयस्योपधानं विनापि वाचना, शेषास्तद्गाथा आधुनिक्यः श्रुतस्कन्धः आदितः परमेष्ठिमन्त्रमहाश्रुतस्कन्धस्य पञ्चाध्ययनान्येका चूलिका द्विपदाश्चालापकाः सप्ताक्षरप्रमाणानि त्रीणि पदानि अर्हदाचार्योपाध्यायनमस्कृतिरूपाणि द्वितीयपञ्चमपदे सिद्धसाधुनमस्कृतिरूपे पञ्चाक्षरनवाक्षरे। ततः पञ्चपदान-

न्तरं चूलिका। तत्र प्रथमालापो द्विपदरूपः षोडशाक्षरः द्वितीयालापस्तृतीयपदरूपोऽष्टाक्षरः तृतीयालापश्चतुर्थ-पदरूपो नवाक्षरः तत्र पञ्चसु पदेषूद्देशद्वयं चूलिकायामुद्देशत्रयं। तत्र पञ्चसु पदेषु पञ्चत्रिंशदक्षराणि चूलिकायां त्रयस्त्रिंशदक्षराणि पञ्चाध्ययनानि। यथा "नमो अरिहंताणं नमो सिद्धाणं नमो आयरियाणं नमो उवज्झायाणं नमो लोएसव्वसाहूणं" एका चूलिका यथा। "एसो पंचनमुक्कारो सव्वपावप्पणासणो। मंगलाणं च सव्वेसिं पढमं हवइ मंगलं"। द्विपदा आलापका यथा "नमो अरिहंताणं नमो सिद्धाणं" एक आलापः "नमो आयरियाणं नमोउवज्झायाणं" द्वितीयालापः "नमो लोए सव्वसाहूणं" तृतीयालापः "एसो पंचनमुक्कारो सव्वपावप्पणा-सणो" चतुर्थ आलापः "मंगलाणं च सव्वेसिं पढमं हवइ मंगलं" पंचम आलापः। समाक्षरप्रमाणानि त्रीणि पदानि यथा—"नमो अरिहंताणं ७ नमो आयरियाणं ७ नमो उवज्झायाणं ७" अयमेक उद्देशकः। द्वितीयपदं पञ्चाक्षरं 'नमो सिद्धाणं' ५ इति द्वितीय उद्देशकः। पञ्चमपदं नवाक्षरं ९ "नमो लोए सव्व साहूणं" इति तृतीय उद्देशकः। चूलिकायां प्रथमालापः षोडशाक्षरः १६ "एसो पंचनमुक्कारो सव्वपावप्पणासणो" इति चूलिकायां प्रथम उद्देशः। चूलिकायां द्वितीयालापोऽष्टाक्षरः ८ "मंगलाणं च सव्वेसिं" इति चूलिकायां द्वितीय उद्देशः। चूलिकायां तृतीयालापो नवाक्षरः ९ "पढमं हवइ मंगलं" इति चूलिकायां तृतीय उद्देशः। सर्वाक्षराण्यष्ट-षष्टिः ६८ तस्योपधानं यथा नन्दिदेववन्दनकायोत्सर्गक्षमाश्रमणवन्दनकप्रभृति नमस्कारश्रुतस्कन्धाभिलापेन पूर्ववत्। अभिमन्त्रितवासक्षेपश्च। तत्र पूर्वसेवायामेकभक्तान्तरिता उपवासाः पञ्च एवं द्वादशदिनानि। तत्र प्रथमे नन्दिदिने एकभक्तं निर्विकृतिकं वा, द्वितीये उपवासः, तृतीये एकभक्तं, चतुर्थे उपवासः, पञ्चमे एकभक्तं,

षष्ठे उपवासः, सप्तमे एकभक्तं, अष्टमे उपवासः, नवमे एकभक्तं, दशमे उपवासः, एकादशे एकभक्तं, द्वादशे उपवासः इति द्वादशमस्तपः पूर्वसेवायां। तत्र पञ्चपरमेष्ठिपदानां नन्दिं विनापि वाचना देया। शक्रस्तवभणनवासक्षेपपूर्वं नमस्कारत्रयपठनं सर्ववाचनासु। तत्र श्रेणिबद्धा अष्टावाचाम्लाः एवं एकोनविंशतिदिनानि। ततो विंशतितमे दिने एकभक्तं एकविंशतितमे दिने उपवासः द्वाविंशतितमे दिने एकभक्तं त्रयोविंशतितमे दिने उपवासः चतुर्विंशतितमे दिने एकभक्तं पञ्चविंशतितमे दिने उपवासः इत्यष्टमतपः उत्तरसेवायां। ततश्चूलिकावाचना "एसो पंचइत्याद्यारभ्य यावत् हवइ मंगलं" इति नमस्कारस्य उपधानं। ततस्तस्य वाचना तस्यायं विधिः। पूर्वं समाचारीपुस्तकपूजनं पश्चान्मुखवस्त्रिकापिहितवदन ऐर्यापथिकीं प्रतिक्रम्य क्षमाश्रमणपूर्वं भणति—"भगवन्, नमुक्कारवायणा संदिसावणिअं वायणालेवावणिअं वासक्खेवं करेह चेइआइं च वंदावेह" एवं नन्दिं विधाय षड्विंशतितमे दिने एकभक्ते कृते वाचना देया। चतुर्णां चूलिकापदानां सर्वेष्वप्युपधानेषु प्रतिदिनमव्यापारपौषधकरणं प्रातः प्रातः पौषधं पारयित्वा पुनः पुनर्नित्यं पौषधग्रहणं कार्यं नमस्कारसहस्रगुणनं च इति प्रथममुपधानं १ ऐर्यापथिक्या अप्युपधानमेवमेव, नन्दिद्वयमप्याद्यन्तयोस्तदभिलापेन। तत्र वाचनाया अष्टाध्ययनानि वाचनाद्वयं एका चूलिका त्रिपदी—"इच्छामि पडिक्कमिउं इरियावहिआए विराहणाए १ गमणागमणे २ पाणक्कमणे बीअक्कमणे हरिअक्कमणे ३ ओसाउत्तिंगपणगदगमट्टीमक्कडासंताणासंकमणे ४ जे मे जीवा विराहिआ ५ इत्येका वाचना द्वादशतपोनन्तरं दीयते। एगिंदिआ बेंदिआ तेंदिआ चउरिंदिआ पंचेंदिया ६ अभिहया वत्तीया लेसिआ संघाइआ संघट्टिआ परिआविआ किलामिआ उद्द-

विआ ठाणाओठाणं संकामिआ जीविआओ ववरोविआ तस्स मिच्छामि दुक्कडं ७ तस्स उत्तरीकरणेणं० या-वत् ठामि काउस्सग्गं ८ इति द्वितीया वाचना आचाम्लाष्टकान्ते देया । अतः परं "अन्नत्थ ऊससिएणं०" "जाव वोसिरामि" इत्यादि चूलिकावाचना प्रान्तदिने देया इति ऐर्यापथिक्या उपधानं २। अथ शक्रस्तवो-पधानं । नन्द्यादि तदभिलापेन पूर्ववत् । तथा प्रथमदिने एकभक्तं द्वितीये उपवासः तृतीये एकभक्तं चतुर्थे उपवासः पञ्चमे एकभक्तं षष्ठे उपवासः सप्तमे एकभक्तं । तत्र प्रथमा वाचना दीयते तिसृणां संपदां यथा—"नमुत्थुणं अरिहंताणं भगवंताणं १ आइगराणं तित्थयराणं सयसंबुद्धाणं २ पुरिसुत्तमाणं पुरिससीहाणं पुरिसवरपुंडरीआणं पुरिसवरगंधहत्थीणं ३ इत्येका वाचना । नमुत्थुणं पदं भिन्नं तिस्रोऽपि संपदः द्वित्रिचतुः-पदाः तत एकश्रेण्या षोडशाचाम्लाः तत्र पञ्चपञ्चपदानां तिसृणां संपदां वाचना दीयते लोगुत्तमाणं० याव-ल्लोगपज्जोगराणं ४ अभयदयाणं० यावद्बोहिदयाणं ५ धम्मदयाणं जाव धम्मवरचाउरंतचक्कवट्टीणं ६ इति द्वि-तीया वाचना । ततः पुनरपि तयैव श्रेण्या षोडशाचाम्लाः ततः द्वित्रिपदानां तिसृणां संपदां वाचना, "अ-प्पडिहयवरनाणदंसणधराणं विअट्टछउमाणं ७ जिणाणं जावयाणं तिन्नाणं तारयाणं बुद्धाणं बोहयाणं मुत्ताणं मोयगाणं ८ सव्वन्नूणं सव्वदरिसीणं सिवमयलमरुयमणंतमक्खयमव्वाबाहमपुणरावित्तिसिद्धिगइनामधेयं ठाणं संपत्ताणं नमो जिणाणं जियभयाणं ९ इति तृतीयवाचना । अन्तिमगाथाया -[२]"जेअ अईआ सिद्धा जेअ भ-विस्संत णागए काले । संपइअ वट्टमाणा सव्वे तिविहेणं वंदामि" इति रूपायास्तृतीयवाचनया सहैव वाचना इति शक्रस्तवोपधानं ३ । अथ चैत्यस्तवोपधानं । नन्द्यादि पूर्ववत् । प्रथमे एकभक्तं द्वितीये उपवासः तृतीये

एकभक्तं ततः श्रेण्या आचाम्लत्रिकं पर्यन्ते त्रयाणामप्यध्ययनानां समकालमेका वाचना। यथा—"अरिहंतचेइयाणं करेमि काउस्सग्गं वंदणवत्तिआए पूअणवत्तिआए सक्कारवत्तिआए सम्माणवत्तिआए बोहिलाभवत्तिआए निरुवसग्गवत्तिआए १ सद्धाएमोहाए० जाव ठामि काउस्सग्गं २ अन्नत्थ उससिएणं जाव बोसिरामि ३ इत्येकैव वाचना। इति चैत्यस्तवोपधानं। अथ चतुर्विंशतिस्तवोपधानं। नन्दिद्वयं पूर्ववत्। प्रथमदिने एकभक्तं द्वितीये उपवासः तृतीये एकभक्तं चतुर्थे उपवासः पञ्चमे एकभक्तं षष्ठे उपवासः सप्तमे एकभक्तं इत्यष्टमतपः अन्ते प्रथमगाथात्रयस्य वाचना "लोगस्स० यावत्केवली १" इत्येका वाचना। ततश्च श्रेण्यैव द्वादशाचाम्लाः तदन्ते गाथात्रयस्य वाचना—"उसभमंजियं च वंदे० जाव वद्धमाणं च" इति द्वितीयवाचना २ ततस्तच्छ्रेण्यैव त्रयोदशाचाम्लाः तदंते "एवमए अभिच्छुया० यावत्सिद्धा सिद्धिं मम दिसंतु" इति तृतीया वाचना ३ इति चतुर्विंशतिस्तवोपधानं। अथ श्रुतस्तवोपधानं। नन्दिद्वयं पूर्ववत्। प्रथमे दिने एकभक्तं द्वितीये उपवासः तृतीये एकभक्तं तच्छ्रेण्यैव पञ्चाचाम्लाः तदन्ते गाथाद्वयस्य वृत्तद्वयस्यापि समकालं वाचना। तत्र पञ्चाध्ययनानि अध्ययनद्वयं गाथाद्वयेन तृतीयाध्ययनं वसन्ततिलकावृत्तेन चतुर्थाध्ययनं शार्दूलविक्रीडितवृत्तपूर्वार्द्धेन पञ्चमाध्ययनं तदुत्तरार्द्धेन इति श्रुतस्तवोपधानं। इति षडुपधानानि। तथा सिद्धस्तवे प्रथमगाथात्रयस्योपधानं विनैव वाचना शेषागाथा आधुनिक्य इत्युपधानवाचनास्थितिः। अत्र विस्तरो निशीथसिद्धान्तोद्धृतोपधानप्रकरणात् ज्ञेयः। यथा—"पंचनमुक्कारे किल दुवालसतवो उ होइ उवहाणं। अट्ठयआयामाइं एगं तह अट्ठमं अंते ॥१॥ एवं चिय नीसेसं इरियावहि आइ होइ उवहाणं। सक्कच्छयंमि अट्ठममेगं बत्तीस

आयामा ॥२॥ अरिहंतचेइअथए उवहाण मिणं तु होइ कायव्वं । एगं चेव चउत्थं तिन्निअ आयंबिलाणि तहा ॥३॥ एगं चिअ किर छट्ठं चउत्थमेगं तु होइ कायव्वं । पणवीसं आयामा चउवीसछयम्मि उवहाणं ॥ ४ ॥ एगं चेव चउत्थं पंचय आयंबिलाणि नाणथए। चिइवंदणाइ सुत्ते उवहाण मिणं विणिद्दिट्ठं ॥५॥ अव्वावारो विकहा विवज्जिओ रुद्दझाणपरिमुक्को । विस्सामं अ कुणंतो उवहाणं कुणइ उवउत्तो ॥६॥ अह कहवि हुज्ज बालो बुड्ढो वा सत्तिवज्जिओ तरुणो। सो उवहाणपमाणं पूरिज्जा आयसत्तीए ॥७॥ राईभोअणविरई दुविहं तिविहं चउविहं वा वि । नवकारसहिअमाई पच्चक्खाणं विहेऊणं॥८॥ एगेण सुद्ध आयंबिलेणं इअरेहिं दोहिं उववासो । नवकारस्सहिएहिं पणयालीसाइं उववासो ॥९॥ पोरसि च उवीसाए होइ अवड्ढेहिं दसहि उववासो। विगईचाएहिं तिहिं एगट्ठाणे हिअ चऊहिं ॥ १० ॥ आयरणाओ नेयं पुरिमड्ढा सोलसेहिं उववासो। एगासणगा चउरो अट्ठय बेकासणा तहय ॥ ११ ॥ भयवं बहूअ कालो एवं करिंतस्स पाणिणो हुज्जा। तो कहवि हुज्ज मरणं नवकारविवज्जिअस्सा वि ॥ १२॥ नवकारवज्जिओ सो निव्वाणमणुत्तरं कहलभिज्जा । तो पढमं चिअ गिण्हओ उवहाणं होउ वा मा वा ॥ १३ ॥ गोअम जं समयं चिअ सुओवयारं करिज्ज जो पाणी। तं समयं चिअ जाणसु गहिअवयट्ठं जिणाणाए ॥१४॥ एवं कयउवहाणो भवंतरे सुलहबोहिओ हुज्जा। एअब्भवसाणो विहु गोअम आराहओ भणिओ ॥ १५ ॥ जो उ अ काउण मिणं गोअम गिह्लिज्ज भत्तिमंतो वि। सो मणुओ दिट्ठवो अगिण्हमाणेण सारित्थो ॥ १६ ॥ आसायइ तित्थयरं तव्वयणं संघगुरुजणं चेव। आसायणबहुलो सो गोयमसंसारमणुगामी ॥१७॥ पढमं विअकन्नाहे उएण जं पंचमंगलमही अं। तस्स वि उवहाणपरस्स सुलहिआ बो-

हि निदिट्ठा ॥१८॥ इअ उवहाणपहाणं निउणं सयलं पि वंदणविहाणं । जिणपूआपुव्वंचिअ पढिज्ज सुअभणि-
अनीइए ॥ १९ ॥ तं सरवंजणमत्ता बिंदुपयत्थेअट्ठाणपरिसुद्धं । पढऊणं विअवंदणसुत्तं अत्थं विआणिज्जा
॥२०॥ तत्थ य जत्थेव सिआ संदेहो सुत्तअत्थविसयंमि। तं बहुसो वीमंसिय सयलं निस्संकियं कुज्जा ॥२१॥
अह सोहणतिहि-करणे-मुहुत्त-नक्खत्त-जोगलग्गंमि। अणुकूलंमि ससिबले सस्से सस्से अ समयंमि
॥२२॥ निअयविहवाणुरूवं संपाडिअ-भुवणनाह-पूएण । परमभत्तीइ विहिणा पडिलाभिअसाहुवग्गेण॥२३॥
भत्तिभरनिब्भरेणं हरिसवसुल्लसिअबहलपुलएणं । सद्धासंवेग-विवेग-परम-वेरग्ग-जुत्तेणं ॥ २४ ॥ विणिह-
यघणरागदोसमोहमित्थत्तमल्लकलंकेणं । अइ-उल्लसंत-निम्मल-अब्भवसाणेण अणुसमयं ॥ २५ ॥ तिहुअण-
गुरुजिणपडिमाविणिवेसिअनयणमाणसेण तहा। जिणचंदवंदणाओ धन्नोहं मन्नमाणेणं ॥२६॥ निअयसिररइ-
अकरकमलमउलिणा जंतुविरहिओगासे । निस्संकं सुत्तत्थं पए पए भावयंतेणं ॥ २७॥ जिणनाहदिट्ठगंभीर-
समयकुसलेण सुहचरित्तेणं । अपमायाई बहुविहगुणेण गुरुणा तहा सद्धिं ॥ २८ ॥ चउविहसंघजुएणं विसे-
सओ निअयबंधुसहिएणं । इअ विहिणानिउणेणं जिणबिंबं वंदणिज्जंति ॥ २९ ॥ तयणंतरं गुणड्ढे साहू वंदिज्ज
परमभत्तीए । साहम्मिआण कुज्जा जहारिहं तह पणामाई ॥ ३० ॥ जावयम्महग्घमुकिट्ठचुक्खवत्थप्पयाणपु-
व्वेण । पडिवत्तिविहाणेणं कायव्वो गरुअसम्माणो ॥ ३१ ॥ एआवसरे गुरुणा सुविइअगंभीरसमयसारेणं । अ-
क्खेवणिविक्खेवणिसंवेइणिपमुहविहिणाओ ॥ ३२ ॥ भवनिव्वेअपहाणा सद्धासंवेगसाहणे णिउणा । गरुएणं

॥ ५५ ॥

पबंधेणं धम्मकहा होइ कायव्वा ॥ ३३ ॥ सद्धासंवेगपरं सूरी नाऊण तं तओ भव्वं । चिअवंदणाइकरणे इय वयणं भणइ णिउणमई ॥ ३४ ॥ भो भो देवाणुप्पिया संपाविअ निअयजम्मसाफल्लं । तुमए अज्जप्पभिई तिक्कालं जावजीवाए ॥ ३५ ॥ वंदेअव्वाइं चेइआइं एगग्गसुथिरचित्तेणं । खणभंगुराइ मणुअत्तणाओ इणमेव सारंति ॥३६॥ तत्थ तुमे पुव्वण्हे पाणं पि न चेव ताव पायव्वं । नो जाव चेइआइं साहूविअ वंदिआ विहिणा ॥ ३७ ॥ मज्झण्हे पुणरवि वंदिऊण निअमेण कप्पए भुत्तुं । अवरण्हे पुणरवि वंदिऊण नियमेण सुअणंति ॥३८॥ एव-मभिग्गहबंधं काउं तो वद्धमाणविज्जाए । अभिमंतिऊण निण्हइ सत्तगुरुगंधमुट्ठीओ ॥ ३९ ॥ तस्सुत्तमंगदेसे नित्थारगपारगो हविज्ज तुमं । उच्चारे माणो विअ निक्खिवइ गुरु सपणिहाणं ॥४०॥ एआए विज्जाए पभाव-जोगेण एस किरभव्वो । अहिगयकज्जाण लहुं नित्थारगपारगो होउ ॥४१॥ अह चउविहोवि संघो नित्थारग-पारगो हविज्ज तुमं । धन्नो सलक्खणो जंपिरोत्ति निक्खिवइ से गंधे ॥४२॥ तत्तो जिणपडिमाए पूआदेसाओ सुरभिगंधड्ढं । अमिलाणं सिअदामं गिण्हिअगुरुणा सहत्थेणं ॥४३॥ तस्सोभयक्खंधेसु आरोवंतेण सुद्धचि-त्तेण । निस्संदेहं गुरुणा वत्तव्वं एरिसं वयणं ॥ ४४ ॥ भो भो सुलद्धनिअजम्मनिचिअअइगुरुअपुन्नपब्भार । नारयतिरियगईओ तुब्भावस्सं निरुद्धाओ ॥४५॥ नो बंधगोसि सुंदर तुम मित्तो अयसनीयगुत्ताणं । नो दुल्लहो तुह जम्मंतरेवि एसो नमुक्कारो ॥ ४६ ॥ पंचनमुक्कारपभावओ अ जम्मंतरेवि किर तुज्झ । जाईकुलरूवा-रुग्ग-संपयाओ पहाणाओ ॥४७॥ अन्नं च इम्माओ चिअ न हुंति मणुआ कया वि जिअलोए । दासापेसा दुभग्गनी

आ विगलिंदिआ चेव ॥ ४८ ॥ किं बहुणा जे इमिणा विहिणा एअं सुअं अहिज्जित्ता । सुअभणिअविहाणेणं
सुद्धे सीले अभिरमिज्जा ॥ ४९ ॥ नो ते जइ तेणं चिअ भवेण निव्वाण मुत्तमं पत्ता । तोणुत्तरगेविज्जाई एसु
सुइरं अभिरमेउं ॥ ५० ॥ उत्तमकुलंमि उक्किट्ठ–लट्ठ–सव्वंग–सुंदरा पयडा । सव्वकलापत्तट्ठा जणमणआणंदणा
होउ ॥ ५१ ॥ देविंदोवमरिद्धी दया–वरादाण–विणयसंपन्ना । निव्विन्नकामभोगा धम्मं सयलं अणुट्ठेउं ॥ ५२ ॥
सुहझाणानलनिद्दड्ढथाइकम्मिंधणा महासत्ता । उप्पन्नविमलनाणा विहुअमला झत्ति सज्झंति ॥५३॥ इअ वि-
मलफलं मुणिओ जिणस्स महमाणदेवसूरिस्स । वयणा उवहाणमिणं साहेह महानिसीहाओ ॥५४॥ इति उ-
पधानविधिः । षडुपधानयंत्राणि ॥ अथोपधानतपस उद्यापनरूपस्य मालारोपणस्य विधिरुच्यते । स चायं, तत्र
प्राचीन एव नन्दिक्रमः। अयं च विशेषः, मालारोपणं तत्कालं वा उपधानतपसि परिपूर्णे दिनान्तरेषु वा अयं
विधिरनुष्ठीयते तत्र मालारोपणात् प्रथमदिने साधुभ्योऽन्नपानवस्त्रपात्रवसतिपुस्तकदानं दद्यात् । सङ्घस्य
भोजनदानं वस्त्रादिभिः सङ्घार्चनं तस्य तस्मिन् दिने शुभतिथिनक्षत्रवारलग्ने दीक्षोचिते दिने परमयुक्त्या
बृहत्स्नात्रविधिना जिनार्चनं कुर्यात् । मातृपितृपरिजनसाधर्मिकादि मेलयेत् । ततो मालाग्राही कृतनिर्दिष्टो-
चितवेषः कृतधम्मिल्ल उत्तरासङ्गवान् निजवर्णानुसारेण जिनोपवीतोत्तरीयादिधारी प्रगुणीकृतप्रचुरगन्धाद्युप-
करणः अक्षतनालिकेरभृतकरः पूर्ववत् समवसरणं प्रदक्षिणीकुर्यात् त्रिः । ततो गुरुसमीपे क्षमाश्रमणपूर्वं भ-
णति—"इच्छाकारेण तुब्भे अम्हं पंचमंगलमहासुअक्खंधइरिआवहिआसुअक्खंधसक्कच्छयसुअक्खंधचेइअ-

च्छयवसुअक्खंध चउवीसत्थयसुयअक्खंध सुअत्थयसुयक्खंध अणुजाणावणिअं वासक्खेवं करेह। ततो गुरुरभिमन्त्रितवासक्षेपं करोति। पुनः श्राद्धः क्षमाश्रमणपूर्वं भणति—"चेइआइं च वंदावेह।" ततश्चैत्य-वन्दनं वर्द्धमानस्तुतिभिः शान्तिदेव्यादिस्तुतयः पूर्ववत्। पुनः शक्रस्तुत्यर्हणादिस्तोत्रकथनं पूर्ववत्। तत उत्थाय पंचमंगलमहासुअक्खंधपडिक्कमणसुअक्खंधभावार्हं तत्थय ठवणारिहंतत्थय नाणत्थय सिद्धत्थय अणुजाणावणिअं करेमि काउस्सग्गं अन्नत्थ उससिएणं यावअप्पाणं वोसिरामि। चतुर्विंशतिस्तवचिन्तनं पारयित्वा चतुर्विंशतिस्तवपाठः त्रिः। गुरुः परमेष्ठिमन्त्रं पठित्वा निषद्यायामुपविशति। श्राद्धस्य सपरिजनस्य ससङ्घस्य—"भो भो देवाणुप्पिआ संपाविअ निअयजम्मसाफल्लं। तुमए अज्जप्पभिई तिकालं जावज्जी-वाए ॥१॥ वंदेअवाइं चेइआइं एगग्गसुथिरचित्तेणं। खणभंगुराओ मणुअत्तणाओ इणमेव सारंति ॥ २ ॥ तत्थ तुमे पुवण्हे पाणंपि न चेव ताव पायवं। नो जाव चेइयाइं साहूविअ वंदिआ विहिणा ॥ ३ ॥ मज्झण्हे पुणरवि वंदिऊणनिअमेण कप्पए भुत्तुं। अवरण्हे पुणरवि वंदिऊण निअमेण सुअणंति ॥४॥" इत्यादि महानिशीथ-मध्यगतविंशतिगाथोक्तां देशनां कृत्वा त्रिसन्ध्यं चैत्यवन्दनं साधुवन्दनं चैत्याभिग्रहविशेषान् ददाति। ततो वासानभिमन्त्र्य सप्तगन्धमुष्टीः "नित्थारगपारगो होहि" इति भणन् गुरुस्तच्छिरसि प्रक्षिपति। ततोऽक्षतवासान् अभिमन्त्रयेत्। तत्समये सुरभिगन्धाम्लानसितपुष्पसमूहास्तैश्च ग्रथितां मालां जिनप्रतिमापादोपरि न्यस्य सूरिरूर्ध्वीभूय अभिमन्त्रितवासान् जिनपादेषु क्षिपति। सन्निहितसाधुसाध्वीश्रावकश्राविकाजनस्य गन्धाक्ष-

तान् ददाति। श्राद्धो नमस्कारानुज्ञार्थं प्रदक्षिणात्रयं ददाति। गुरुः"नित्थारगपारगो होहि गुरुगुणेहिं वुड्ढाहिं" जनः पूर्णमनोरथो जातोऽसि, धन्यः पुण्यवानसि इति वदन्तः क्रमेण गुरुसङ्घादयो वासान् क्षिपंति। ततः पुनः श्राद्धः समवसरणं त्रिः प्रदक्षिणयेत्। गुरुं च त्रिः, सगुरुं समवसरणं त्रिः, सगुरुं ससङ्घं समवसरणं त्रिः प्रदक्षिणयेत्। ततो नमस्कारादि श्रुतस्कन्धानुज्ञापनार्थं कायोत्सर्गचतुर्विंशतिस्तवचिन्तनं भणनं च। ततस्तत्स्वजनैर्मालाधारिभिः सह प्रतिमाग्रे गत्वा शक्रस्तवं भणित्वा "अणुजाणउ मे भयवं अरिहा" इत्युक्त्वा श्राद्धो जिनपादोपरि पूर्वस्थापितां मालां गृहीत्वा निजबन्धुहस्ते संस्थाप्य नन्दिसमीपे समागत्य श्राद्धो मालां गुरुणा अभिमन्त्रयति। गुरुरूर्ध्वस्थित उपधानविधिं व्याख्याति। सोऽप्यूर्ध्वस्थितः शृणोति। "परमपयपुरीपत्थिए"त्यादि मालोपबृंहणगाथाभिर्गुरुर्देशनां करोति–तदनु ततः—"जिणपडिमाए पूआदेसाओ सुरभिगंधड्ढं। अमिलाणं सिअदामं गिह्निअ गुरुणा सहत्थेण॥ १॥ तस्सोभयक्खंधेसु आरोवंतेण सुद्धचित्तेण। निस्संदेहं गुरुणा वत्तव्वं एरिसं वयणं ॥२॥ भो भो सुलद्धनियजम्मनिचियअइगरुअपुन्नपब्भार। नारयतिरियगईओ, तुब्भ अवस्सं निरुद्धाओ॥३॥ नो बंधगोसि सुंदर तुममित्तो अयसनीयगुत्ताणं। नो दुल्लहो तुह जम्मंतरेवि एसो नमुक्कारो ॥ ४ ॥ पंचनमुक्कारपभावओ य जम्मंतरेवि किर तुब्भ। जाई कुलरूवारुग्गसंपयाओ पहाणाओ ॥५॥ अन्नं च इमा ओचिय न हुंति मणुया कयावि जिअलोए। दासा पेसा दुभग्गनीया विगलिंदिया चेव ॥६॥ किं बहुणा जे इमिणा विहणो एअं सुअं अहिजित्ता। सुअभणिअविहाणेणं सुद्धे सीले अ-

भिरमिज्जा ॥७॥ नो ते जइ तेणं चिय भवेणं निव्वाणमुत्तमं पत्ता । भो णुत्तरगे विज्जाइएसु सुइरं अभिरमेओ ॥ ८ ॥ उत्तमकुलंमि उकिट्ठलट्ठसव्वंगसुंदरापयडा। सव्वकलापत्तट्ठा जणमणआणंदणा होऊ ॥ ९ ॥ देविंदोवमरिद्धीदयावरादाणविणयसंपन्ना । निव्विण्णकामभोगा धम्मं सयलं अणुट्ठेओ ॥ १० ॥ सुहझाणानलनिदड्ढ घाइकम्मिंधणा महासत्ता । उप्पन्नविमलनाणा विहुयमला झत्ति सिज्झंति ॥११॥" इत्थंतरे सुनेवच्छेहिं मालागाहिणो बंधवेहिं। जिणनाहपूयादेसाओ अणुजाणावितु माला आणेयव्वा॥ १ ॥ संपइ सुत्तमईरन्नवच्छच्छुयामालाकीरइ सूरीय तत्थ वासे खिवइ तओ तबंधवहत्थेण तस्स भवस्स कंठे माला पक्खेवणीया इत्थ केइ भणंति पक्खित्तमाला समोसरणे पयाहिणाचउक्कं दिंति संघो य तस्सीसे वासक्खेए पक्खिवइत्ति । तओ पव्वसद्दे वज्जंते मालागाहिणो जिणगओ सपरियणा नच्चंति दाणं च दिंति आयंबिलं उववासो वा तस्स तम्मि दिणे पच्चक्खाणं संपयं उववासा कारविज्जइत्ति दीसइ तओ आरत्तियमाइसावया कुणंति। ७। तओ महया विच्छड्डेणं सावया सावियाओ मालागाहिणं गिहे नेति सोवि गिहगयाण तेसिं सत्तीए वत्थतंबोलाइ देइ जइ पुण वसहीए नंदिरयणा कया तओ चेइहरे समुदाएण गम्मइत्ति सा य माला घरपडिमाअग्गओ ठाविया छम्मासं जाव पूइज्जत्ति ॥ इतिं गाथा वारत्रयं गुरुर्भणति । ततस्तत्स्कन्धे माला प्रक्षेप्या आरात्रिकगीतनृत्यादि बहु क्रियते । श्राद्धेन तद्दिने आचाम्लादि तपः कार्यं । यदि पौषधागारे मालारोपणं तदा ससङ्घश्चैत्यं गम्यते । चैत्यवन्दनां कृत्वा पुनरपि पौषधागारे समेत्य मण्डलपूजादि विधेयं । अयं चोपधानमालारोपणविधिर्निशीथम-

हानिशीथसिद्धान्तपाठिभिः श्रुतसामायिकत्वेन मन्यते । अन्यैस्तत्तिरस्कारपरैर्नोररीक्रियते । तैः प्रतिमोद्वहनविधिरेव श्रुतसामायिकत्वे निर्दिश्यते । मालाश्च कैश्चित्कौशेयपट्टसूत्रमय्यः स्वर्णपुष्पमुक्तामाणिक्यगर्भिता आरोप्यन्ते । कैश्चिच्च शुभ्रकुसुममय्यः । तत्र स्वसंपत्तिः प्रमाणं । इति व्रतारोपसंस्कारे श्रुतसामायिकारोपणम् ॥ अथ तत्प्रसङ्गेन श्राद्धानां दिनचर्या उच्यते । यथा—"मुहूर्त्तद्वय उत्थाय निशाशेषेऽप्युपासकः । कृतमूत्रमलोत्सर्गः कृतशौचो यथाविधि ॥ १ ॥ परमेष्ठिमहामन्त्रं जपन् पूजासनस्थितः । कुलधर्मव्रतश्राद्धपरामर्शी विधाय च ॥२॥ चैत्यवन्दनमाधाय स्तोत्रपाठपुरस्कृतम् । स्वगेहे धर्मगेहे वा स्थित्वावश्यकमाचरेत् ॥ ३ ॥ प्रत्यूषे च ततो गेहे स्नातः शुचिसिची वहन् । अर्चयेद्देवमर्हन्तं भोगमोक्षप्रदायकम् ॥ ४ ॥" ततो जिनार्चनविधिरर्हत्कल्पकथनानुसारेण प्रोच्यते । स यथा—श्राद्धः केवलदृढसम्यक्त्वः प्राप्तगुरूपदेशो निजालये चैत्ये वा बद्धधम्मिल्लः शुचिपरिधानः कृतोत्तरासङ्गः स्ववर्णानुसारेण जिनोपवीतोत्तरीयोत्तरासङ्गभृत् कृतमुखकोशोऽनन्यचित्तः एकान्ते जिनार्चनं कुर्यात् । प्रथमं जलपत्रपुष्पाक्षतफलधूपवह्निदीपगन्धादीनां निष्पापताकरणं—"ॐ आपोऽप्काया एकेन्द्रिया जीवा निरवद्यार्हत्पूजायां निर्व्यथाः सन्तु निरपायाः सन्तु सद्गतयः सन्तु न मेऽस्तु सङ्घट्टनहिंसापापमर्हदर्चने" इति जलाभिमन्त्रणं । "ॐ वनस्पतयो वनस्पतिकाया जीवा एकेन्द्रिया निरवद्यार्हत्पूजायां निर्व्यथाः सन्तु निरपायाः सन्तु सद्गतयः सन्तु नमेऽस्तु सङ्घट्टनहिंसापापमर्हदर्चने" इति पत्रपुष्पफलधूपचन्दनाद्यभिमन्त्रणं ।"ॐ अग्नयोऽग्निकाया जीवा एकेन्द्रिया निरवद्यार्हत्पूजायां निर्व्यथाः सन्तु

निरपायाः सन्तु सद्गतयः सन्तु नमेऽस्तु सद्दत्तनहिंसापापमर्हदर्चने" इति वह्निदीपाद्यभिमन्त्रणं। सर्वेषामभि-
मन्त्रणं वासक्षेपेण त्रिस्त्रिः। ततः पुष्पगन्धादि हस्ते गृहीत्वा, "ॐ असरूपोऽहं संसारिजीवः सुवासनः सुमेधा
एकचित्तो निरवद्यार्हदर्चने निर्व्यथो भूयासं निष्पापो भूयासं निरुपद्रवो भूयासं मत्संश्रिता अन्येऽपि संसा-
रिजीवा निरवद्यार्हदर्चने निर्व्यथा भूयासुः निष्पापा भूयासुः निरुपद्रवा भूयासुः" इति स्वस्य तिलककरणं
पुष्पादिभिः स्वशिरोऽर्चनं। पुनः पुष्पाक्षतादि करे गृहीत्वा "ॐ पृथिव्यप्तेजोवायुवनस्पतित्रसकाया एकद्वि-
त्रिचतुष्पञ्चेन्द्रियास्तिर्यङ्मनुष्यनारकदेवगतिगताश्चतुर्दशरज्ज्वात्मकलोकाकाशनिवासिनः इह जिनार्चने कृता-
नुमोदनाः सन्तु निष्पापाः सन्तु निरपायाः सन्तु सुखिनः सन्तु प्राप्तकामाः सन्तु मुक्ताः सन्तु बोधमाप्नुवन्तु।"
इति दशस्वपि दिक्षु गन्धजलाक्षतादिक्षेपः। ततः—"शिवमस्तु सर्वजगतः परहितनिरता भवन्तु भूतगणाः।
दोषाः प्रयान्तु नाशं सर्वत्र सुखी भवतु लोकः ॥ १ ॥ सर्वेऽपि सन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भ-
द्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥२॥" इत्यार्यानुष्टुप्पाठः। "ॐ भूतधात्री पवित्रास्तु अधिवासि-
तास्तु सुप्रोक्षितास्तु" इति जलेन पूर्वलिप्तभूमौ प्रोक्षणं। ततः "ॐ स्थिराय शाश्वताय निश्चलाय पीठाय नमः।"
इति प्रक्षालितचन्दनलिप्तस्वस्तिकाङ्कितपूजापट्टस्थालादिस्थापनं। चैत्ये तु स्थिरबिंबे एताभ्यां मन्त्राभ्यां तद्भू-
मिजलपट्टाद्यधिवासनं। ततः—"ॐ अत्र क्षेत्रे अत्र काले नामार्हन्तो रूपार्हन्तो द्रव्यार्हन्तो भावार्हन्तः स-
मागताः सुस्थिताः सुनिष्ठिताः सुप्रतिष्ठाः सन्तु।" इत्यर्हत्प्रतिमास्थापनं। निश्चलबिंबे चरणाधिवासनं। ततो-

ऽञ्जल्यग्रे पुष्पं गृहीत्वा, "ॐ नमोऽर्हद्भ्यः सिद्धेभ्यः तीर्णेभ्यः तारकेभ्यो बोधकेभ्यः सर्वजन्तुहितेभ्यः इहँ कल्पनाबिंबे भगवन्तोऽर्हन्तः सुप्रतिष्ठिताः सन्तु।" इति मौनेन कथयित्वा भगवच्चरणोपरि पुष्पस्थापनं। पुष्पेण पुनरपि जलार्द्रितेन पूजापूर्वकं कथनं। यथा—"स्वागतमस्तु सुस्थितिरस्तु सुप्रतिष्ठास्तु।" ततः पुष्पाभिषेकेण—"अर्घ्यमस्तु पाद्यमस्तु आचमनीयमस्तु सर्वोपचारैः पूजास्तु।" एभिर्वचनैः पुनर्जिनप्रतिमोपरि जलार्द्रितपुष्पारोपणं विधीयते। ततो जलं गृहीत्वा मन्त्रश्लोकः—"ॐ अर्हं वं-जीवनं तर्पणं हृद्यं प्राणदं मलनाशनम्। जलं जिनार्चनेऽत्रैव जायतां सुखहेतवे ॥ १ ॥" इति जलेन प्रतिमाभिषेचनं स्नपनं च। ततश्चन्दनकुङ्कुमकर्पूरकस्तूरीप्रभृतिगन्धं करे गृहीत्वा, श्लोकः—"ॐ अर्हं लं-इदं गन्धं महामोदं बृंहणं प्रीणनं सदा। जिनार्चनेऽत्र सत्कर्मसंसिद्ध्यै जायतां मम ॥ १ ॥" इति विविधगन्धैः प्रतिमाविलेपनं। ततः पुष्पपत्रिकादि हस्ते गृहीत्वा-श्लोकः—"ॐ अर्हं क्षं-नानावर्णं महामोदं सर्वत्रिदशवल्लभम्। जिनार्चनेऽत्र संसिद्ध्यै पुष्पं भवतु मे सदा ॥ १ ॥" इति पुष्पपूजा। अक्षतान् गृहीत्वा—"ॐ अर्हं तं-प्रीणनं निर्मलं बल्यं माङ्गल्यं सर्वसिद्धिदम्। जीवनं कार्यसंसिद्ध्यै भूयान्मे जिनपूजने ॥ १ ॥" इति अक्षतान् जिनप्रतिमोपरि आरोपयेत्। ततः पूगजातीफलादि वर्त्तमानर्त्तुफलं वा करे गृहीत्वा—"ॐ अर्हं फुः-जन्मफलं स्वर्गफलं पुण्यमोक्षफलं फलम्। दद्याज्जिनार्चनेऽत्रैव जिनपादाग्रसंस्थितम् ॥ १ ॥" इति जिनपादाग्रे फलपूजा। ततो धूपं गृहीत्वा—"ॐ अर्हं रं-श्रीखण्डागरुकस्तूरीद्रुमनिर्याससंभवः। प्रीणनः सर्वदेवानां धूपोऽस्तु जिनपूजने ॥१॥" इति वह्नौ धूपक्षेपः। पुष्पं गृहीत्वा—"ॐ अर्हं रं-पञ्चज्ञानमहाज्योतिर्मयोऽयं ध्वान्तघातने। द्योतनाय

प्रतिमाया दीपो भूयात्सदार्हतः ॥१॥" इति दीपमध्ये पुष्पन्यासः। ततः पुष्पाणि गृहीत्वा—"ॐ अर्हं भगवद्भ्योऽर्हद्भ्यो जलगन्धपुष्पाक्षतफलधूपदीपैः संप्रदानमस्तु ॐ पुण्याहं पुण्याहं प्रीयन्तां प्रीयन्तां भगवन्तोऽर्हन्तस्त्रिलोकस्थिता नामाकृतिद्रव्यभावयुताः स्वाहा।" इति पुनर्जिनपूजनं। ततो वासान् गृहीत्वा—"ॐ सूर्यसोमाङ्गारकबुधगुरुशुक्रशनैश्चरराहुकेतुमुखा ग्रहा इह जिनपादाग्रे समायान्तु पूजां प्रतीच्छन्तु" इत्युक्त्वा जिनपादाधःस्थापितग्रहेषु स्नानपट्टे वा वासान् निक्षिपेत्। ततः—"आचमनमस्तु गन्धमस्तु पुष्पमस्तु अक्षतमस्तु फलमस्तु धूपोऽस्तु दीपोऽस्तु," इति क्रमेण जलगन्धपुष्पाक्षतफलधूपदीपैर्ग्रहाणां पूजा। ततोऽञ्जल्यग्रे पुष्पं गृहीत्वा—"ॐ सूर्यसोमाङ्गारकबुधगुरुशुक्रशनैश्चरराहुकेतुमुख्या ग्रहाः सुपूजिताः सन्तु सानुग्रहाः सन्तु तुष्टिदाः सन्तु पुष्टिदाः सन्तु माङ्गल्यदाः सन्तु महोत्सवदाः सन्तु" इति ग्रहेषु पुष्पारोपणं। पुनरनयैव रीत्या—"ॐ इन्द्राग्नियमनिर्ऋतिवरुणवायुकुबेरेशाननागब्रह्माणो लोकपालाः सविनायकाः सक्षेत्रपालाः इह जिनपादाग्रे समागच्छन्तु पूजां प्रतीच्छन्तु" इति पूजापट्टोपरि लोकपालानां वासक्षेपः। ततः—"आचमनमस्तु गन्धमस्तु पुष्पमस्तु अक्षतमस्तु फलमस्तु धूपोऽस्तु दीपोऽस्तु" इति क्रमेण जलगन्धपुष्पाक्षतफलधूपदीपैर्लोकपालानां पूजा। ततोऽञ्जल्यग्रे पुष्पं गृहीत्वा—"ॐ इन्द्राग्नियमनिर्ऋतिवरुणवायुकुबेरेशाननागब्रह्माणो लोकपालाः सविनायकाः सक्षेत्रपालाः सुपूजिताः सन्तु सानुग्रहाः सन्तु तुष्टिदाः सन्तु पुष्टिदाः सन्तु माङ्गल्यदाः सन्तु महोत्सवदाः सन्तु।" इति लोकपालेषु पुष्पारोपणं। ततः पुष्पाञ्जलिं गृहीत्वा

—"अस्मत्पूर्वजा गोत्रसंभवा देवगतिगताः सुपूजिताः सन्तु सानुग्रहाः सन्तु तुष्टिदाः सन्तु पुष्टिदाः सन्तु माङ्गल्यदाः सन्तु महोत्सवदाः सन्तु।" इति जिनपादाग्रे पुष्पाञ्जलिं क्षिपेत्। ततः पुनरपि पुष्पाजलिं गृहीत्वा—"ॐ अर्हं अर्हद्भक्ताष्टनवत्युत्तरशतं १९८ देवजातयः सदेभ्यः पूजां प्रतीच्छन्तु सुपूजिताः सन्तु सानु० तुष्टि० पुष्टि० माङ्गल्य० महोत्सवदाः सन्तु।" इत्युक्त्वा जिनपादाग्रे पुष्पाञ्जलिं क्षिपेत्। ततोऽञ्जल्यग्रे पुष्पं धृत्वा अर्हन्मन्त्रं स्मृत्वा तेन पुष्पेण जिनप्रतिमां पूजयेत्। अर्हन्मन्त्रो यथा—"ॐ अर्हं नमो अरिहंताणं, ॐ अर्हं नमो सयंसंबुद्धाणं, ॐ अर्हं नमो पारगयाणं। "अयं तु त्रिपदो मन्त्रः श्रीमतामर्हतां परः। भोगमोक्षप्रदो नित्यं सर्वपापनिकृन्तनः॥ १॥ न स्पृष्टेभ्योऽपवित्रैश्च नान्यचित्तैर्न सस्वरम्। न श्राव्यश्च नास्तिकानां नैव मिथ्यादृशामपि॥ २॥" ततोऽष्टोत्तरशतं तदर्द्धं वा मन्त्रजापः। ततो नैवेद्यढौकनं पात्रद्वयेन। तत एकपात्रजलं चुलुके गृहीत्वा—"ॐ अर्हं—नानाषड्रससंपूर्णं नैवेद्यं सर्वमुत्तमम्। जिनाग्रे ढौकितं सर्वसंपदे मम जायताम्॥ १॥" प्रत्येकं तत्र नैवेद्ये जलचुलुकक्षेपः। पुनर्जलचुलुकं गृहीत्वा—"ॐ सर्वे गणेशक्षेत्रपालाद्याः सर्वे ग्रहाः सर्वे दिक्पालाः सर्वेऽस्मत्पूर्वजोद्भवा देवाः सर्वेऽष्टनवत्युत्तरशतं देवजातयः सदेभ्योऽर्हद्भक्ता अनेन नैवेद्येन सन्तर्पिताः सन्तु सानु० तुष्टि० पुष्टि० माङ्गल्य० महो०" इति द्वितीयनैवेद्यस्योपरि चुलुकक्षेपः। इति जिनार्चनविधिः। "यो जन्मकाले पुरुषोत्तमस्य सुमेरुशृङ्गे कृतमज्जनैश्च। देवैः प्रदत्तः कुसुमाञ्जलिः स ददातु सर्वाणि समीहितानि॥ १॥ राज्याभिषेकसमये त्रिदशाधिपेन छत्रध्वजाङ्कुतलयोः पद-

योर्जिनस्य । क्षिप्तोऽतिभक्तिभरतः कुसुमाञ्जलिर्यः स प्रीणयत्वनुदिनं सुधियां मनांसि ॥ २ ॥ देवेन्द्रैः कृतकेवले जिनपतौ सानन्दभक्त्यागतैः सन्देहव्यपरोपणक्षमशुभव्याख्यानबुद्धाशयैः । आमोदान्वितपारिजातकुसुमैर्यत्स्वामिपादाग्रतो मुक्तः स प्रतनोतु चिन्मयहृदां भद्राणि पुष्पाञ्जलिः ॥ ३ ॥" इति वृत्तत्रयेण पुष्पाञ्जलित्रयक्षेपः । "लावण्यपुण्याङ्गभृतोऽर्हतो यस्तद्दृष्टिभावं सहसैव धत्ते । स विश्वभर्तुर्लवणावतारो गर्भावतारं सुधियां विहन्तु ॥ १ ॥ लावण्यैकनिधेर्विश्वभर्तुस्तद्वृद्धिहेतुकृत् । लवणोत्तारणं कुर्याद्भवसागरतारणम् ॥ २ ॥" इति वृत्तद्वयेन द्विवेलं लवणोत्तारणं । "सक्षारतां सदासक्तां निहन्तुमिव सोद्यमः । लवणाब्धिर्लवणांबुमिषात्ते सेवते पदौ ॥ १ ॥" इति लवणमिश्रपानीयोत्तारणं । "भुवनजनपवित्रताप्रमोदप्रणयनजीवनकारणं गरीयः । जलमविकलमस्तु तीर्थनाथक्रमसंस्पर्शि सुखावहं जनानाम् ॥ १ ॥" अनेन केवलजलप्रक्षेपः । "सप्तभीतिविघातार्हं सप्तव्यसननाशकृत् । यत्सप्तनरकद्वारसप्तारारि(ति)तुलां गतम् ॥ १ ॥ सप्ताङ्गराज्यफलदानकृतप्रमोदं तत्सप्ततत्त्वविदनन्तकृतप्रबोधम् । तच्छक्रहस्तधृतसङ्गतसप्तदीपमारात्रिकं भवतु सप्तमसद्गुणाय ॥ २ ॥" इति आरात्रिकावतरणं । "विश्वत्रयभवैर्जीवैः सदेवासुरमानवैः । चिन्मङ्गलं श्रीजिनेन्द्रात्प्रार्थनीयं दिने दिने ॥ १ ॥ यन्मङ्गलं भगवतः प्रथमार्हतः श्रीसंयोजने प्रतिबभूव विवाहकाले । सर्वासुरासुरवधूमुखगीयमानं सप्तर्षिभिश्च सुमनोभिरुदीर्यमाणं ॥ २ ॥ दास्यं गतेषु सकलेषु सुरासुरेषु राज्येऽर्हतः प्रथमसृष्टिकृतो यदासीत् । सन्मङ्गलं मिथुनपाणिगततीर्थवारिपादाभिषेकविधिना न्युपचीयमानम् ॥ ३ ॥

यद्विश्वाधिपतेः समस्ततनुभृत्संसारनिस्तारणे तीर्थे पुष्टिमुपेयुषि प्रतिदिनं वृद्धिं गतं मङ्गलम् । तत्संप्रत्युपनीतपूजनविधौ विश्वात्मनामर्हतां भूयान्मङ्गलमक्षयं च जगते स्वस्त्यस्तु सङ्घाय च ॥ ४ ॥" इति वृत्तचतुष्टयेन मङ्गलप्रदीपोल्लासः । ततः शक्रस्तवपाठः । इति जिनार्चनविधिः । अथ कश्चनापि श्राद्धो निर्भरार्हद्भक्तिर्नित्यं पर्वणि कार्यान्तरे वा जिनस्नात्रं चिकीर्षति तस्य चायं विधिः । पूर्वस्नात्रपीठे पूर्वोक्तप्रकारेण दिक्पालग्रहान्यदेवतापूजनवर्जितेन जिनप्रतिमां संपूज्य तथारात्रिकं विधाय मङ्गलदीपवर्जितं श्राद्धः पूर्वोपचारयुक्तो गुरुसमक्षं सङ्घे मिलिते चतुर्विधे गीतवाद्याद्युत्सवे पुष्पाञ्जलिं करे गृहीत्वा—"नमो अरिहंताणं नमोऽर्हत्सिद्धा० वृत्तद्वयं शार्दूलमालिनीरूपं(पठेत्) "कल्याणं कुलवृद्धिकारि कुशलश्लाघार्हमत्यद्भुतं सर्वांघप्रतिघातनं गुणगणालङ्कारविभ्राजितम् । कान्तिश्रीपरिरंभणप्रतिनिधिप्रख्यं जयत्यर्हतां ध्यानं दानवमानवैर्विरचितं सर्वार्थसंसिद्धये ॥ १ ॥ भुवनभवनपापध्वान्तदीपायमानं परमतपरिघातप्रत्यनीकायमानम् । धृतिकुवलयनेत्रावश्यमन्त्रायमाणं जयति जिनपतीनां ध्यानमभ्युत्तमानाम् ॥ २ ॥" इति पुष्पाञ्जलिक्षेपः । "कर्पूरसिल्हाधिककाकतुण्डकस्तूरिकाचन्दननन्दनीयः । धूपो जिनाधीश्वरपूजनेऽत्र सर्वाणि पापानि दहत्वजस्रम् ॥ १ ॥" अनेन वृत्तेन सर्वपुष्पाञ्जल्यन्तराले धूपोत्क्षेपः शक्रस्तवपाठश्च । ततो जलकलशं गृहीत्वा श्लोकवसन्ततिलके पठेत्—"केवली भगवानेकः स्याद्वादी मण्डनैर्विना । विनापि परिवारेण वन्द्यते प्रभुतोर्जितः ॥ १ ॥ तस्येशितुः प्रतिनिधिः सहजश्रियाढ्यः पुष्पैर्विनापि हि विना वसनप्रतानैः । गन्धैर्विना मणिमयाभरणै-

विनापि लोकोत्तरं किमपि दृष्टिसुखं ददाति ॥ २ ॥" इति प्रतिमायाः कलशाभिषेकः । पुष्पालङ्कारादीनामवतारणं । ततः पुनः पुष्पाञ्जलिं गृहीत्वा वृत्तद्वयं पठेत्—"विश्वानन्दकरी भवाम्बुधितरी सर्वापदां कर्त्तरी मोक्षाध्वैकविलङ्घनाय विमला विद्या परं खेचरी । दृष्टयुद्भावितकल्मषापनयने बद्धप्रतिज्ञा दृढं रम्यार्हत्प्रतिमा तनोतु भविनां सर्वं मनोवाञ्छितम् ॥ १ ॥ परमतररमासमागमोत्थप्रसृमरहर्षविभासिसन्निकर्षा । जयति जगदिनस्य शश्वदीप्तिः प्रतिमा कामितदायिनी जनानाम् ॥ २ ॥" इति पुनः पुष्पाञ्जलिक्षेपः । पुनः पूर्वोक्तवृत्तेन धूपोत्क्षेपः शक्रस्तवपाठः । पुनः पुष्पाञ्जलिं करे गृहीत्वा पृथ्वीमन्दाक्रान्तारूपं वृत्तद्वयं पठेत्—"न दुःखमतिमात्रकं न विपदां परिस्फूर्जितं न चापि यशसां क्षतिर्न विषमा नृणां दुःस्थता । न चापि गुणहीनता न परमप्रमोदक्षयो जिनार्चनकृतां भवे भवति चैव निःसंशयम् ॥ १ ॥ एतत्तत्त्वं परममसमानन्दसंपन्निदानं पातालौकःसुरनरहितं साधुभिः प्रार्थनीयम् । सर्वारंभोपचयकरणं श्रेयसां सन्निधानं साध्यं सर्वैर्विमलमनसा पूजनं विश्वभर्त्तुः ॥ २ ॥" इति पुनः पुष्पाञ्जलिक्षेपः । ततो धूपं करे गृहीत्वा शार्दूलार्योवृत्तद्वयं पठेत्—"कर्पूरागरुसिल्हचन्दनबलामांसीशशैलेयकश्रीवासद्रुमधूपरालघुसृणैरत्यन्तमामोदितः । व्योमस्थः प्रसरच्छशाङ्ककिरणज्योतिःप्रतिच्छादको धूमो धूपकृतो जगत्त्रयगुरोः सौभाग्यमुत्तंसतु ॥ १ ॥ सिद्धाचार्यप्रभृतीन् पञ्चगुरून् सर्वदेवगणमधिकम् । क्षेत्रे काले धूपः प्रीणयतु जिनार्चनारचितः ॥ २ ॥" इति धूपोत्क्षेपः शक्रस्तवपाठश्च । पुनः पुष्पाञ्जलिं गृहीत्वा वसन्ततिलकोपजाती पठेत् ।

"जन्मन्यनन्तसुखदे भुवनेश्वरस्य सुत्रामभिः कनकशैलशिरःशिलायाम् । स्नात्रं व्यधायि विविधांबुधिकूपवापीकासारपल्वलसरित्सलिलैः सुगन्धैः ॥ १ ॥ तां बुद्धिमाधाय हृदीह काले स्नात्रं जिनेन्द्रप्रतिमागणस्य । कुर्वन्ति लोकाः शुभभावभाजो "महाजनो येन गतः स पन्थाः" ॥ २ ॥" इति पुष्पाञ्जलिक्षेपः । ततो वृत्तं—"परिमलगुणसारसद्गुणाढ्या बहुसंसक्तपरिस्फुरद्द्विरेफा । बहुविधबहुवर्णपुष्पमाला वपुषि जिनस्य भवत्वमोघयोगा ॥ १ ॥" अनेन वृत्तेन आपादान्तशिरोऽन्तं जिनप्रतिमायां पुष्पारोपणं । "कर्पूरसिल्हाधि०" अनेन धूपोत्क्षेपः शक्रस्तवपाठः । पुनः पुष्पाञ्जलिं करे गृहीत्वा शार्दूलोपजाती पठेत्—"यः साम्राज्यपदोन्मुखे भगवति स्वर्गाधिपैर्गुम्फितो मन्त्रित्वं बलनाथतामधिकृतिं स्वर्णस्य कोशस्य च । बिभ्रद्भिः कुसुमाञ्जलिर्विनिहितो भक्त्या प्रभोः पादयोर्दुःखौघस्य जलाञ्जलिः स तनुतादालोकनादेव हि ॥ १ ॥" चेतः समाधातुमतीन्द्रियार्थं पुण्यं विधातुं गणनाव्यतीतं । निक्षिप्यतेऽर्हत्प्रतिमापदाग्रे पुष्पाञ्जलिः प्रोद्गतभक्तिभावैः ॥ २ ॥" इति पुष्पाञ्जलिक्षेपः । सर्वेषां पुष्पाञ्जलीनामन्ते शक्रस्तवपाठः कर्त्तव्यः । एवं धूपोत्क्षेपश्च । ततोऽनन्तरं पुष्पादिभिः प्रतिमा पूज्यते । ततः स्नात्रकलशप्रगुणीकरणं । ततः कलशास्तु मणिस्वर्णरूप्यताम्रमिश्रधातुमृण्मयाः ते च स्नात्रचतुष्किकोपरिस्थाप्याः तेषु सर्वजलाशयोदकानि गङ्गोदकमिश्राणि निवेशयेत् । चन्दनकुङ्कुमकर्पूरादिभिः सुगन्धद्रव्यैर्वासयेत् । चन्दनादिभिः कुसुममालाभिः कलशान् पूजयेत् । जलपुष्पाद्यभिमन्त्रणमन्त्रास्ते पूर्वोदिता एव । ततः स एकः श्राद्धोऽन्येऽपि च बहवः पूर्वोदितवेषशौचभाजो

गन्धानुलिप्तकरा मालाविभूषितकण्ठाः तान् कलशान् करे दधति । ततस्ते च स्वस्वप्रज्ञानुसारेण जिनजन्माभिषेकाङ्कितस्नात्रस्तोत्राणि सजिनस्तुतिषट्पदानि पठन्ति । ततः शार्दूलवृत्तं—"जाते जन्मनि सर्वविष्टपपतेरिन्द्रादयो निर्जरा नीत्वा तं करसंपुटेन बहुभिः सार्द्धं विशिष्टोत्सवे । श्रृङ्गे मेरुमहीधरस्य मिलिते सानन्ददेवीगणे स्नात्रारंभमुपानयन्ति बहुधा कुंभाम्बुगन्धादिकम् ॥ १ ॥ आर्या । योजनमुखान् रजतनिष्कमयान्मिश्रधातुमृद्रचितान् । दधते कलशान् सङ्ख्या तेषां युगषट्खदन्ति (८०६४) मिता ॥ २ ॥ आर्या । वापीकूपह्रदांबुधितडागपल्वलनदीझरादिभ्यः । आनीतैर्विमलजलैस्तानधिकं पूरयन्ति च ते ॥ ३ ॥ शार्दूलवृत्तम् । कस्तूरीघनसारकुङ्कुमसुराश्रीखण्डकक्कोलकैर्ह्रीवेरादिसुगन्धवस्तुभिरलं कुर्वन्ति तत्संवरम् । देवेन्द्रा वरपारिजातबकुलश्रीपुष्पजातीजपामालाभिः कलशाननानि दधते संप्राप्तहारस्त्रजः ॥ ४ ॥ ईशानाधिपतेर्निजाङ्ककुहरे संस्थापितं स्वामिनं सौधर्माधिपनिर्मिताद्भुतचतुःप्रांशूक्षश्रृङ्गोद्गतैः । धारावारिभरैः शशाङ्कविमलैः सिञ्चन्त्यनन्यातयं[2]ः शेषाश्चैव सुराप्सरःसमुदयाः कुर्वन्ति कौतूहलम् ॥ ५ ॥ वसन्ततिलकावृत्तम् । वीणामृदंगतिमिलार्द्रकराहनूरढक्काहुडुक्कपणवस्फुटकाहलाभिः । सद्वेणुझर्झरकदुन्दुभिषुं (षु) णीभिर्वाद्यैः सृजन्ति सकलाप्सरसो विनोदम् ॥ ६ ॥ श्लोकः । शेषाः सुरेश्वरास्तत्र गृहीत्वा करसंपुटैः । कलशांस्त्रिजगन्नाथं स्नपयन्ति महामुदः ॥ ७ ॥ शार्दूलवृत्तम् । तस्मिन् तादृश उत्सवे वयमपि स्वर्लोकसंवासिनो भ्रान्ता

१ सेचनकशृङ्गं शृङ्गाकृति पीचकारीतिलोके प्रसिद्धमन्यतमपात्रम्. २ अत्रानन्यातंवा अनन्यातंयो वा पाठान्तरं प्रतिभाति । आतवशब्दो हिंसापर्यायः.

जन्मविवर्त्तनेनेन विहितश्रीतीर्थसेवाधियः । जातास्तेन विशुद्धबोधमधुना संप्राप्य तत्पूजनं स्मृत्वैतत्करवाम विष्टपविभोः स्नात्रं मुदामास्पदम् ॥ ८ ॥ वालत्तणम्मि सामि अ सुमेरुसिहरम्मि कणयकलसेहिं । तिअसासुरेहिं न्हविओ ते धन्ना जेहिं दिट्ठोसि ॥ ९ ॥" इति कलशैः प्रतिमाभिषेचनं । ततः सर्वेऽपि गुरुक्रमविशेषेण पुरुषाः स्त्रियोऽपि गन्धोदकैः स्नात्रं कुर्वन्ति । ततोऽभिषेकान्ते गन्धोदकपूर्णं कलशं गृहीत्वा वसन्ततिलकावृत्तं पठित्वा । सङ्घे चतुर्विध इह प्रतिभासमाने श्रीतीर्थपूजनकृतप्रतिभासमेते । गन्धोदकैः पुनरपि प्रभवत्वजस्रं स्नात्रं जगत्रयगुरोरतिपूतधारैः ॥ १ ॥" इति जिनपादोपरि कलशाभिषेकं विधाय स्नात्रनिवृत्तिः । पञ्चामृतस्नात्रयुक्तिस्तु शान्तिकपौष्टिकप्रतिष्ठोपयोगितया बृहत्स्नात्रविधौ कथयिष्यते । आर्हतश्वेतांबरमते पञ्चामृतस्नात्रविधिः शान्तिकादिषु भवति । नित्यपर्वस्नात्रं गन्धोदकैरेव । ततः पुष्पाञ्जलिं गृहीत्वा वृत्तं पठेत्—"इन्द्राग्ने यम निर्ऋते जलेश वायो वित्तेशेश्वर भुजगा विरञ्चिनाथ । सङ्घटाधिकतमभक्तिभारभाजः स्नात्रेऽस्मिन् भुवनविभोः श्रियं कुरुध्वम् ॥ १ ॥" इति स्नपनपीठपार्श्वस्थकल्पितदिक्पालपीठोपरि पुष्पाञ्जलिं क्षिपेत् । ततस्तत्पीठोपरि दिक्षु यथाक्रमं दिक्पालान् स्थापयेत् । तत एकैकं दिक्पालं प्रति पूजा । इन्द्रं प्रति शिखरिणीवृत्तपाठः—"सुराधीश श्रीमन् सुदृढतरसम्यक्त्ववसते शचीकान्तोपान्तस्थितविबुधकोट्यानतपद । ज्वलद्वज्राघातक्षपितदनुजाधीशकटक प्रभोः स्नात्रे विघ्नं हर हर हरे पुण्यजयिनाम् ॥ १ ॥" ॐ शक्र इह जिनस्नात्रमहोत्सवे आगच्छ २ इदं जलं गृहाण २ गन्धं गृहाण २ धूपं गृहाण २ दीपं गृहाण २

नैवेद्यं गृहाण २ विघ्नं हर २ दुरितं हर २ शान्तिं कुरु २ तुष्टिं कुरु २ पुष्टिं कुरु २ वृद्धिं कुरु २ स्वाहा ।" इति पुष्पगन्धादिभिरिन्द्रपूजनं १ अग्निं प्रति व्यपच्छंदसिकवृत्तपाठः—"बहिरन्तरनन्ततेजसा विदधत्कारणकार्यसङ्गतिम् । जिनपूजन आशुशुक्षिणे कुरु विघ्नप्रतिघातमञ्जसा ॥ १ ॥" ॐ अग्ने इह० पूर्ववत् २ यमं प्रति वसन्ततिलकापाठः—"दीप्ताञ्जनप्रभ तनोतु च सन्निकर्षं वाहारिवाहन समुद्धर दण्डपाणे । सर्वत्रतुल्यकरणीय करस्थधर्म कीनाश नाशय विपद्विशरं क्षणेऽत्र ॥ १ ॥" ॐ यम इह० शेषं पूर्ववत् । ३ निर्ऋतिं प्रति आर्यापाठः—"राक्षसगणपरिवेष्टित चेष्टितमात्रप्रकाशहतशत्रो । स्नात्रोत्सवेऽत्र निर्ऋते नाशय सर्वाणि दुःखानि ॥ १ ॥" ॐ निर्ऋते इह० पूर्ववत् । ४ । वरुणं प्रतिस्रग्धरावृत्तपाठः—"कल्लोलानीतलोलाधिककिरणगणस्फीतरत्नप्रपञ्चप्रोद्भूतौर्वाग्निशोभं वरमकरमहापृष्ठदेशोक्तमानम् । चञ्चचीरल्लिशृङ्गिप्रभृतिझषगणैरञ्चितं वारुणं नो वर्ष्म च्छिन्द्यादपायं त्रिजगदधिपतेः स्नात्रसत्रे पवित्रे ॥ १ ॥" ॐ वरुण इह० पूर्ववत् । ५ । वायुं प्रति मालिनीवृत्तपाठः । "ध्वजपटकृतकीर्त्तिस्फूर्त्तिदीप्यद्विमानप्रसृमरबहुवेगत्यक्तसर्वोपमान । इह जिनपतिपूजासन्निधौ मातरिश्वन्नपनय समुदायं मध्यबाह्यातपानाम् ॥ १ ॥" ॐ वायो इह० पूर्ववत् । कुबेरं प्रति वसन्ततिलकावृत्तपाठः । "कैलाशवासविलसत्कमलाविलाससंशुद्धहासकृतदौस्थ्यकथानिरास । श्रीमत्कुबेरभगवन् स्नपनेऽत्र सर्वविघ्नं विनाशय शुभाशय शीघ्रमेव ॥ १ ॥" इति कुबेर इह० पूर्ववत् ॥ ७ ॥ ईशानं प्रति वसन्ततिलकापाठः—"गङ्गातरङ्गपरिखेलनकीर्णवारिप्रोद्यत्कपर्दपरिमण्डितपार्श्वदेशम् । नृत्यं

जिनस्नपनहृष्टहृदः स्मरारेर्विघ्नं निहन्तु सकलस्य जगत्त्रयस्य ॥ १ ॥" ॐ ईशान इह० पूर्ववत् ॥ ८ ॥
नागान् प्रति वैतालीयवृत्तपाठः—"फणिमणिमहसा विभासमानाः कृतयमुनाजलसंश्रयोपमानाः । फणिन
इह जिनाभिषेककाले बलिभवनादमृतं समानयन्तु ॥ १ ॥" ॐ नागा इह० पूर्ववत् । ९ । ब्रह्माणं प्रति
द्रुतविलंबितपाठः—"विशदपुस्तकशस्तकरद्वयः प्रथितवेदतया प्रमदप्रदः । भगवतः स्नपनावसरे चिरं हरतु
विघ्नभयं द्रुहिणो विभुः ॥ १ ॥" ॐ ब्रह्मन् इह० शेषं पूर्ववत् । १० । एवं क्रमेणदिक्पालपूजनं । ततः पुनरपि
पुष्पाञ्जलिं करे गृहीत्वा आर्यापाठः—"दिनकरहिमकरभूसुतशशिसुतबृहतीशकाव्यरवितनयाः । राहो केतो
सक्षेत्रपाल जिनस्यार्चने भवत सन्निहिताः ॥ १ ॥" इति ग्रहपीठोपरि पुष्पाञ्जलिं क्षिपेत् । ततः पूर्वादि-
क्रमेण सूर्यशुक्रमङ्गलराहुशनिचन्द्रबुधबृहस्पतीन् स्थापयेत्, अधः केतुमुपरि क्षेत्रपालं च । ततः सूर्यं प्रति
वसन्ततिलकापाठः—"विश्वप्रकाशकृत भव्यशुभावकाश ध्वान्तप्रतानपरिपातनसद्विकाश । आदित्य नित्य-
मिह तीर्थकराभिषेके कल्याणपल्लवनमाकलय प्रयत्नात् ॥ १ ॥" ॐ सूर्य इह० पूर्ववत् । १ । शुक्रं प्रति
मालिनीवृत्तपाठः—"स्फटिकधवलशुद्धध्यानविध्वस्तपाप प्रमुदितदितिपुत्रोपास्यपादारविन्द । त्रिभुवनजन-
शश्वज्जन्तुजीवातुविद्य प्रथय भगवतोऽर्चां शुक्र हे वीतविघ्नाम् ॥ १ ॥" ॐ शुक्र इह० पूर्ववत् । २ । भौमं
प्रति आर्यापाठः—"प्रबलबलमितितबहुकुशललालनालालितकलितविघ्नहते । भौम जिनस्नपनेऽस्मिन् विघ-
टय विघ्नागमं सर्वम् ॥ १ ॥" ॐ मङ्गल इह० पूर्ववत् । ३ । राहुं प्रति श्लोकपाठः—"अस्तांहः सिंहसंयुक्त-

रथ विक्रममन्दिर। सिंहिकासुत पूजायामत्र सन्निहितो भव ॥ १ ॥" ॐ राहो इह० पूर्ववत्। ४। शनिं प्रति वृत्तं—"फलिनीदलनीललीलयान्तःस्थगितसमस्तवरिष्ठविषजात । रवितनय नय प्रबोधमेतान् जिनपूजाकरणैकसावधानान् ॥ १ ॥" ॐ शने इह० पूर्ववत्। ५। चन्द्रं प्रति द्रुतविलंबितवृत्तपाठः—"अमृतवृष्टिविनाशितसर्वदोपचितविघ्नविषः शशलाञ्छनः। वितनुतां तनुतामिह देहिनां प्रसृततापकरस्य जिनार्चने ॥ १ ॥" ॐ चन्द्र इह० पूर्ववत्। ६। बुधं प्रति वृत्तं—"बुध विबुधगणार्चितांघ्रियुग्म प्रमथितदैत्य विनीतदुष्टशास्त्र । जिनचरणसमीपगोऽधुना त्वं रचय मतिं भवघातनप्रकृष्टाम् ॥ १ ॥" ॐ बुध इह० पूर्ववत्। गुरुं प्रति वृत्तं—"सुरपतिहृदयावतीर्णमन्त्र प्रचुरकलाविकलप्रकाशभास्वन् । जिनपतिचरणाभिषेककाले कुरु बृहतीवर विघ्नविप्रणाशम् ॥ १ ॥" ॐ गुरो इह० पूर्ववत्। ८। केतुं प्रति द्रुतविलंबितवृत्तपाठः—"निजनिजोदययोगजगत्त्रयीकुशलविस्तरकारणतां गतः । भवतु केतुरनश्वरसंपदां सततहेतुरवारितविक्रमः ॥ ९ ॥" ॐ केतो इह० पूर्ववत् । ९। क्षेत्रपालं प्रति आर्या—"कृष्णसितकपिलवर्णप्रकीर्णकोपासितांघ्रियुग्म सदा। श्रीक्षेत्रपाल पालय भविकजनं विघ्नहरणेन ॥ १ ॥" ॐ क्षेत्रपाल इह० पूर्ववत् ॥ १० ॥ इति ग्रहक्षेत्रपालपूजा । विद्यादेवताशासनयक्षयक्षिणीसुरलोकाधिपतिपूजनं बृहत्स्नात्रविधौ कथयिष्यते प्रतिष्ठाशान्तिकपौष्टिकोपयोगित्वात्। ततो जिनप्रतिमाया गन्धपुष्पाक्षतधूपदीपपूजा पूर्वमन्त्रैरेव। ततः करे वस्त्रं गृहीत्वा वसन्ततिलकावृत्तपाठः—"त्यक्ताखिलार्थवनितासुतभूरिराज्यो निःसङ्गतामुपगतो जगतामधीशः।

भिक्षुर्भवन्नपि स वर्मणि देवदूष्यमेकं दधाति वचनेन सुरासुराणाम् ॥ १ ॥" इति वस्त्रपूजा। ततो नाना-विधखाद्यपेयचूष्यलेह्यसंयुतं नैवेद्यं स्थानद्वये विधाय एकं पात्रं जिनाग्रतः संस्थाप्य श्लोकपाठः—"सर्व-प्रधान सद्भूत देहि देहं सुपुष्टिदं। अन्नं जिनाग्रे रचितं दुःखं हरतु नः सदा ॥ १ ॥" इति जलचुलुकेन प्रतिमाया नैवेद्यदानं। ततो द्वितीयपात्रे श्लोकपाठः—"भो भोः सर्वे ग्रहा लोकपालाः सम्यग्दृशः सुराः। नैवेद्यमेतद् गृह्णन्तु भवन्तो भयहारिणः ॥ १ ॥" इति ग्रहदिक्पालादीनां जलचुलुकेन नैवेद्यदानं। स्नपनं विनापि पूजायां जिनप्रतिमानैवेद्यदानमनेनैव मन्त्रेण। तत आरात्रिकं मङ्गलदीपश्च पूर्ववत् शक्रस्तवश्च। यस्याः प्रतिमायाः स्नानस्थितायाः स्नपनं भवति तस्याः सर्वमपि तत्रैव क्रियते—"श्रीखण्डकर्पूरकुरङ्गनाभि-प्रियङ्गुमांसीनतकाकतुण्डैः। जगत्त्रयस्याधिपतेः सपर्याविधौ विदध्यात्कुशलानि धूपः ॥ १ ॥" अनेन वृत्तेन सर्वपुष्पाञ्जलीनामन्तराले धूपोत्क्षेपः शक्रस्तवस्य पाठः। प्रतिमाविसर्जनं यथा—"ॐ अर्हं नमो भगवते अर्हते समये पुनः पूजां प्रतीच्छ स्वाहा" इति पुष्पन्यासेन प्रतिमाविसर्जनं। "ॐ ह्रः इन्द्रादयो लोकपालाः सूर्यादयो ग्रहाः सक्षेत्रपालाः सर्वदेवाः सर्वदेव्यः पुनरागमनाय स्वाहा।" इति पुष्पपूजादिभिर्दिक्पालग्रह-विसर्जनं। ततः—"आज्ञाहीनं क्रियाहीनं मन्त्रहीनं च यत्कृतम्। तत्सर्वं कृपया देवाः क्षमन्तु परमेश्वराः ॥१॥ आवाहनं न जानामि न जानामि विसर्जनम्। पूजां चैव न जानामि त्वमेव शरणं मम ॥ २ ॥ कीर्त्ति श्रियो राज्यपदं सुरत्वं न प्रार्थये किञ्चन देवदेव। मत्प्रार्थनीयं भगवन् प्रदेयं त्वद्दासतां मां नय सर्व-

द्वापि ॥ ३ ॥” इति सर्वकरणीयान्ते जिनप्रतिमादेवादिविसर्जनविधिः । अर्हदर्चनविधावपि एवं विसर्जनं ज्ञेयं । इति लघुस्नात्रविधिः । “ततो देवगृहं गत्वा स्तोत्रैः शक्रस्तवादिभिः स्तुत्वा जिनं पूजयित्वा प्रत्याख्यानं विचिन्तयेत् ॥ १ ॥ चैत्यं प्रदक्षिणीकृत्य गत्वा पौषधमन्दिरम् । साधून् देववदानन्द्यान्नमस्येत्पूजयेत्सुधीः ॥ २ ॥ शृणुयादेकचित्तः संस्तन्मुखाद्धर्मदेशनाम् । प्रत्याख्यानं ततः कृत्वा गुरुं नत्वा धनार्जनम् ॥ ३ ॥ कर्मादानानि संत्यज्य यथास्थानं समाचरेत् । सर्वापि नययुक्तिस्तु व्रतबन्धादिशिक्षणात् ॥ ४ ॥ विधेयं कुत्सितं कर्म प्राणनाशेऽपि नाचरेत् । ततो गृहेऽर्हतः पूजां विधाय सलिलाशने ॥ ५ ॥ दत्वा सभक्ति साधुभ्यः पूजयित्वातिथीनपि । दीनान् संतोष्य भुञ्जीत भोज्यं व्रतकुलोचितम् ॥ ६ ॥ (साध्वामन्त्रणं यथा । क्षमाश्रमणपूर्वं गृही कथयति—“भगवन्, फासुएणं एसणिज्जेणं असणेणं भयवं मम घरे अणग्गहो कायव्वो”) ततः शास्त्रविचारं च विधाय गुरुसन्निधौ । कृत्वार्थोपार्जनं सन्ध्यापूजां कृत्वा ततो गृहे ॥ ७ ॥ मुहूर्त्ते भास्वदस्तावार्क् भुञ्जीत निजवाञ्छया । सायं सामायिकं कृत्वा प्रतिक्रमणमाचरेत् ॥ ८ ॥ धर्मागारे ततो वेश्म निजमागत्य शान्तधीः । गते निशाचतुर्भागे पठित्वार्हत्स्तवादिकम् ॥ ९ ॥ धृतब्रह्मव्रतः प्रायो निद्रासुखमुपाहरेत् । निद्रान्ते परमेष्ठ्याख्यमन्त्रस्मरणपूर्वकम् ॥ १० ॥ जिनचक्र्यर्द्धचक्र्यादिचरितानि विचिन्तयेत् । मनोरथं व्रतादीनां कुर्यान्निजनिजेच्छया ॥ ११ ॥ इत्याहोरात्रिकीं चर्यामप्रमत्तः समाचरन् । यथावदुक्तवृत्तस्थो गृहस्थोऽपि विशुद्ध्यति ॥ १२ ॥ इति व्रतारोपसंस्कारे गृहिणां दिनरात्रिचर्या ।

"वासना गुरुसामग्री विभवो देहपाटवम् । सङ्घश्चतुर्विधो हर्षो व्रतारोपे गवेष्यते ॥ १ ॥ वरकुसुमगंधअक्खय-फलजलनेवज्जधूवदीवेहिं । अट्ठविहकम्ममहणी जिणपूआ अट्ठहा होई ॥ २ ॥" इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने व्रतारोपसंस्कारकीर्त्तनो नाम पञ्चदश उदयः ॥ १५ ॥

षोडश उदयः ।

अथान्त्यसंस्कारविधिः ।

"श्राद्धो यथावद्वृत्तेन पालयित्वा निजं भवम् । कालधर्मे च संप्राप्ते कुर्यादाराधनां परम् ॥ १ ॥" तस्य चार्यविधिः—"जिनकल्याणकस्थाने निर्जीवे स्थण्डिले शुचौ । अरण्ये वा स्वगृहे वा कार्य आनशनो विधिः ॥ १ ॥" तत्र शुभे स्थाने ग्लानस्य पर्यन्ताराधना विधेया । तथा अवश्यं भाविनि मरणे आसन्ने तिथिवारर्क्षचन्द्रबलादि न विलोकयेत् । तत्र संघमीलनं गुरुर्ग्लानस्य यथा सम्यक्त्वारोपणे तथैव नंदिं कुर्यात् । नवरं संलेहणाआराहणाभिलापेन सर्वं नन्दिदेववन्दनकायोत्सर्गादिविधिः स एव नवरं वैयावृत्त्यकारकायोत्सर्गानन्तरं आराधना, देवताराधनार्थं "करेमि काउस्सग्गं अन्नत्थउससिएणं० जाव अप्पाणं वोसिरामि" कायोत्सर्गः चतुर्विंशतिस्तवचतुष्टयचिन्तनं पारयित्वा आराधनास्तुतिकथनं । सा यथा—"यस्याः

सान्निध्यतो भव्या वाञ्छितार्थप्रसाधकाः । श्रीमदाराधना देवी विघ्नव्रातापहास्तु वः ॥ १ ॥" शेषं पूर्ववत् । ततस्तेनैव विधिना सम्यक्त्वदण्डकोच्चारणं द्वा..." व्रतोच्चारणं तथैव वासःक्षेपादिकायोत्सर्गादि तथैव संलेखना आराधनालापेन प्रदक्षिणा ग्लानस्य शक्त्यनुसारेण भवन्ति न वा । नवरं—"जावनियमपज्जुवासामि स्थाने जाव जीवाए" इति वक्तव्यं । ततः क्षामणं सर्वजीवानां अपराधक्षमेति क्षामणा । ततः श्राद्धः परमेष्ठिमन्त्रोच्चारपूर्वं गुरुसंमुखं कृताञ्जलिर्भणति—"खामेमि सव्वजीवे सव्वे जीवा खमंतु मे । मित्तीमे सव्वभूएसु वेरं मज्झ न केणई ॥ १ ॥" गुरुर्भणति—"खामेह, जो खमई तस्स अत्थि आराहणा जो न खमेइ तस्स नत्थि आराहणा ।" ततः श्राद्धः क्षमाश्रमणपूर्वं भणति—"भयवं अणुजाणह," गुरुर्भणति—"अणुजाणामि" श्राद्धः परमेष्ठिमन्त्रपाठपूर्वं कथयति—"जे मए अणंतेणं भवब्भमणेणं पुढविकाइया आउकाइआ तेउकाइआ वाउकाइआ वणस्सईकाइआ एगंदिआ सुहमा वा बायरा वा पज्जुत्ता वा अपज्जुत्ता वा कोहेण वा माणेण वा मायाए वा लोहेण वा पंचेंदिअट्टेण वा रागेण वा दोसेण वा घाइआ वा पिडिआ वा मणेणं वायाए कायेणं तस्स मिच्छामि दुक्कडं ।" पुनः परमेष्ठिमन्त्रं पठित्वा—"जे मए अणंतेणं भवब्भमणेणं बेइंदिआ सुहमा वा बायरा वा० शेषं पूर्ववत् । पुनः परमेष्ठि मंत्रं पठित्वा जेमए अणंतेणं भवब्भमणेणं तेरिंदिआ सुहमा वा वायरा वा० शेषंपूर्ववत् । पुनः परमेष्ठिमन्त्रं पठित्वा—"जे मए अणंतेणं भवब्भमणेणं चउरिंदिआ वा सुहमा वा बायरा वा शेषं पूर्ववत् । पुनः परमेष्ठिमन्त्रपाठं पूर्वं कथ-

नारोपे गवेष्यते ॥ १ ॥

यित्वा—"जे मए अणंतेणं भवब्भमणेणं पंचेंदिआ देवा वा मणुओ वा नरइआ वा तिरिक्खजोणिआ वा जलयरा वा थलयरा वा खयरा वा सन्निया वा असन्निया वा सुहमा वा बायरा वा" शेषं पूर्ववत्। पुनः परमेष्ठिमन्त्रभणनपूर्वं श्राद्धः कथयति—"जं मए अणंतेणं भवब्भमणेणं अलिअं भणिअं कोहेण वा माणेण वा मायाए वा लोहेण वा पंचेंदिअट्ठेण वा रागेण वा दोसेण वा मणेणं वायाए काएणं तस्स मिच्छामि दुक्कडं।" पुनः परमेष्ठिमन्त्रं पठित्वा—"जं मए अणंतेणं भवब्भमणेणं अदिन्नं गहिअं कोहेण वा माणे०" शेषं पूर्ववत्। पुनः परमेष्ठिमन्त्रं पठित्वा—"जं मए अणंतेणं भवब्भमणेणं दिव्वं माणुस्सं तेरिच्छं मेहुणं सेविअं कोणेह वा मा०" शेषं पूर्ववत्। पुनः परमेष्ठिमन्त्रं पठित्वा—"जं मए अणंतेणं भवब्भमणेणं अट्ठारसपावठाणायं कयाइं कोहेण वा मा०" शेषं पूर्ववत्। पुनः परमेष्ठिमन्त्रं पठित्वा—"जं मे पुढविकायगयस्स सिलालेट्ठुसक्करा सन्हा वालुआ गेरिअसुवन्नाइं महाधाऊ रूवं सरीरं पाणिवहे पाणिसंघट्टणे पाणिपीडणे पाववट्टणे मिच्छत्तपोसणे ठाणेसंलग्गंतं निंदामि गरिहामि अप्पाणं वोसिरामि जं मे पुढविकायगस्स सिलालेट्ठु सक्करा सन्हा वा वालुआ गेरि असुवन्नाइं महाधाउ रूवं सरीर० अरिहंत चेइएसु अरिहंतबिंबेसुधम्मट्ठाणेसु जंतुरक्खणट्ठाणेसु धम्मोवगरणेसु संलग्गं तं अणुमोआमि कल्लाणेणं अभिनिंदेमि।" पुनः परमेष्ठिमन्त्रं पठित्वा—"जं मे आउकायगयस्स जल करग मिहिआ उसा हिमहरतणु रूवं सरीरं पाणिवहे पाणिसंघट्टणे पाणिपीडणे पाववट्टणे मिच्छत्तपोसणे ठाणे संलग्गं तं निंदामि गरिहामि अप्पाणं वोसिरामि

पुनः परमेष्ठिमंत्रंपठित्वा जं मे आऊकायगयस्स जल करग महिआ ऊसा हिम हरतणुरूवं सरीरं अरिहंतचे-इएसु अरिहंतबिंबेसु धम्मठाणेसु जंतुरक्खणठाणेसु धम्मोवगरणेसु जिण ह्वाणेसु तह्वादाहावहरणेसु सुलग्नं तं अणुमोआमि कल्लाणेणं अभिनंदेमि। पुनः परमेष्ठिमंत्रं पठित्वा. जमेतेउकायगयस्स अगणि इंगाल मम्मुर जाला अलाय विज्जु उक्का तेअरूपं सरीरं पाणिवहे पाणिसंघट्टणे पाणिपीडणे पाववट्टणे मिछत्तपोसणे ठाणे संलग्गं तं निंदामि गरिहामि वोसिरामि. जम्मे तेउकायगयस्स अगणि इंगाल मम्मुर जाला अलाअ विज्जु उक्का तेअरूवं सरीरं सीआ वहारे जिणपूआधूवकरणे नेवेद्यपाए छुहाहरणा हारपाए संलग्गं तं य अणुमो-एमि कल्लाणेणं. अभिनंदेमि। पुनः परमेष्ठिमंत्रं पठित्वा जम्मे वाउकायगयस्स वाउ झंझासासरूवं सरीरं. पाणिवहे पाणिसंघट्टणे पाणिपीडणे पाववड्डणे मिच्छत्तपोसणे ठाणे संलग्नं तं निंदामि. गरिहामि वोसिरामि जम्मे वाऊकायगयस्स वाउझंझासासरूवं सरीरं पाणिरक्खणे पाणीजीवणे साहूण वेयावच्चे धम्मावहारे संलग्गं तं अणुमोएमि कल्लाणेणं अभिनंदेमि। पुनः परमेष्ठिमंत्रं पठित्वा जम्मे वणस्सइकाय गयस्स मूल कठ छल्लि पत्त पुप्फ फल बीअ रस निज्झा सरूवं सरीरं पाणिवहे पाणिसंघट्टणे पाणिपीडणे पाववट्टणे मिछत्तपोसणे संलग्गं तं निंदामि गरिहामि अप्पाणं वोसिरामि जम्मे वणस्सइकायगयस्स मूल कठ छल्लि पत्त पुप्फ फल बीअ रस निझ्झासरूवं सरीरं बुहाहरणेसु अरिहंतचेइअपूयणेसु धम्मठाणेसु नेवेद्यकरणेसु जंतुरक्खणेसु. संलग्गं तं अणुमोएमि कल्लाणेणं अभिनंदेमि। पुनः परमेष्ठिमंत्रं पठित्वा जम्मे तसकायगयस्स. रस रत्त

मंसमेअ अट्ठिमज्जा सुक्क चम्म रोम नह नसारूवं सरीरं पाणिवहे—पाणिसंघट्टणे पाणिपीडणे पाववट्ठणे मिच्छत्तपोसणे ठाणे संलग्गं तं निंदामि गरिहामि वोसिरामि. जम्मे तस कायगन्धस्स रस रत्त मंस मेअ अट्ठि मज्जा सुक्क चमं रोम नह नसा रूवं सरीरं अरिहंतचेइएसु अरिहंतबिंबेसु धम्मट्ठाणेसु जंतुरक्खण. ठाणेसु धम्मोवगरणेसु संलग्गं तं अणुमोएमि कल्लाणेणं अभिनिंदेमि ।" पुनः परमेष्ठिमन्त्रं पठित्वा—"जं मए इत्थ भवे मणेणं वायाए काएणं दुट्ठं चिंतिअं दुट्ठं भासियं दुट्ठं कयं तं निंदामि गरिहामि वोसिरामि, जं मए इत्थ भवे मणेणं वायाए कायेणं सुट्ठु चिंतिअं सुट्ठु भासिअं सुट्ठु कयं तं अणुमोएमि कल्लाणेणं अभिनिंदेमि ।" अत्र पूर्वं समारोपितसम्यक्त्वव्रतस्यापि पुनः सम्यक्त्वव्रतारोपो विधेयः । अनारोपितसम्यक्त्वव्रतस्यापि सम्यक्त्वव्रतारोपः प्रान्ते विधेय एव । यस्य व्रतारोपः पूर्वं कृतो भवति तस्यात्र समये चतुर्विंशत्युत्तरशतातीचारालोचनं च । तत्र चातिचारा आवश्यकोदये कथयिष्यन्ते । तत आलोचनाविधिर्विधेयः सोऽपि प्रायश्चित्तविध्युदयाद्वसेयः । ततो गुरुः सर्वसङ्घसहितो वासाक्षतादि ग्लानशिरसि निक्षिपेत् । इत्यन्त्यसंस्कारे आराधनाविधिः । ततः क्षामणं । ग्लानः क्षमाश्रमणं परमेष्ठिमन्त्रपाठपूर्वं भणति—"आयरिअ उवज्झाए सीसे साहम्मीए कुलगणेअ जे मे केइ कसाया सव्वे तिविहेण खामेमि सव्वस्स समणसंघस्स भगवओ अंजलिं करे सीसे सव्वं खमामे वइत्ता खमामि सव्वस्स अहयंपि भयवं जं मए चउगइगयणं देवा तिरिआ मणुस्सा नेरइआ चउकसा उवगएणं पंचेंदिअवसट्टेणं इहंमि भवे अ-

न्नेसु वा भवगहणेसु मणेणं वायाए काएणं दूमिआ संताविआ अभिताइआ तस्स मिच्छामि दुक्कडं। तेहिं अहं अभिओ संताविओ अभिहउत्तमंहंपि खमामि । ततो गुरुणा अस्य गाथात्रयस्य स दण्डकस्य विस्तरव्याख्यानं करोति[1]। ततो ग्लानो गुरुसाधुसाध्वीश्रावकश्राविकाः प्रत्येकं क्षमयति । अत्र गुरुभ्यो वस्त्रादिदानं सङ्घपूजा च। इत्यन्तसंस्कारे क्षामणविधिः। अथासन्ने मृत्युकाले सर्वचैत्येषु ग्लानः पुत्रादिभिः महापूजास्नपनध्वजारोपादि कारयेत्। चैत्यधर्मस्थानादिषु वित्तविनियोगं कारयेत् । ततः परमेष्ठिमन्त्रोच्चारपूर्वकं पठेत्—"जो मे जाणंतु जिणा अवराहा जेसु जेसु ठाणेसु । तेहं आलोएमि उवट्ठिओ सव्वकालंपि ॥ १ ॥ छउमत्थो मूढमणो कित्तिअमत्तंपि संभरइ जीवो। जं च न संभरामि अहं मिच्छामि दुक्कडं तस्स ॥ २ ॥ जं जं मणेण बद्धं जं जं वायाइभासिअं किंचि। जं जं काएण कयं मिच्छामि दुक्कडं तस्स ॥ ३ ॥ खामेमि सव्वजीवे सव्वे जीवा खमंतु मे। मित्ती मे सव्वभूएसु वेरं मज्झ न केणइ ॥४॥" इति ग्लानपाठः। ततो नमस्कारत्रयपाठपूर्वं भणति—"चत्तारि मंगलं अरहंता मंगलं सिद्धा मंगलं साहु मंगलं केवलिपन्नत्तो धम्मो मंगलं। चत्तारि लोगुत्तमा अरहंता लोगुत्तमा सिद्धा लोगुत्तमा साहु लोगुत्तमा केवलिपन्नत्तो धम्मो लोगुत्तमो। चत्तारि सरणं पवज्जामि अरहंते सरणं पवज्जामि सिद्धे सरणं पवज्जामि साहू सरणं पवज्जामि केवलिपन्नत्तं धम्मं सरणं पवज्जामि" इति पठेत्। ततो गुरुवाक्येन अष्टादशपापस्थानकव्युत्सर्जनं यथा—"सव्वं पाणाइ-

१ कारयतीत्यर्थः। यद्वा गुरुणासह करोतीत्यर्थः। नानाधिकारानुरोधेन व्याख्येयोयं ग्रन्थइति संदिग्धप्रयोगकाठिन्यं नोपेयते.

वायं पच्चक्खामि सव्वं मुसावायं पच्चक्खामि सव्वं अदिन्नादाणं प० सव्वं मे हुणं ःगग्गसव्वं परिग्गहं प० सव्वं राई भोअणं प० सव्वं कोहं प० सव्वं माणं प० सव्वं मायं प० सव्वं लोहं प० सव्वं पिज्जं प० सव्वं दोसं कलहं अब्भक्खाणं अरई रई पेसुन्नं परपरिवायं मायामोसं मित्थादंसणसल्लं इच्चेइआइं अट्ठारसपावठाणाइं दुविहं तिविहेणं वोसिरामि अपच्छिमम्मि ऊसासे तिविहं तिविहेणं वोसिरामि।" ततो गुरुर्गीतार्थः श्रीयोगशास्त्रपञ्चमप्रकाशकथितं कालप्रदीपादिशास्त्रकथितं च ग्लानस्यायुःक्षयं विज्ञाय सङ्घस्य तत्संबन्धिनां राजादेरनुमतिं गृहीत्वा अनशनमुच्चारयेत्। ग्लानः शक्रस्तवं पठित्वा परमेष्ठिमन्त्रं त्रिः पठित्वा गुरुमुखादुच्चरति, यथा—"भवचरिमं पच्चक्खामि तिविहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहस्सागारेणं महत्तरागारेणं सव्वसमाहिवत्तिया गारेणं वोसिरामि।" इति सागारानशनं। अन्त्यमुहूर्त्ते अनागारमनशनं यथा—"भवचरिमं निरागारं पच्चक्खामि सव्वं असणं सव्वं पाणं सव्वं खाइमं अन्नत्थणाभोगेणं सहस्सागारेणं अइयं निंदामि पडिपुन्नं संवरेमि अणागयं पच्चक्खामि, अरिहंतसक्खियं सिद्धसक्खिअं साहूसक्खियं देवसक्खियं अप्पसक्खिअं वोसिरामि, जे मे हुज्ज पमाओ इमस्स देहस्स इमाइ वेलाए आहारमुवहिदेहं तिविहं तिविहेणं वोसिरियं, गुरुर्निस्थारग पारगो होहि" इति भणन् वासाक्षतादि ग्लानसंमुखं ससङ्घः क्षिपति शान्त्यर्थं "अट्ठावयम्मिसहो" इत्यादिस्तुतिपाठः पठनीयः। "चवणं जम्मणभूमी" इत्यादिस्तवपाठः। गुरुर्निरन्तरं ग्लानाग्रे त्रिभुवनचैत्यव्याख्यानं अनित्यादिद्वादशभावनाव्या-

ख्यानं अनादिभवस्थितिव्याख्यानं अनशनफलव्याख्यानं सर्वदा करोति। सङ्घो गीतनृत्याद्युत्सवं करोति। ग्लानो जीवितमरणेच्छां परित्यज्य समाधिना परितिष्ठति। ततोऽन्तर्मुहूर्त्ते समायाते ग्लानः "सव्वं आहारं सव्वं देहं सव्वं उवहिं वोसिरामि" इति भणति। ततः प्रान्ते ग्लानः पञ्चपरमेष्ठिस्मरणश्रवणयुक्तः शरीरं त्यजति। इत्यन्तसंस्कारे अनशनविधिः। मरणकाले ग्लानः कुसशय्यायां स्थाप्यो जन्ममरणे भूमावेव इति व्यवहारः। अथ सर्वभावभोक्तरि कर्मयोक्तरि चेतनारूपे जीवे गते अजीवपुद्गलस्य तच्छरीरस्य सनाथताख्यापनार्थं तत्सुतादीनां कृतार्थं तीर्थं संस्कारविधिरुच्यते–स यथा ब्राह्मणस्य सर्वस्य शिखावर्जितं शिरःकूर्चमुण्डनं केचित् क्षत्रियवैश्ययोरपि वदन्ति। तथा शवसंस्कारः सर्वैरपि स्ववर्णज्ञातिभिर्विधेयः तत्स्पर्शो विधेयोऽन्यवर्णज्ञातिभिः। ततो गन्धतैलादिभिः शवं सुष्ठुगन्धोदकैश्च स्नपयेत्। गन्धैः कुङ्कुमादिभिर्विलेपयेत् मालाभिरर्चयेत् स्वस्वकुलोचितैर्वस्त्राभरणैर्मण्डनैर्भूषयेत्। शूद्रप्रकृतीनां सर्वथा न मुण्डनं। ततो नवकल्पितकाष्ठशय्यायां निष्पाद्यायां शुकसंस्तीर्णायां सुवस्त्रच्छन्नायां शवं स्थापयेत् सह शय्योपकरणैः। अत्रास्य गृहिणो मृत्युनक्षत्रस्य नक्षत्रपुत्रकविधानं कुशसूत्रादिभिर्यतिवद् ज्ञेयं। नवरं कुशपुत्रका गृहस्थवेषधराः कार्याः वर्णानुसारेण तदुपरि नानाविधवस्त्रसुवर्णमणिविचित्रं वस्त्रकृतं प्रासादं स्थापयेत्। ततः स्वज्ञातीयाश्चत्वारः परिजनैः सह स्कन्धोढं शवं श्मशानं नयन्ति। तत्रोत्तराभागस्थशिरसं शवं पुत्राद्यश्चितामारोप्य वह्निना संस्कुर्वन्ति। "अनन्नभोजिबालानां भूमिसंस्कार इष्यते। गृहिणामग्निसंस्कारः सर्वेषा-

मन्नभोजिनाम् ॥ १ ॥" तत्र प्रेतप्रतिग्राहिभ्यो दानं ददति । ततः सर्वेऽपि स्नानं विधाय अनेन मार्गेण स्वगृहमायान्ति । तत्र तृतीयदिने चिताभस्म पुत्राद्यो नद्यां प्रवाहयन्ति तदस्थीनि तीर्थेषु स्थापयन्ति । ततस्तद्दिने स्नात्वा शोकापनोदं कुर्वन्ति । चैत्येषु गत्वा सपरिजना जिनबिंबमस्पृशन्तश्चैत्यवन्दनं कुर्वन्ति । ततो धर्मागारेष्वागत्य गुरून् नमस्कुर्वन्ति । गुरवोऽपि संसारानित्यतारूपां धर्मव्याख्यां कुर्वन्ति । ततः सर्वेऽपि स्वस्वकार्यं साधयन्ति । अन्त्याराधनमारभ्य शोकापनोदपर्यन्तं न मुहूर्त्ताद्यवलोकनं अवश्यकर्त्तव्यत्वात् । मृतस्नात्रकरणं वर्जयेदेषु धिष्ण्येषु—"प्रेतक्रिया न कर्त्तव्या यमले च त्रिपुष्करे । आर्द्रामूलानुराधासुमिश्रक्रूरध्रुवेषु च ॥ १ ॥ धनिष्ठापञ्चके वर्ज्यास्तृणकाष्ठादिसङ्ग्रहाः । शय्यादक्षिणदिग्यात्रामृतकार्यगृहोद्यमाः ॥ २ ॥" एषु कर्त्तव्यं च—"रेवती श्रवणसार्पवालिनीतिष्यहस्तपवनेन्दुभेषु च । सौम्यवाक्पतिशनैश्चरेष्वपि प्रेतकर्म विबुधैर्निदिश्यते ॥ १ ॥ स्वस्ववर्णानुसारेण सूतकं मृतजातयोः । सदृशं गर्भपाते तु सूतकं स्याद्दिनत्रयम् ॥ २ ॥ यतः—अन्यवंशे समुद्भूते मृते जातेऽथ तद्गृहे । परिणीतसुतायाश्च सूतकान्नाशने तथा ॥ ३ ॥ एतेषु चैव सर्वेषु सूतकं स्याद्दिनत्रयम् । सूतकं सूतकं हन्ति जातं जातं मृतं मृतम् ॥ ४ ॥ अनन्नभोजिबालस्य सूतकं स्याद्दिनत्रयम् । अनष्टवार्षिकस्यापि त्रिभागोनं च सूतकम् ॥ ५ ॥" स्वस्ववर्णानुसारेण सूतकान्ते जिनस्नपनं साधर्मिकवात्सल्यं च ततः कल्याणं । इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे गृहिधर्मपूर्वायने अन्तसंस्कारकीर्त्तनो नाम षोडश उदयः समाप्तः ॥ १६ ॥

सप्तदश उदयः ।

अथ यत्याचार आरभ्यते ।

विषमो दुष्पालो यत्याचारः । यदुक्तं—"सा पुण दुप्परिअल्ला पुरिसाण सया विवेगरहियाणं । वोढव्वाइं जम्हा पंचेव महव्वयवयाइं ॥ १ ॥ राई भोअण विरई निम्मंमत्तं स एवि देहंमि । पिंडो उग्गम उप्पायणे सणाए सया सुद्धो ॥ २ ॥ इरियाइं पंचहिं समईहिं तीहिंगुत्तीहिं तवविहाणम्मि । निच्चुज्जुत्तो अममो अकिंचणो गुणसया वासो ॥ ३ ॥ मासाई आइ पडिमा अणेगरूवा अभिग्गहा बहवे । दव्वे खित्ताणुगया काले भावे अ बोधव्वा ॥ ४ ॥ जावज्जीवममज्जण मणवरियं भूमिसयणमुदिट्ठं । केसुद्धरणं च तहा निप्पडिकम्मत्तणमपुव्वं ॥ ५ ॥ गुरुकुलवासो अ सया खुहापिवासाइयाय सोढव्वा । बावीसं च परीसहा तहेव उवसग्गदिव्वाइं ॥ ६ ॥ लद्धाविलद्ध वित्तीसीलंगाणं च तह सहस्साइं । अट्ठारसेव सययं बोधव्वा आणुपुव्वीए ॥ ७ ॥ तरिअव्वो अ समुद्दो वाहाहि इमो महल्लकल्लोलो । निस्सायवालुयाए चावे अव्वो सया कवलो ॥ ८ ॥ चंकमि अव्वं निसिअग्गखग्गधाराइ अप्पमत्तेणं । पायव्वाइसहेलं हुअवहज्जालावली सययं ॥ ९ ॥ गंगा पडिसोएणं तोलणिअव्वो तुलाइ सुरसेलो । जइ अव्वं तह एगा गिणा बिभीमारिदुट्ठबलं ॥ १० ॥ राहावे-

हविणम्मि अचक्कट्ठि अचक्कठिअलक्खमज्झपुत्तलिआ । विंधेअव्वा वस्सं उवसग्गपरिसहे जेउं ॥ ११ ॥ तिहुयणजयप्पडागा अगहियपुव्वा तहेव गहिअव्वा । इअएवमाइसाहुण दुक्करा होइ पवज्जा ॥ १२ ॥" ततो व्रते सर्वत्रापि ब्रह्मचर्यमेव दुष्करं यदुक्तमागमे—"अक्खाणसणी कम्माणमोहणी तह वयाण बंभवयं । गुत्तीणं य मणगुत्ती चउराकट्टेण जिप्पंति ॥ १ ॥" परसमयेऽपि—"ब्रह्मचर्यं भवेन्मूलं सर्वेषां व्रतकर्मणाम् । ब्रह्मचर्येण भग्नेन व्रतं सर्वं निरर्थकम् ॥ १ ॥" दुष्करं ब्रह्मव्रतं यदुक्तं, गाथा—"दीसंते अणेगे उग्गखग्गसमरंगणे महाविसमे । भग्गे विसयलसिन्ने गंभीरा दायिणो धीरा ॥ १ ॥ दिसंति सिंहपोरस निम्महणा दलिअमइगलगणावि । कंदप्पदप्पदलणे विरलच्चि अ केवि सप्पुरिसा ॥ २ ॥" ततः पालितशुद्धसम्यक्त्वद्वादशव्रताचारः कृतचैत्यनिर्मापणजिनबिंबजिनागमचतुर्विधसङ्घविषयबहुद्रव्यव्ययः संपूर्णभोगाभिलाषः परमवैराग्यवासनः संपूर्णगार्हस्थ्यमनोरथः शान्तरसनिमग्नः कुलवृद्धसुतपत्नीस्वाम्यादिभिरनुज्ञातः प्रव्रज्याग्रहणोत्सुकः श्राद्धो ब्रह्मव्रताय योग्यो भवति । तस्य चायं विधिः—प्रथमं शान्तिकं पौष्टिकं गुरुपूजा सङ्घपूजा च । ततः प्रव्रज्योपयोगिनि लग्नदिने श्राद्धो मुण्डितशीर्षः शिखासूत्रधारी महोत्सवेन विवाहोत्सवसदृशेन यथोक्तगुणगुरुसमीपे व्रजेत् । तत्र गुरुर्नन्दिपूर्वकं सम्यक्त्वसामायिकदेशविरतिसामायिकारोपणं पूर्ववत्

---

१ शिष्योत्सुकैश्शिष्यसमूहेन स्थविरत्वममिलषद्भिस्साधुसत्तमैरिदं विशेषणमभ्यसनीयम् । एतादृशशिष्यानुपलब्धेस्साधूच्छेदाद्धर्मोच्छेदः स्यादिति तु न शङ्कनीयम् अयोग्यसाधुसत्त्वेऽपि तदुच्छेदसंभवात्.

कुर्यात्। चैत्यवन्दनं दण्डकोच्चारक्षमाश्रमणादि सर्वं पूर्ववत्। ततस्तां सर्वां पूर्वोक्तक्रियां निर्वर्त्य गुरुः श्राद्धस्य परमेष्ठिमन्त्रत्रयभणनपूर्वमिति दण्डकमुच्चारयेत्—"करेमि भंते सामाइयं सावज्जं जोगं पच्चक्खामि जावनियमं पज्जुवासामि दुविहं तिविहेणं मणेणं वायाए कायेणं न करेमि न कारवेमि तस्स भंते पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि सव्वं मेहुणं पच्चखामि जावनियमं पज्जुवासामि दुविहं तिविहेणं मणेणं वायाए काएणं न करे० शेषं पूर्ववत्। इत्युक्त्वा "नित्थारग पारगो होहि" इति भणन् गुरुर्वासान् क्षिपति ससङ्घः। ततो गुरुर्निषद्यासीनः पुरःस्थस्य ब्रह्मचारिण उपदेशं ददाति–यथा—"स्त्रीषण्ढपशुमद्वेश्यासनकुड्यान्तरोज्झनात्। सरागस्त्रीकथात्यागात् प्रोज्झितस्मृतिवर्जनात्॥ १॥ स्त्रीरम्याङ्गेक्षणस्वाङ्गसंस्कारपरिवर्जनात्। प्रणीतात्यशनत्यागाद्ब्रह्मचर्यं तु भावयेत्॥ २॥ न कार्यो भवता स्त्रीभिः संभाषो रागसंयुतः। शयनासनकार्यादि न कार्यं गृहिवेश्मसु॥ ३॥ अन्यनिन्दोपहासौ च वर्जनीयौ निरन्तरम्। धार्यं सदा त्वया मौनं स्वाध्यायकरणं विना॥ ४॥ भोक्तव्यमन्यगेहेषु प्रायः सचित्तवर्जनम्। धार्यं कौपीनमनिशं मुञ्जमेखलयान्वितम्॥ ५॥ नैव कार्योऽङ्गसंस्कारो न धार्यं भूषणादि च। एकं प्रच्छादनं मुक्त्वा न धार्यमपरं बहु॥ ६॥ मौनं द्विरावश्यकं च स्त्रीसङ्गस्य विवर्जनम्। जिनार्चनं त्रिकालं च कुर्याद्वर्षत्रयावधि॥ ७॥ सचित्तादिपरित्यागो नास्ति प्रायो व्रतेऽत्र च। केवलं ब्रह्मचर्यस्य धारणं परमिष्यते॥ ८॥" इत्युक्त्वा वासान् क्षिपति। ततो ब्रह्मचारी शिखासूत्रकौपीनप्रावरणधारी मौनी शुभध्यानरतो वर्षत्रयं विहरति। तत्र वर्ष-

अयावधिपालितत्रिकरणशुद्धिब्रह्मचर्यः क्षुल्लकत्वप्रव्रज्याद्याददाति । खण्डितव्रतस्तु पुनर्गार्हस्थ्यमुपगच्छति ।
इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायने ब्रह्मव्रतकीर्त्तनो नाम सप्तदश उदयः ॥ १७ ॥

अष्टादश उदयः ।

अथ क्षुल्लकत्वविधिः ।

वर्षत्रयं पालितत्रिकरणशुद्धिब्रह्मव्रतः शान्तरसप्रकृष्टबलतुलितशीलाङ्गभारः दीक्षां जिघृक्षुः ब्रह्मचारी क्षुल्लकत्वमर्हति । न केवलं पालितत्रिकरणशुद्धब्रह्मव्रतोऽप्यतुलितान्यचतुर्महाव्रतः प्रव्रज्यापालने समर्थो भवति । संयमपालनं हि ब्रह्मचर्यपालनं चतुर्महाव्रतपालनं विधाय कालक्रमेण सुकरं भवति । भगवानर्हन्नपि प्रव्रजितुकामः सांवत्सरिकदानव्याक्षेपेन संवत्सरं महाव्रतपालनातुलनां करोति । ततो ब्रह्मव्रतपालनानन्तरं क्षुल्लकदीक्षा, यथा—पालितत्रिकरणशुद्धब्रह्मचर्यो वर्षत्रयान्ते क्षुल्लकत्वं गृह्णाति । तत्र यथा पूर्वोक्तगुणगुरुसमीपे दीक्षोपयोगितिथिवारर्क्षलग्नेषु शिष्यः कृतस्नानो मुण्डितशीर्षः शिखाधारी सोपवीतः निषद्यानिषण्णस्य गुरोः समीपे धृतमुखवस्त्रिकः प्रतिक्रान्तेर्यापथः क्षमाश्रमणपूर्वं भणति—“भयवं इच्छाकारेण तुब्भे अम्हं पंचमहाव्वयाणं अवहिआरोपणं उद्दिसह ।” गुरुर्भणति—“आदिसामि ।” ततः क्षुल्लकत्वालापेन

नन्दिवासक्षेपचैत्यवन्दनवन्दनककायोत्सर्गयुक्तिः सैव व्रतारोपसदृशी पूर्ववत् । ततो दण्डकोच्चारकाले शिष्यो गुरोः क्षमाश्रमणपूर्वं भणति—"भयवं इच्छाकारेण तुब्भे अम्हं पंचमहव्वयाणं अवहिआरोवणं समुद्दिसह ।" गुरुर्भणति "समुद्दिसामि ।" ततो नमस्कारत्रयपाठः । पूर्वं शिष्यो दण्डकमुच्चरति, यथा—"करेमि भंते सामाइयं सव्वं सावज्जजोगं पच्चक्खामि जावनियमं पज्जुवासामि दुविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि तस्स भंते पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि ।" पुनरपि परमेष्ठिमन्त्रं त्रिः पठित्वा—"सव्वं पाणाइवायं सव्वं मुसावायं सव्वं अदिन्नादाणं सव्वं मेहूणं सव्वं परिग्गहं सव्वं राईभोअणं पच्चक्खामि जावनियमं पज्जुवासामि दुविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि तस्स भंते पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि ।" ततः शिष्यः क्षमाश्रमणपूर्वं भणति, "भयवं इच्छाकारेण तुब्भे अम्हं पंचमहव्वय अवहिपालणं अणुन्नवेह ।" गुरुर्भणति, "अणुन्नवेमि ।" अनया रीत्या उद्देशसमुद्देशानुज्ञासु षट् क्षमाश्रमणवन्दनककायोत्सर्गादि पूर्वोक्तरीत्या त्रिवेलं करणीयं । नन्द्यन्ते गुरुः स्वयमभिमन्त्रितवासान् गृहीत्वा सङ्घकरे च दत्वा भणति—"ब्रह्मचर्यं पालयित्वा वत्स क्षुल्लकतां गतः । महाव्रतानि पञ्चापि पालयेरवधिं कृतम् ॥ १ ॥ मुनिवद्भिर्हरेर्नित्यं शिक्षासूत्रसमन्वितः । शुद्धमन्नं च निर्दोषं भोज्यं मुनिभिराहृतम् ॥ २ ॥ गृहिवेश्मसु गत्वा वा भोज्यं दोषविवर्जितम् । सचित्तवस्तुनो नैव कार्ये स्पर्शनभोजने ॥ ३ ॥ चैत्यप्रणामः साधूनां पर्युपास्तिरनुत्तरा । आवश्यकं

द्विवेलं च स्वाध्यायः सर्वदा पुनः ॥ ४ ॥ ब्रह्मचारिसमानस्तु वेषो ब्रह्मणि गुप्तयः । शान्तेन भवतैतत्तु विधेयं मुनिवत्सदा ॥ ५ ॥ शिशूनां साधुसाध्वीनां प्रणामो न प्रणामनम् । सिद्धान्तमेकं संत्यज्य धर्मशास्त्रनियोजनम् ॥ ६ ॥ विधेया गृहिसंस्कारा व्रतारोपविवर्जिताः । शान्तिकं पौष्टिकं चैव प्रतिष्ठां च समाचरेत् ॥७॥" इत्युक्त्वा ससङ्घः सूरिः "नित्थारपारगो होहि" इति भणन् तन्मस्तके वासान् क्षिपति । ततः क्षुल्लकोऽपि गुरूपदिष्टया मुनिरीत्या धर्मशास्त्रव्याख्यानं कुर्वन् विहरति वर्षत्रयमवधिः । ततः संयमस्य यथोक्तपालने प्रव्रज्या व्रतभङ्गे पुनर्गार्हस्थ्यं । इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायने क्षुल्लकत्वसंकीर्त्तनो नाम अष्टादश उदयः ॥ १८ ॥

एकोनविंश उदयः ।

अथ प्रव्रज्याविधिः ।

सा च प्रवचने दीक्षाग्रहणनिषिद्धानां न भवति । ते च दीक्षानिषिद्धा यथा—"अट्ठारस पुरिसेसु वीसं इत्थीसु दस नपुंसेसु । पव्वायणा अणरिहा तह वियलंगसरूवा य ॥ १ ॥" अष्टादशभेदाः पुरुषाः पुरुषेषु विंशतिभेदाः स्त्रियः स्त्रीषु दशभेदाः षण्डा नपुंसकेषु तथा विकलाङ्गस्वरूपा एते न प्रव्रज्यामर्हन्ति । परस-

मयेऽपि—"जात्यङ्गदोषसंपन्ना दूषिताः कुलकर्मभिः। शूद्राः काराश्च संन्यासं नार्हन्ति मनुवाक्यतः ॥ १ ॥" एते परसमयोक्तव्रतदोषा अपि प्रवचनोक्तदोषेष्वन्तर्दधति[1] पुरुषेष्वष्टादश दोषा यथा—"बाले १ वुड्ढे २ नपुंसे अ ३ कीवे ४ जड्डे य ५ वाहिए ६। तेणे ७ रायावरागी अ ८ उम्मत्ते अ ९ अदंसणे १० ॥ १ ॥ दासे ११ दुट्ठे १२ अ मूडे अ १३ अणत्ते १४ हुंगिएई अ उवदूए अ। १६ भयए १७ सेहनिष्पेडिआइ अ १८ ॥२॥" बालो वर्षाष्टकादर्वाक् १ वृद्धः क्षीणेन्द्रियकर्मेन्द्रियकृत्यः चतुर्थीमवस्थां प्राप्तः स संस्तारकदीक्षामेवार्हति न प्रव्रज्यां २ नपुंसकं तृतीयाप्रकृतिः षण्ढ इत्यर्थः ३ क्लीबः यः स्त्रियाभ्यर्थितः कामाभिलाषासहः सहसा ४ जड्डः अजङ्गमकरचरणोऽतिस्थूलः ५ व्याधितः सदा रोगी स्वाध्यायावश्यकभिक्षाटनाद्यक्षमः ६ स्तेनः चोरो राजादिनिग्रहभयादूव्रताकाङ्क्षी ७ राजापरागी कृतनृपापराधः ८ उन्मत्तो भूतवातादिदोषेण वैकल्यमाप्तः ९ अदर्शनो मिथ्यात्वाभिलाषेण सम्यक्त्ववर्जितः अन्धो वा १० दासो मूल्यक्रीतः ११ दुष्टः कषायविषय-दूषितः १२ मूढः कृत्याकृत्यविचाररहितः जिनादिनामस्मरणेऽपि निष्प्रज्ञः १३ ऋणार्त्तः सर्वजनस्य ऋणेन व्याकुलः १४ हुंगितो द्विधा जातिहुङ्गितः कर्महुङ्गितश्च जातिहुङ्गितो नीचजातिः कारुकोऽन्त्यजो[2] वा पितृमातृशुद्धिविवर्जितो वेश्यादास्यादितनयः कर्महुङ्गितः कृतब्रह्महत्यादिमहापातकः हुगि वुगि वर्जने अस्य धातोः

---

१ अन्तर्भवन्तीत्यर्थः २ अयमप्यागमशास्त्रसंस्कारहितैस्सुधारकनामधारकैमननीयः । मेतार्यादिदृष्टान्तस्तु निषेधविधेर्दुर्बलिइतिहासत्वात्। इतिहासेतु जन्मान्तरशुद्धानां दोषविशेषवशान्तिर्यग्भावमाप्तानामपि । स्वयंबुद्धानां केषाञ्चित्कथोपलभ्यते परन्तु न भवति तेनाधिकारानुमानम्.

प्रयोगात् वर्जनीय इत्यर्थः १५ अवबद्धः परेभ्यो द्रव्यं गृहीत्वा मासवर्षादिपर्यन्तं सेवां गतः १६ भृतको वस्त्र भोजनादिमूल्येन परस्य दास्यं गतः १७ शेषः निस्फोटितः पितृमातृगुरुमहत्तरादिभिरननुज्ञातः प्रव्रज्यां बलात्कारेण जिघृक्षुः १८ अमी अष्टादश पुरुषेषु दीक्षायां वर्जनीयाः । विंशतिः स्त्रीषु वर्ज्याः यथा—"जे अट्ठारस भेआ पुरिसस्स तहित्थिआइं ते चेव । गुव्विणि सबालवत्सा दोणि इमे हुंति अन्नेवि ॥ १ ॥" बालाद्या अष्टादश दोषाः स्त्रीष्वपि त एव १८ गुर्विणी १ स्तनन्धयापत्यसहिता च २ दोषद्वयमीलनाद्विंशतिः २० नपुंसकेषु दशादीक्षणीयाः यथा—"षंडए १ वाइए २ कीबे ३ कुंभी ४ ईसालूइत्ति अ ५ । सव्वणि ६ तक्कमसेवीय ७ पक्कियापक्खिए इअ ॥ १ ॥ सोगंधिए अ ९ सा सत्ते १० दस पए नपुंसगा । संकिलिट्ठत्ति साहूणं पव्वावेउं न कप्पिआ ॥ २ ॥" तत्र षण्डः—"नारीस्वभावस्वरवर्णभेदो मेढ्रो गरीयान् मृदुला च वाणी । मूत्रं सशब्दं च सफेनकं च एषानि षट् षण्डकलक्षणानि ॥ १ ॥" १ वाचिकः स्तूनलिङ्गः यस्य भगप्रवेशमात्रेण लिङ्गे श्वयथुर्भवति २ क्लीबः यस्य स्त्रीदर्शनाद्बीजं क्षरति ३ कुंभी यस्य बीजपतनकाले वृषणः कुंभवत्पीवरो भवति ४ ईर्ष्यालुः यस्य कामितस्त्रियां परपुरुषालापदर्शनमात्रेण ईर्ष्या भवति ५ शकुनिः उत्कटवेदोदयः सप्तधातुक्षयेऽपि यस्य कामोद्गमो न क्षीयते ६ तत्कर्मसेवी यस्य सर्वं व्यापारान् विमुच्य

१ एतेन ये महात्मानो बालान् कथमपि बोधयित्वा पित्राद्याज्ञामन्तरैव दीक्षन्ते देशान्तरं प्रेष्य दीक्षयन्ते वा त आज्ञाविराधका अनुत्साहिताः । उपदेशेऽधिकुर्वन्ति मुनयो नादेशे.

केवलं स्त्रीसेवा भोजनादिसर्वावस्थास्वपि संभोगः ७ पाक्षिकापाक्षिकः यस्य एकस्मिन् पक्षे कामोदयः न द्वितीये ८ सौगन्धिकः सदा गलितशुक्रः स्वलिङ्गं जिघ्रति ९ आसक्तः पतितेऽपि वीर्ये नारीशरीरमालिङ्ग्य तिष्ठति १० एते दश नपुंसकभेदाः संक्लिष्टा इति प्रव्रज्यायां अकल्पिताः। तत्रैषां दशविधानां कृतसंभोगानामपि पुंवेदोदययुक्तानां नपुंसकत्वं कथमित्युच्यते? तथा चागमे—"अचंतं च अदुत्तं कामं सेवंति पुरिसा जे। ते सव्वे विहुं नेया नपुंसगं वेअमावन्ना ॥ १ ॥" तथा च तत्वार्थटीकायां कामस्य वैकृत्यमन्यासक्तिर्नपुंसकत्वं अतएव दशप्रकारा नपुंसकस्यामी वर्जनीयाः तृतीयप्रकृतेर्नपुंसकस्य वर्जनं क्लीबे इति पुरुषवर्जनमध्ये कथितं। विकलाङ्गा वर्जनीया यथा—"हत्थे पाए कन्ने नासा उट्ठेवि वज्जिआ चेव। वामणगवडभकूज्जा पंगुलटुंठा य काणा य ॥ १ ॥ पच्छा विहुंति विगला आयरिय अन्नं न कप्पए तेसिं। सीसोठावे अव्वो आणगमहिसो व नन्नसि ॥ २ ॥" आजन्मकालाद्वा पश्चाद्वा हस्तहीनाः पादहीना नासाहीना ओष्ठहीना वामना वडभाः कुब्जाः पङ्गवः टूंटा काणाः प्रव्रज्यां न अर्हन्ति। तत्र वडभाः सङ्कुचितकरचरणाः शेषाः प्रसिद्धाः। कदाचित् पटुशरीरा अपि गृहीतदीक्षा गते काले हस्तहीनादिदोषान् प्राप्नुवन्ति तेषां सर्वगुरुगुणयुतानामपि नाचार्यत्वं कल्पते। शिष्यः काणकादिदोषसहितो व्रतित्व एव स्थाप्यो न पदमारोप्यः। इत्यदीक्षणीयाधिकारः। इत्यादिपूर्वदोषरहितो मार्दवार्जवक्षमानिधिः शमसंवेगनिर्वेदानुकंपास्तिक्ययुतो दीक्षार्थै कल्पते। यत उक्तमागमे—"सुद्धो जाइ कुलेणं रूवेणं तहय उवसमी धीरो। संविग्गमणो तुट्ठो पव्वज्जं

कप्पए पुरिसो ॥ १ ॥" परसमयेऽपि—"द्विजातिः शौचवान् विद्वान् स्वङ्गः शान्तो जितेन्द्रियः । विषयेभ्यो विरक्तश्च नरः संन्यासमर्हति ॥ १ ॥" तथा च—"गार्हस्थ्यं ब्रह्मचर्यं च क्षुल्लकत्वमुपास्य च । व्रताय कल्पते देही ब्रह्मचार्यपि कुत्रचित् ॥ १ ॥" गृही पालितगार्हस्थ्यस्तुलितब्रह्मचर्यः पूर्णीकृतक्षुल्लकत्वो यदि न प्रव्रज्याग्रहणे प्रभवति तदा तस्य पुनर्गार्हस्थ्यमुचितं प्रव्रज्याग्रहणे तु न पुनर्गार्हस्थ्यं । यदुक्तमागमे—"बालत्ते ब्रम्हचरित्ते गिहत्थत्ते विहुव्वणे । गहिऊण वयं पच्छा मरणेवि न मोयये ॥ १ ॥" यथा विध्युपनीतस्य बालस्यापि ब्रह्मचारिणो व्रतदानं युज्यते । अत्र कर्मणि गुरुः पूर्वोक्त एव । यदुक्तमागमे—"आयरिअउवज्झाओ पवत्तओ तहयवायणायरिओ । गीयत्थो वा साहू पव्वज्जं दिज्जूअ वराणं ॥ १ ॥ जेसिं वंदणकम्मं किज्जई साहुहिं सावएहिं । पित्तेपवज्जादाणे गुरुणो जुत्तान अन्नेवि ॥ २ ॥" गच्छसमाचारी विशेषेण आचार्यैरेव प्रव्रज्या दीयते क्वचिदुपाध्यायैरपि तत्र गुरुक्रमः प्रमाणं । तद्विधिरुच्यते—"दीक्षायां स्थापनायां च शस्तं मूलं पुनर्वसू । स्वातिर्मैत्रं करः श्रोत्रं पौष्णं ब्राह्मोत्तरात्रयम् ॥ १ ॥ समदोषोज्झिते धिष्ण्ये वारे शुक्रकुजोज्झिते । तिथिष्वदोषासु वर्षमासवासरशुद्धितः ॥ २ ॥ गोचरस्य विशुद्धौ च द्वयोश्चन्द्रबले तथा । जन्मादिमासत्यागे च सौजन्ये गुरुशिष्ययोः ॥ ३ ॥ लग्ने शुभे सर्वबलयुक्ते गुरुबलान्विते । यथोक्तगुणयुक्तस्य गुरुभिर्दीयते व्रतम् ॥ ४ ॥ भृगोरुदयवारांशभुवनेक्षणपञ्चके । चन्द्रांशोदयवारे च दर्शने च न दीक्षयेत् ॥५॥ षट्त्र्येकादशपञ्चमे दिनकरस्त्र्यायषष्ठे शशी लग्नात्सौम्यकुजौ शुभावुपचये केन्द्रत्रिकोणे गुरुः । शुक्रः

षट्त्रिनवान्त्यगोऽष्टमसुतद्येकादशो मन्दगो लग्नांशादिगुरुज्ञचण्डमहसां शौरेश्च दीक्षाविधौ ॥ ६ ॥ रविस्तृतीयो दशमः शशाङ्को जीवेन्दुजावन्तिमनाशवर्जौ । केन्द्राष्टवर्जो भृगुजस्त्रिशत्रुसंस्थः शनिः प्रव्रजने मतोऽन्यैः ॥ ७ ॥ शुक्राङ्गारकमन्दानां नाभीष्टः सप्तमः शशी । तमःकेतू तु दीक्षायां प्रतिष्ठावच्छुभाशुभौ ॥ ८ ॥ कलहभयजीवनाशनधनहानिविपत्तिनृपतिभीतिकरः । प्रव्रज्यायां नेष्टो भौमादियुतः क्षपानाथः ॥ ९ ॥" एवंविधे लग्ने प्रथमं दीक्षाप्रारंभः तदा पौष्टिकं विदध्यात् महादानं च दद्यात् सर्वदर्शनानि प्रीणयेत् सर्वमार्गणांश्च प्रीणयेत् । तत्र सामग्री सर्वापि वधूवर्जिता वैवाहिकी संयमश्रिया सह पुरुषस्य विवाह इति लोकव्यवहारः । तत्र ब्राह्मणः क्षत्रियो वैश्य उपनीतः पालितगार्हस्थ्यब्रह्मचर्यक्षुल्लकत्वः पूर्वेणैवोपनयनेन व्रतमर्हति । अथवा द्विजादिवर्णत्रयसंभूतः शिशुरनुपनीतोऽपि दीक्ष्यते । तस्य व्रतदानात्पूर्वमुपनयनविधिर्विधीयते । तत्र च व्रतबन्ध एव विधेयः न व्रतानुज्ञाव्रतविसर्गगोदानविधयः व्रतबन्धे तस्य द्विजातित्वमागतं ततो व्रतानुज्ञादिदीक्षायामप्रयोगिव्रतबन्धस्तु वर्णख्यापनाय न शूद्रो दीक्षणीय इति वचनात् । तथा द्विजातिसमाचाराणां शूद्राणामपि बाल्ये क्षुल्लकत्वपालनानन्तरं वा व्रतकाले पुरुषमन्त्रेण जिनोपवीनं तस्य शिष्यं च संस्थाप्य व्रतं देयं । संस्कार एव हि पुरुषाणां चरणप्रवेशकारणं, यदुक्तं—"जन्मना जायते शूद्रः संस्काराद् ब्राह्मणो भवेत्," अतः प्रव्रज्यां विना गार्हस्थ्ये जनापेक्षया शूद्रो नोपनयभाग् भवति व्रतदाने तूपनयनमर्हति ज्ञातिगार्हस्थ्यपरित्यागात् । पुरुषमन्त्रो यथा—"ॐ अर्हं पुरुषस्त्वं पुरुषज्ञस्त्वं पुरुषशीलस्त्वं पुरुषान्तरस्त्वं

पुरुषध्येयस्त्वं पुरुषध्याता त्वं पुरुषोपास्यस्त्वं पुरुषोपासकस्त्वं पुरुषयोज्यस्त्वं पुरुषयोजकस्त्वं पुरुषावगन्ता त्वं पुरुषावगम्यस्त्वं पुरुषावक्षेप्यस्त्वं पुरुषाक्षेप्तास्त्वं पुरुषाभिगम्यत्वं पुरुषाभिगन्तात्वं पुरुषपूज्यस्त्वं पुरुषपूजकस्त्वं पुरुषप्रणम्यस्त्वं पुरुषप्रणन्ता त्वं पुरुषप्रणेयस्त्वं पुरुषप्रणेता त्वं उपास्यस्त्वं योगस्त्वं स त्वं यस्त्वं अन्यस्त्वं परस्त्वं एष त्वं असौ त्वं अयं त्वं त्वमेव पुरुष उपसङ्गृहाणंहि अर्हं ॐ।" अयं मन्त्रः त्रिः पठनीयः ततः शूद्रस्यापि जिनोपवीतन्यासः। ततो व्रतकाले गुरुवसतौ वेदिरचना विधेया समवसरणस्थापना नानापूजोपकरणैः समवसरणपूजनं। ततो दीक्षणीयः स्वपितृपक्षगृहाद्वा स्वमातृपक्षगृहाद्वा स्वसंबन्धिगृहाद्वा संबन्धिकृतान्यगृहस्थगृहाद्वा नरयानतुरङ्गशिबिकारूढः कृतविवाहोचितमङ्गलगानवाद्यमहोत्सवः स्वस्ववर्णप्रभूतोचितवेषालङ्कारधारी चैत्येष्वर्हत्प्रतिमाः संपूज्य तथैव गुरुवसतिमागच्छेत्। तत्रान्तःप्रविश्य वस्त्रालङ्काराद्युन्मुच्य दीक्षणीयः स्वशिरसि लुञ्चनं भद्रकरणं वा कारयेत् शिखां स्थापयेत्। ततः परिधानोत्तरासङ्गधारी शिखासूत्रवान् सपरिजनो गुरुसमीपमुपगच्छति। तत्र समवसरणं गुरुवेदिमध्यगतस्त्रिस्त्रिः प्रदक्षिणयेत्। यदि चैत्ये व्रतग्रहणं तदा चैत्यस्यापि त्रिः प्रदक्षिणाकरणं प्रदक्षिणाकरणे शिष्यो गन्धाक्षतफलनालिकेरपूर्णकरः सर्वत्रापि। ततः शिष्यो गुरोरूर्ध्वस्य पूर्वाभिमुखस्य क्षमाश्रमणं दत्वा भणति—"इच्छाकारेण तुब्भे अम्हं पव्वावेह" गुरुर्भणति—"पव्वावेमि।" ततो गुरुः पूर्वयुक्त्या वासानभिमन्त्रयति ततः शिष्यः क्षमा-

१ मान्त्रप्रयोगः. २ उच्चैस्थितस्योत्थितस्य वा.

श्रमणपूर्वं भणति—"इच्छाकारेण तुब्भे अम्हं सम्यक्त्वसामायिक-श्रुतसामायिक-देशविरतिसामायिक-सर्वविरतिसामायिक आरोवणिअं नंदिकड्ढावणिअं वासखेवं करेह चेइयाइं च वंदावेह।" ततो गुरुः शिष्यस्य शिरसि वासान् क्षिपति कामधेनुमुद्रां रक्षां च करोति । ततो वर्द्धमानाभिः स्तुतिभिश्चैत्यवन्दनं शान्तिःश्रुतक्षेत्रभुवनशासनवैयावृत्त्यकरकायोत्सर्गाः स्तुतिकथनानि च पूर्ववत् । ततः शिष्यः क्षमाश्रमणपूर्वं भणति—"भयवं अम्हे पव्वावेह वेसं समप्पेह।" ततो गुरुः पूर्वाभिमुख उत्तराभिमुखाय शिष्याय सुगृहीतं कर्त्तव्यमिति भणन् वेषमर्पयति । वेषश्च चोलपट्टपट्टीलोमपट्टरजोहरणमुखवस्त्रिकारूपः । शिष्यश्च इच्छंति भणन् दक्षिणस्कन्धसंलग्नरजोहरणदशः करद्वयेन वेषं गृह्णाति । तत ऐशानीं दिशं गत्वा पूर्वोत्तराभिमुखः शिष्यो वेषं परिदधाति । धर्मध्वजदशाः दक्षिणस्कन्धकृतस्पर्शाः कुर्वन् मुखवस्त्रिकागर्भिताङ्गुलिगर्भो गुरुसमीपमागच्छति ततः क्षमाश्रमणपूर्वं भणति—"भयवं अम्हे मुंडावेह।" ततो गुरुः परमेष्ठिमन्त्रं भणन् तच्छीर्षाच्छिखाया लट्टात्रयं गृह्णाति शिखामपनयति तत्सहचारेण जिनोपवीतमप्यपनयति । ततः पूर्ववत् सम्यक्त्वसामायिकश्रुतसामायिकदेशविरतिसामायिकसर्वविरतिसामायिक आरोवणिअं कायोत्सर्गकरणं चतुर्विंशतिस्तवचिन्तनं मुखेन चतुर्विंशतिस्तवनपाठः मुखवस्त्रिकाप्रतिलेखनं वन्दनकं च । ततः शिष्यः क्षमाश्रमणदानपूर्वं भणति—"इच्छाकारेण तुब्भे अम्हं सम्यक्त्वसामायिकं श्रुतसामायिकं देशविरतिसामायिकं सर्वविरतिसामायिकं आरोवेह।" गुरुः कथयति—"आरोवेमि।" ततस्त्रिर्नमस्कारं पठित्वा

गुरुणा सह शिष्यः सम्यक्त्वसामायिकदण्डकं त्रिरुच्चरति पुनस्तयैव युक्त्या देशविरतिसामायिकदण्डकं त्रिरुच्चरति पुनस्तयैव युक्त्या सर्वविरतिसामायिकदण्डकं त्रिरुच्चरति । सम्यक्त्वसामायिकदेशविरतिसामायिकदण्डकौ पूर्वोक्तौ सर्वविरतिसामायिकदण्डकस्त्वयं—"करेमि भंते सामाइयं सव्वं सावज्जं जोगं पच्चक्खामि जावजीवाए तिविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजानामि तस्स भंते पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि।" तथा च यः पूर्वं प्रतिपन्नसम्यक्त्वसामायिकदेशविरतिसामायिकश्रुतसामायिको भवति तस्य सम्यक्त्वसामायिकदेशविरतिसामायिकदण्डकोच्चारणं । नहि पूर्वालापेऽपि सम्यक्त्वसामायिकश्रुतसामायिकदेशविरतिसामायिककथनं वक्तव्यं केवलं सर्वविरतिसामायिकदण्डकोच्चारपूर्वालापेऽप्येकस्य कथनं । यः पुनः कुमारश्रमणः अप्रतिपन्नसम्यक्त्वदेशविरतिसम्यक्त्वो भवति तस्य सामायिकत्रयालापे दण्डकत्रयोच्चारणं । ततः शिष्यो निषद्यासीनस्य गुरोः पुरः क्षमाश्रमणपूर्वं भणति—"इच्छाकारेण संदिस्सह भयवं सव्वविरइसामाइयं आरोवेह।" एवमित्यालापेन षट् क्षमाश्रमणगुरुवाक्यादि पूर्ववत् । ततः पुनः क्षमाश्रमणपूर्वं शिष्यो भणति—"इच्छाकारेण संदिस्सह भयवं सव्वविरइसामाइअं आरोवणिअं निरुद्धं करावेह।" गुरुराचाम्लप्रत्याख्यानं कारयति। ततो गुरुः साधूनां करे अभिमन्त्रितवासान् ददाति साध्वी श्रावकश्राविकाणां करेऽभिमन्त्रिताक्षतांश्च। ततो गुरुः शिष्यस्य नाम करोति। नामकरणं तु सप्तविशुध्या । सप्तविशुद्धिर्यथा—नक्षत्रयोन्यविरोध

१ गणाविरोध २ वर्गाविरोध ३ नाड्यविरोध ४ राश्यविरोध ५ राश्यधिपत्यविरोध ६ लभ्यालभ्यविभाग ७ एतद्विशुद्धं नाम शिष्यस्य कुर्यात् । नामकथने सर्वेऽपि साधुसाध्वीश्रावकश्राविका वासाक्षतक्षेपं शिष्यशिरसि कुर्वन्ति । ततः शिष्यः समवसरणं गुरुं प्रदक्षिणीकृत्य गुरुसाधूंश्च प्रणमति साध्वीश्रावकश्राविकास्तं प्रणमन्ति । ततो गुरुर्देशनां करोति । देशना यथा—"चत्तारि परमंगाणि दुल्लहाणिह जंतुणो । माणुसत्तं सुई सद्धा सामग्गी गुरुपुव्विआ ॥ १ ॥" इत्यादि सव्वपवज्जाविहाणव्याख्यानं । "एग दिवसंपि जीवो पवज्जमुवागओ अणन्नमणो । जइवि न पावइ मुक्खं अवस्स विमाणिओ होई ॥ १ ॥" इत्यादिदीक्षोचितगाथाव्याख्यानं । अत्र च नियमा दशवैकालिकक्षुल्लकाचारकथाध्ययनयुक्त्या सामायिकसाधूनामाचारः क्षुल्लकानामप्ययमेवाचारः क्षुल्लकाचारकथाध्ययनं यथा—"संजमे सुट्ठि अप्पाणं विप्पमुक्काणताइणं । तेसिं मे अमणाइन्नं निग्गंथाणमहेसिणं ॥ १ ॥ उद्देसिअं कीयगडं निआगं अभिहडाणि य । रायभत्ते सिणाणे अ गंधमल्ले अ वीअणे ॥ २ ॥ सन्निही गिहि मत्तेअ रायपिंडे किमिच्छए संवाहणं दंत पहोवणाय संपुच्छ णं देह पलोवणा य ॥ ३ ॥ अट्ठावए अन्नालीअत्थत्तस्स य धारणट्ठाए । तिगिच्छं वाहणा पाए समारंभं च जोयणो ॥ ४ ॥ सिज्जायरपिंडं च आसंदीपलिअं कए । गिहंतरनिसिज्जाए गायसुवट्टणाणि अ ॥ ५ ॥ गिहिणो वेआवडिअं जाइआजीववित्तीआ । तत्ता निवुडइभोइत्तं आउरस्सरणाणि य ॥ ६ ॥ मूलए सिंगबेरेअ उच्छूखंडेअनिव्वुडे । कंदे मूलेअसचित्ते फले बीए अ आमए ॥ ७ ॥ सोवच्चले सिंधवे लोणे समालोणे अ आमए ।

सा मुद्देपं सुखारे अ काला लोणे अ आमए ॥ ८ ॥ धूवणित्ति वमणे अ वत्थी कम्मविरे अणे । अंजणे दंतवणे अगायाब्भंगविभूसणो ॥ ९ ॥ सव्वमेअ मणाइन्नं निग्गंथाणमहेसिणं । संजमंमि अजुत्ताणं लहूभूअविहारिणं ॥ १० ॥ पंचासवपरिन्नाया तिगुत्ता छसु संजया । पंचनिग्गहणा धीरा निग्गंथा ओज्जुदंसिणो ॥ ११ ॥ आयावयंति गिम्हेसु हेमंतेसु अवाउडा । वासासु पडिसंलीणा संजयासु समाहिआ ॥ १२ ॥ परिसहरिऊदंता धूअमोहा जिइंदिआ । सव्वदुक्खपहीणट्ठा पक्कमंति महेसिणो ॥ १३ ॥ दुक्कराइं करित्ताणं दुस्साहाई सहित्तु अ के । ईत्थ देवलोएसु केइसिज्झंति नीरया ॥ १४ ॥ खवित्ता पुव्वकम्माइं संजमेण तवेण य । सिद्धिमग्गमणुपत्ता ताइणो परिनिवुडत्तिबेमि ॥ १५ ॥" देशनानियमश्चायं ततः सर्वविरति सामायिकारोवणिअं करेमि काउस्सग्गं अन्नत्थऊससिएणं जाव अप्पाणं वोसिरामि ।" कायोत्सर्गे चतुर्विंशतिस्तवचतुष्टयचिन्तनं पारयित्वा मुखेन चतुर्विंशतिस्तवभणनं । ततः—"शिवमस्तु सर्वजगतः परहितनिरता भवन्तु भूतगणाः । दोषाः प्रयान्तु नाशं सर्वत्र सुखीभवतु लोकः ॥ १ ॥ सर्वमङ्गलमाङ्गल्यं सर्वकल्याणकारणम् । प्रधानं सर्वधर्माणां जैनं जयति शासनम् ॥ २ ॥" गाथा—"चिअवंदण वेसप्पण समइ अ उसग्ग लग्ग अट्टगहे । सामाइ अतिअकट्टण तियपायाहिंण वास उसग्गो ॥ १ ॥" इति सङ्ग्रहः । तथा जिनकल्पिनां प्रव्रज्यायामयं विशेषः, अट्टाग्रहणस्थाने संपूर्णलोचकरणं प्रथमं मुण्डनं नास्ति । वेषग्रहणस्थाने तृणमयैकवस्त्रग्रहणं रजोहरणं चामरमयूरपिच्छमयं शेषं तथैव उत्थापनायोगोद्वहनादौ गृहस्थगृह एव सङ्घट्टादानं स-

द्दृष्टप्रतिक्रमणं पाणिपात्रभोजनं च। शेषः सर्वोऽपि विधिस्तथैव ॥ इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायणे प्रव्रज्याकीर्त्तनो नाम एकोनविंशतितम उदयः ॥ १९ ॥

विंशतितम उदयः ।

उत्थापनाविधिः ।

इह हि प्रव्रज्याग्रहणमात्रेण सामायिकयतित्वेन भगवन्तोऽर्हन्तः स्वयंबुद्धा एव यतित्वमाप्नुवन्ति न बुद्धबोधिताः पञ्चमहाव्रतोच्चारोत्थापनाविरहिता यतय उच्यन्ते तद्विधिरुच्यते,-प्रथमं नन्दिविधियुक्तं आवश्यकदशवैकालिकयोगोद्वहनं विदध्यात् । ततश्च मण्डलीप्रवेशयोगोद्वहनान्तराले अध्ययनत्रयाचाम्लत्रये नन्दिरुत्थापनाख्या विधेया। आवश्यकदशवैकालिकमण्डलिप्रवेशयोगा योगोद्वहनाधिकारे कथयिष्यन्ते। उत्थापनाविधिस्त्वयं,-अत्र तिथिवारर्क्षलग्नादि प्रव्रज्यासनं। अत्र शिष्यकृते वस्त्रसंस्तारकमुखवस्त्रिकारजोहरणपात्रादि सर्वं नवीनं विधेयं। ततश्चैत्ये वा धर्मागारे वा समवसरणं संस्थाप्य गुरुः शिष्यं समवसरणस्य परमेष्ठिमन्त्रं भणन् पूर्वं प्रदक्षिणात्रयं कारयित्वा ततो वासान् अभिमन्त्रयेत् । ततः शिष्यः क्षमाश्रमणपूर्वं भणति,—"इच्छाकारेण तुम्भे अम्हं महव्वयारोवणत्थं नंदिकड्ढावणिअं वासनिक्खेवं करेह चेइआइं च वंदावेह।" गुरुर्वासक्षेपं विधाय शिष्येण समं चैत्यवन्दनं स्तुतियुक्तं पूर्वं च करोति। श्रुतादिदेवताकायोत्स-

गैस्तुतयः पूर्ववत् । नन्दिपाठस्त्विः यथा—"नाणं पंचविहं पन्नत्तं तं जहा–आभणिवोहिअन्नाणं सुअन्नाणं ओहिमणपज्जवन्नाणं केवलन्नाणं तत्थ चत्तारि नाणाइं ठपाइं ठवणिज्जाइं नो उद्दिसिज्जंति नो समुद्दिसिज्जंति नो अणुन्नविज्जंति सुअन्नाणस्स उद्देसो समुद्देसो अणुन्नाणुउगोपवत्तइं किं अंगपविट्ठस्स उद्देसो समुद्देसो अणुन्नाणुउगोपवत्तइं अंगबाहिरस्स उद्देसो समुद्देसो अणुन्नाणुउमो पवत्तई अंगपविट्ठस्स विउद्देसो। समुद्देसो अणुन्नाणुउ गोपवत्तई आवस्स उद्देसो० ३ आवस्सगव इरित्तस्स उद्देसो० ३ आवस्सगस्सवि उद्देसो ३ आवस्स गवइरित्तस्स विउद्देसो ३ जई आवस्सगस्स उद्देसो० ३ किं सामाइअस्स चउवीसत्थयस्स वंद्णस्स पडिकम्मणस्स काउसग्गस्स पच्चक्खाणस्स सव्वेसिं पिएएसिं उद्देसो ३ जई आवस्सगवइरित्तस्स उद्देसो० ३ किं कालियस्स उद्देसो० ३ उक्कालिअस्स उद्देसो० ३ कालिअस्स वि उद्देसो० ३ उक्कालिअस्स वि उद्देसो० ३ जइ उकालियस्स उद्देसो० ३ किं द्सवेआलिअस्स कप्पिआकप्पिअस्स चूलकप्पसूअस्स महाकप्पसुअस्स पमायपमायस्स उवाइअस्स रायपसेणिअस्स जीवाभिगमस्स पन्नवणाए महापन्नवणाए नंदिएविज्जाचरणविणित्थयस्स विहारकप्पस्स मरणविभत्तीए वीअरागसुअस्स झाणविभत्तीए आयविसोहीए चरणविसोहीए पमायपमायस्स आउरपच्चक्खाणस्स महापच्चक्खाणस्स सव्वेसिंपि एएसिं उद्देसो० ३ जइ कालिअस्स उद्देसो ३ किं उत्तरज्झयणाणं द्साणं कप्पस्सववहारस्स णिस्सीहस्स महाणिस्सीहस्स इसि भासियाणं जंबूदीवपन्नतीए विमाणपविभत्तीए महल्लिआविमाणपविभत्तीए अंगचूलिआए बंगचूलिआए विवाहचूलिआए

अरुणोववायस्स धरणोववायस्स वरुणोववायस्स बेसमणोववायस्स देवंदोववायस्स उट्ठाणसुअस्स समुट्ठाण-सुअस्स नागपरिआवलिआणं निरयावलियाणं कप्पिआणं काप्पवर्डिसयाणं पुप्फिआणं पुप्फचूलियाणं वन्हीदसाणं सव्वेसिंपि एएसिं उद्देसो० ३ जइ अंगपविट्ठस्स उद्देसो० ३ किं आयारस्स सूअगडस्स ठाणस्स समवायस्स विवाहपन्नत्तीए नायाधम्मकहाणं उवासगदसाणं अंतगडदसाणं अणुत्तरोववाइअदसाणं पन्हावागरणाणं विवागसुअस्स दिट्ठिवायस्स सव्वेसिंपि एएसिं उद्देसो समुद्देसो अणुंनाणुं ओगोपवत्तइ इमं पुणपट्ठवणं पडुच्च इमस्स उद्देसो अणुन्नाणुए पवत्तइ खमासमणाणं हत्थेणं सुत्तेणं अत्थेणं तदुभएणं अणुजाणामि २ अणुजाणामि ॥" ततो गुरुशिष्यौ महव्वयारोवणियं कायोत्सर्गं पूर्ववत्कुरुतः । तत ऊर्ध्वस्थौ गुरुशिष्यौ परमेष्ठिमन्त्रं त्रिर्भणतः । ततो गुरुर्योजितकरः करयुगलोपरि रजोहरणं संस्थाप्य वामकरानामिकालंबितमुखवस्त्रिकः शिष्यं कराञ्जलिधृतमुखवस्त्रिकारजोहरणमीषन्नतमेकमेकं महाव्रतं रात्रिभोजनपरित्यागव्रतसहितं त्रिस्त्रिरुच्चारयति । तानि यथा—"पढमे भंते महव्वए पाणाई वायाओ वेरमणं सव्वं भंते पाणाई वायं पच्चक्खामि से सुहमं वा वायरं वा तस्सं वा थावरं वा नेवसयं पाणेअइ वाइज्जा नेवन्नेहिं पाणेअइवायाविज्जा पाणेअइ वायांतेवि अन्नेन समणुं जाणामि जावजीवाए तिविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि तस्स भंते पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि त्रि० पढमे भंते महव्वए उवट्ठिओमि सव्वाओ पाणाईवायाओ वेरमणं आहावरे दुच्चे भंते महव्वए मुसावायाओ

वैरमणं सव्वं भंते मुसावायं पच्चक्खामि से कोहा वा लोहा वा भया वा हासा वा नेव सयं मुसं वइज्जा नेवन्नेहिं मुसं वायाविज्जा मुसं वायंते वि अन्नेन समणु जानामि जावजीवाएति० दोच्चे भंते महव्वए उवट्ठिओमि सव्वाओ मुसावायाओ वेरमणं २ आहावरे तच्चे भंते महव्वए अदिन्नादाणाओ वेरमणं सव्वं भंते अदिन्नादाणं पच्चक्खामि से गामे वा नगरे वा रन्ने वा अप्पं वा बहुं वा अणुं वा थूलं वा चित्तमंतं वा अचित्तमंतं वा नेव सयं अदिन्नं गिन्हिज्जा नेवन्नेहिं अदिन्नं गिन्हाविज्जा अदिन्नं गिण्हंतेवि अन्नेन समणुजाणामि जावजीवाए तिविहं० तच्चे भंते महव्वए अवट्ठिओमि सव्वाओ अदिन्नादाणाओ वेरमणं ३ आहावरे चउत्थे भंते महव्वए मेहुणाओ वेरमणं ४ सव्वं भंते मेहुणं पच्चक्खामि से दिव्वं वा माणुसं वा तिरिक्खजोणिअं वा नेव सयं मेहुणं सेविज्जा नेवन्नेहिं मेहुणं सेवाविज्जा मेहुणं सेवंते वि अन्ने न समणुजाणामि जावजीवाए तिवि० चउत्थे भंते महव्वए उवट्ठिओमि सव्वाओ मेहुणाओ वेरमणं ४ आहावरे पंचमे भंते महव्वए परिग्गहाओ वेरमणं सव्वं भंते परिग्गहं पच्चक्खामि से अप्पं वा बहुं वा अणुं वा थूलं वा चित्तमंतं वा अचित्तमंतं वा नेव सयं परिग्गहं परिगिन्हिज्जा नेवन्नेहिं परिग्गहं परिगिन्हाविज्जा परिग्गहं परिगिन्हंतेवि अन्ने न समणुजाणामि जावजीचाए तिवि० पंचमे भंते महव्वए उवट्ठिओमि सव्वाओ परिग्गहाओ वेरमणं ५ आहावरे छट्ठ भंते वए राईभोअणाओ वेरमणं सव्वं भंते राईभोअणं पच्चक्खामि से असणं वा पाणं वा खाइमं वा साईमं वा नेव संय राईं भुञ्जिज्जा नेवन्नेहिं राइ भुजाविज्जा

राई भुञ्जंतेवि अन्ने न समणुजानामि जावजीवाए तिविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि करंतं वि अन्नं न समणुजाणामि तस्स भंते पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि छट्ठे भंते वए उवट्ठिओमि सव्वाओ राईभोअणाओ वेरमणं ६" ततः संप्राप्तायां लग्नवेलायां—"इच्चे इयाइं पंचमहव्वयाइं राईभोअणवेरमणं छट्ठाइं अत्तहिअट्ठयाए उवसंपज्जित्ताणं विहरामि।" इति त्रिरुच्चारयेत् । ततो गुरुः पुनर्वासाद्यभिमन्त्रणं विधाय साधुश्रावकादिभ्यो दद्यात् । ततः शिष्यो वन्दनकदानपूर्वं क्षमाश्रमणं दत्वा भणति,—"इच्छाकारेण तुब्भे अम्हं महव्वयाइं आरोवेह ।" एवं क्षमाश्रमणदानानि गुरुशिष्यवचनानि महाव्रतारोपणाभिलापेन पूर्ववत् । क्षमाश्रमणदानान्ते साधुसाध्व्यादयो वासाक्षतान् शिष्यशिरसि क्षिपन्ति । ततः पंचमहव्वयारोवणथिरीकरणत्थं करेमि काउस्सग्गं अन्नत्थ ऊससिएणं यावदप्पाणं वोसिरामि ।" चतुर्विंशतिस्तवैकचिन्तनं पारयित्वा चतुर्विंशतिस्तवभणनं । तत उपविश्य शक्रस्तवपाठः । ततः शिष्यो गुरुं त्रिः प्रदक्षिणीकृत्य वन्दते यथार्हमन्यसाधूनपि । ततस्तस्य तत्र निषण्णस्याचार्योपाध्यायरूपपदावधिः क्रियते । साध्व्याश्चोत्थापनायामनेनैव विधिना कृतेन प्रवर्त्तिनीमहत्तराव्रतद्वयबन्धः तत उच्चार्यते यथाकोटिकादिको गणः व्रजादिका शाखा चान्द्रादिकं कुलं इत्युच्चार्य स्वकीयगुरुक्रमोपाध्यायक्रममुच्चारयेत् । साध्व्याः प्रवर्त्तिनीमहत्तराक्रममुच्चारयेत् यावदमुको व्रती अमुका व्रतिनीति । तद्दिनाचाम्लं ततश्चत्वार आचाम्लाः अनन्तरमपि कार्यन्ते । आचाम्लसप्तककरणं सप्तमण्डलीप्रवेशार्थं करणीयं । सप्तमण्डल्यो यथा

—"सुत्ते १ अत्थे २ भोअण ३ काले ४ आवस्सए ५ अ सज्झाए ६ संथारए विअ ७ तहा सत्ते आ मंडली हुंति ॥ १ ॥" अनेनैव क्रमेणाचाम्लकरणेन शिष्यस्य पूर्वसाधुभिः सह मण्डलीसङ्घट्टनं । अत्रावश्यकदशवैकालिकसिद्धान्तपाठः । प्रज्ञाहीनस्यापि दशवैकालिकाध्ययनचतुष्कपाठमन्तरेण नोत्थापना । दशवैकालिकतपस्यारब्धे दशवैकालिकपाठारंभः ॥ इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायणे उत्थापनाकीर्त्तनो नाम विंशतितम उदयः ॥ २० ॥

एकविंशतितम उदयः ।

अथ योगोद्वहनविधिः ।

मनोवाक्कायानां तपःसमाधौ योजनं योगः अथवा सिद्धान्तवाचनायामन्यविहितया तपसा योजनं योगः ते चागमक्रमोद्वहनेन बहुविधाः तेषां निरुद्धपारणककालस्वाध्यायादिभिरुद्वहनं योगोद्वहनं । कीदृशः साधुर्योगोद्वहने योग्यो भवतीत्युच्यते, कीदृशश्च गुरुः कीदृशाः सङ्घट्टसहायाश्च । कार्या निमित्तं कार्यमित्येष निर्देशक्रमः इति वचनात् कार्यी योगवाही निमित्तं गुरुसहायक्षेत्रोपकरणकालभिक्षाग्रहादि कार्यं योगोद्वहनं एतत्क्रमेण व्याख्यानमुच्यते । योगवाहिलक्षणं यथा–आर्या—"मौनी परीषहसहो मानरुषालोभकपटनिर्मुक्तः । बलवान् समदृष्टिश्च क्षितिपतिरक्कारिमित्रादौ ॥ १ ॥ गुरुभक्तिकृन्महात्मा प्रसन्नवाङ्मनसकायसं-

योगः । पट्वावीन्द्रयो दयालुः श्रुतशास्त्रानेकपरमार्थः ॥ २ ॥ लज्जासत्त्वसमेतो विरक्तधीर्जिततृषानिद्रः । अस्खलितब्रह्मधरः प्रायश्चित्तक्षताघगणः ॥३॥ बाह्याभ्यन्तररसलोभवर्जितो निर्जितान्तरङ्गरिपुः । त्यक्तान्यकृत्यभावो योगोद्वहने मुनिर्योग्यः ॥४॥ अथ गुरुलक्षणं–आर्या—"शान्तो दयालुरशठः प्रियवाक् षट्त्रिंशता गुणैर्युक्तः । आर्जवमार्दवसदनं कृतयोगः समयवित् सम्यक् ॥१॥ परमार्थज्ञः कुशलो जितनिद्रालस्यमोहमदमायः । सानन्दः शिष्यान् प्रति योगोद्वहने गुरुः कार्यः ॥ २॥ सहायलक्षणं यथा–आर्या—"जितनिद्रालस्यक्षुत्कृतयोगः स्नेहवान् गुणेषु रतः । उद्यमवान् सदयमतिर्जितविषयकषायपरमरिपुः ॥ १ ॥ बह्वागमविद् बहुसत्वसंयुतो बहुकलासु विमलमतिः । नीरुक् प्रसन्नचेता योगोद्वहने सहायः स्यात् ॥ २ ॥" अत्र सहायाः–दण्डधरसङ्घट्टकवारिभिक्षानेतृसर्वस्मृतिकारकधर्मोपदेशशब्दरूपाः । क्षेत्रलक्षणं यथा–आर्या—"बहुसलिलमृदुलभिक्षं स्वचक्रपरचक्रभयविनिर्मुक्तम् । बहुयतिसाध्वीश्राद्धं बहुशास्त्रविशारदाकीर्णम् ॥ १ ॥ नीरोगजलान्नयुतं चर्मास्थिकचादिसङ्करविमुक्तं । अहिजंबुकवृषदंशकवृषपल्लीसरटनिर्मुक्तम् ॥ २ ॥ प्रायः पवित्ररथ्यं रुग्मारीप्रभृतिवर्जितं नित्यम् । अल्पकषायपुरजनं योगोद्वहने शुभं क्षेत्रम् ॥ ३ ॥" वसतिलक्षणं यथा—"चर्मास्थिदन्तनखकेशगूथमूत्रापवित्रतारहितम् । अध उपरि च निश्छिद्रं निरवकरं घृष्टमृष्टं च ॥ १ ॥ सूक्ष्माङ्गिवृन्दसंवासयोग्यभूस्फोटवर्जितं परितः । रम्यमपरार्थरचितं योगोद्वहने शुभं सदनम् ॥ २ ॥" मूत्रपुरीषोत्सर्गस्थण्डिललक्षणं यथा—"निर्जनमजन्तुजातं जलहरिततृणाहिबिलरहितम् । बीजादिसूक्ष्ममुक्तं स्थण्डिलमत्र प्रशस्यं

स्यात् ॥ १ ॥" योगोद्वहने उपकरणानि यथा—"मृत्काष्ठालाबुमयं पात्रं सुविलिप्तमञ्जसा पूतम् । तद्बेष्टनबन्धनमपि नवीनमतिनिर्मलं बहुलम् ॥ १ ॥ नव्या च पात्ररज्जूः संस्तारकमुत्तमं सवस्त्रं च । लघ्वी मार्जनिकापि च समण्डला कालदण्डी च ॥ २ ॥ आचारशास्त्रपुस्तकमथ नन्द्यावाससमवसरणादि । प्रासुकजलसामग्री वस्त्रमपि विषट्टपदीकं च ॥ ३ ॥ निर्दन्ततृप्तिकरणं निट्प्रथमप्रहरजलपरित्यागः । इत्यादि चोपकरणं योगोद्वहने प्रगुणमिष्टम् ॥ ४ ॥" योगोद्वहन कालो यथा—"सुभिक्षं साधुसामग्री सर्वोत्पाताद्यभावता । कालिकेषूत्कालिकेषु योगेषु समयो ह्ययम् ॥ १ ॥ आर्द्रादिस्वात्यन्ते नक्षत्रगणे विवस्वता युक्ते । कालिकयोगानामयमुपयोगी काल उद्दिष्टः ॥ २ ॥ आर्द्रादिस्वात्यन्ते नक्षत्रगणे विवस्वता मुक्ते । स्तनिते विद्युति वृष्टौ कालग्रहणं न कर्त्तव्यम् ॥ ३ ॥" अथ योगोद्वहने चर्या यथा—"रजन्याः प्रथमे यामे चरमे च सदा यतेः । जागरो योगवाही तु जागर्त्येव क्षणे क्षणे ॥ १ ॥ हास्यकन्दर्पविकथाशोकरत्यरतीस्त्यजेत् । पञ्चविंशतिकोदण्डमानभूमेः परं मुनिः ॥ २ ॥ नैकाकी याति सततं योगवाही विशेषतः । धनुःशते लङ्घिते तु साधोराचाम्लमादिशेत् ॥ ३ ॥ सीवनं लेपकरणं रचनामुपधेरपि । वर्जयेत्सर्वयोगेष्वप्यागाढेषु विशेषतः ॥ ४ ॥ ताम्रसीसकांस्यलोहत्रपुरोमनखादिकम् । चर्मादि न स्पृशेत् स्पृष्टौ कायोत्सर्गो विधीयते ॥ ५ ॥ अस्पृष्टाप्येकवेलं दन्ताद्युत्सर्गसंज्ञया । कायोत्सर्गे नमस्कारं तत्रैकं च स्मरेन्मुनिः ॥ ६ ॥ योगोद्वहनमध्ये तु केशरोमनखादिकम् । नोत्सृजेत्प्रातरुत्सर्गे विधातव्योऽप्ययं विधिः ॥ ७ ॥ मुखवस्त्रं प्रतिलिख्य द्वादशावर्त-

वन्दनम् । दत्वा चैव तदुत्सर्गः कायोत्सर्गश्च पूर्ववत् ॥ ८ ॥ योगवाही नमस्कारप्रत्याख्यानं दिने दिने । रात्रिप्रतिक्रमणान्ते कुर्यात् प्रातर्यथोचितम् ॥ ९ ॥ अपूर्वपठनं चैव कुर्यात्पूर्वं न विस्मरेत् । उपधिं पात्रबन्धादि द्विवेलं प्रतिलेखयेत् ॥ १० ॥ मितं वदेत् सूक्ष्मशब्दं कामक्रोधादि वर्जयेत् । महाव्रतानि पञ्चैव धारयेद्गाढयुक्तितः ॥ ११ ॥ सङ्घट्टकप्रतिच्छेदं न कुर्यात्कालकेष्वपि । शुद्धमन्नं च पानं च गृह्णीयात्पात्रवाससी ॥ १२ ॥ उच्छिष्टान्नपरित्यागं न कुर्याद्वमनादिकम् । मितः संस्तारवस्त्रादेरासनादेः परिग्रहः ॥ १३ ॥ स्वाध्यायकालग्रहणे विदध्याददतियत्नतः । अस्वाध्याये न कर्त्तव्यं पाठकालादिकं क्वचित् ॥ १४ ॥ अकाले च मलोत्सर्गं न कुर्वीत निशादिके । आनीतमकृतयोगैर्न ग्राह्यमशनं जलम् ॥ १५ ॥ तैः समं नैव सङ्घट्टौ न शय्यासनसंश्रयः । प्रतिलिखितं तैर्वसनशय्यादि न विधापयेत् ॥ १६ ॥ नाङ्गे चिकित्सितं कुर्यात् तदन्येषु न कारयेत् । न च वृष्टौ महावाते निर्गच्छेद्भिक्षणादिषु ॥ १७ ॥ इयं तु चर्या सर्वेषु योगेषु परिकीर्त्तिता । ब्रूमो भगवतीयोगचर्यामथ यथाविधि ॥ १८ ॥ बल्यर्थं विहिताहारं गर्हिताहारमेव च । तथा मृतक्रियाहारं वर्जयेददतियत्नतः ॥ १९ ॥ देवादिपात्रसंस्पृष्टं संस्पृष्टं तत्परं परम् । तथा विकृतिसंस्पृष्टं न कल्पं योगवाहिनाम् ॥ २० ॥ कुर्यादकृतयोगैश्च न मलोत्सर्जनादिकम् । भिक्षाभ्रमे च संस्पर्शस्तेषामेव न युज्यते ॥ २१ ॥ उपधेरचनाकर्म गुर्वादेशं विना नहि । पक्वान्नवर्जितामन्यां विकृतिं च करे वहन् ॥ २२ ॥ ददाति भिक्षां चेन्नैव गृह्णीयाद्गणियोगकृत् । आर्द्राङ्गश्वानमार्जारमांसाशनविहङ्गमान् ॥ २३ ॥ वत्सं स्पृष्ट्वा ददद्भिक्षां वर्जयेद-

परं तदा । आर्द्रचर्मादिहस्त्यश्वखरविट्स्पर्शमात्रतः ॥ २४ ॥ तत्स्पर्शे तत्करे भिक्षां वर्जयेदतियत्नतः । क्षीर-
तैलघृताभ्यक्ता न स्पृशेत्षण्ढपुंवशाः ॥ २५ ॥ तद्दिने नवनीताक्तकज्जलाङ्कितलोचना । भिक्षां ददाति न
ग्राह्या सैवान्यस्मिन् दिने शुभा ॥ २६ ॥ नवनीतेन जीर्णेन तद्दिने कृतमञ्जनं । या बिभर्त्ति न तत्पाणेर्गृह्णी-
यात्पानभोजने ॥ २७ ॥ अकल्पितेन द्रव्येण स्पृष्टं तद्दिवसेऽखिलम् । न कल्पतेऽन्यदिवसे तत्कल्पं ज्योतिषा
विना ॥ २८ ॥ बालवत्सा निजं बालं विमुच्य स्तनपायिनम् । भिक्षां ददाति सानर्हा योग्या चास्तनपायि-
नम् ॥ २९ ॥ एवं च गोमनुष्यादेः सा चेद्भोजनदायिकः । गृह्णीयात्तत्करे नान्नं तदभावे च कल्पते ॥ ३० ॥
शिलाकाष्ठकपाटादि यत्स्पृष्टं स्यादकल्पितैः । न स्प्रष्टव्यं तच्च तैस्तु विहीनं स्पर्शमर्हति ॥ ३१ ॥ शुष्कास्थि-
चर्मदशनस्पर्शो यदि कदाचन । जायते तत्र कुर्वीत कायोत्सर्गं च पूर्ववत् ॥ ३२ ॥ सन्निधिश्वानमार्जाराधा-
कर्मवृषमानुषैः । महिषाश्वताम्रचूडकरिभिश्चैव घट्टितैः ॥ ३३ ॥ व्रतोपघातो जायेत तथान्यकरणादपि । पा-
त्रोपकरणादौ च कणमात्रस्थितेरपि ॥ ३४ ॥ नार्द्रेण प्रासुकेनापि पाणिना वस्तुनो ग्रहः । जलेन युज्यते चाधा-
कर्म स्पृष्ट्वा ततः परम् ॥ ३५ ॥ व्याख्यानपाठस्तुत्यादि कर्त्तव्यं गुर्वनुज्ञया । अनुप्रेक्षापरिवृत्तिः करणीया
यथोचिता ॥ ३६ ॥ उपर्युपरि भाण्डेभ्यश्चतुः पञ्चभ्य एव च । ग्राह्यं चोपरिभाण्डस्थं वस्तु नाधःस्थमेव च
॥ ३७ ॥ परात्परस्थेभ्य एव तिर्यग् भाण्डेभ्य उत्तमः । गृह्णीयाद् द्वित्रिभाण्डेभ्यो न परेभ्यः कदाचन ॥ ३८ ॥
पायसं शर्कराखण्डं दुग्धं काञ्जिकमेव च । तिलचूर्णं तिलपिण्डं पिण्याकं वासरे परे ॥ ३९ ॥ आत्मार्थं

गृहिभिः क्षिप्तं वर्जयेत्(तद्)घृतादिना । तत्कल्पतेऽन्यदिवसे नालिकेरघृतादिकम् ॥४०॥ नालिकेरस्य खण्डं च द्राक्षा सर्वं च पानकम् । शुण्ठी कृष्णामरिचादि तद्दिने कल्पते यतेः ॥ ४१ ॥ दधिक्षुप्तं करंबादि शिखरिण्यादि तद्दिने । न कल्पते चान्यदिने कल्पते तन्महात्मनाम् ॥ ४२ ॥ तक्रराद्धं घृतराद्धं कल्पते व्यञ्जनं सदा । निर्भञ्जनं चान्यं घृताक्षेपे सर्वत्र कल्पते ॥ ४३ ॥ तत्पक्कं चैव पक्वान्नं नीरसं तच्च कल्पते । न भुञ्जीत योगवाही द्वात्रिंशत्कवलाधिकम् ॥ ४४ ॥ अह्नः प्रथमयामान्तश्चर्यायाः प्रतिपादनम् । सङ्घट्टमुक्तमानं च प्रतिपद्येत योगभाक् ॥ ४५ ॥ द्वितीये यामे भिक्षा च कल्पते योगवाहिनाम् । निर्भञ्जनैर्घृतैस्तैलैर्देहगात्रादिगुण्ठनम् ॥ ४६ ॥ वाचनाचार्यसंस्पृष्टं वासो द्वित्रिचतुर्दिनम् । अधिकं चापि सर्वार्हं कल्पते स्वसमाधिना ॥ ४७ ॥ परीषहादिसहनं कर्त्तव्यं निशि वासरे । उद्देशाद्यपि जायेत संयतिभिः समं यदि ॥ ४८ ॥ कार्यं तदा लोचपट्टग्रहणं चान्यथा तथा । व्रतिनीनां सवस्त्राणां कल्पते कर्मयौगिकम् ॥ ४९ ॥ एवमादि च यत्प्रोक्तं हेयोपादेयमञ्जसा । सिद्धान्ते तद्विधेयं स्यात्तथैव गुरुवाक्यतः ॥ ५० ॥ आगमं च गुरोर्वाक्यं विना यद्यद्विधीयते । तन्महादोषहेतुः स्यादिहामुत्र च दुःखदम् ॥ ५१ ॥ अन्यच्च भक्तपानादिग्रहणे चोक्तमानके । कायोत्सर्गादिकरणे विधिश्चिन्त्यः क्षणे क्षणे ॥ ५२ ॥ अनेन विधिना भक्तपानादि प्रतिगृह्यते । भुञ्जते साधवो ग्रासं दोषलेशापहारिणः ॥ ५३ ॥" इति गणियोगचर्या—अथ कदाचिदुक्तचर्याया भङ्गो भवति तदा तत्प्रायश्चित्तविधिरुच्यते—"सङ्घट्टरहितं भुंक्ते तल्लिप्तमथवा परम् । आधाकर्मिकमश्नाति सन्निधिं भुंक्त एव च ॥ १ ॥

अकाल उत्सृजेद्रूथं स्थानं न प्रतिलेखयेत् । अतिक्राम्यति वा स्थानमप्रमाणं करोति वा ॥ २ ॥ कषायानपि पुष्णाति व्रतानि न करोति च । अभ्याख्यानं च पैशुन्यं परिवादं करोति वा ॥ ३ ॥ पुस्तकाशातनां चैव कुर्याद्भूपातनादिभिः । धर्मध्वजं चोलपट्टं हस्तान्मुञ्चति वा कटे ॥ ४ ॥ ऊर्ध्वो नावश्यकं कुर्यात् कुर्याद्वैरात्रिकं न वा । प्रमार्जयेन्नोपधिं वा तथा भोजनभूमिकाम् ॥ ५ ॥ उद्देशावश्यकक्षोणीं न वा मार्ष्टि प्रमादतः । इत्येतेष्वालोचनायामुपवासं समाचरेत् ॥ ६ ॥ अप्रमार्ज्य कपाटादि य उद्घाटयते यतिः । तस्य वासरपूर्वार्द्धं प्रत्याख्यानं समाचरेत् ॥ ७ ॥ कालेनावश्यकं कुर्यान्न गोचरचरीमपि । न वा नैषेधिकीं चापि तस्य निर्विकृतिः स्मृतं ॥ ८ ॥ षट्पदी पीडनादेव कुर्यादेकाशनं यतिः । भङ्गे योगविधानस्य प्रायश्चित्तमिदं स्मृतम् ॥ ९ ॥ इति योगभङ्गप्रायश्चित्तविधिः । अथ कालिकेषु योगेषु सङ्घट्टोक्तमाने भवतस्तद्विधिरुच्यते । तत्र प्रथमं चरसङ्घट्टमुच्यते श्लोकः । "व्यायामार्थं च भिक्षार्थं गन्तव्यं द्वितीयेन तु । व्रजेनाकृतयोगेन न स्पृशेत्कञ्चनापरम् ॥ १ ॥ न वा पञ्चेन्द्रियं जीवं मध्ये कुर्यान्मुनिद्वयं । वल्लीद्रुमनिकायादि नान्तः कुर्यात्स्पृशेच्च न ॥ २ ॥ वसतेरेव निर्गच्छेत् कृत्वा सङ्घट्टयोजनम् । आगत्य चैर्यापथिकीं प्रतिक्रम्य विघट्टयेत् ॥ ३ ॥" गमने–भगवन्, संघट्टं संदिसावेमि संघट्टं करेमि संघट्टसंदिसा वणत्थं करेमि काउस्सग्गं अन्नत्थऊ० यावदप्पाणं वोसिरामि । कायोत्सर्गे नमस्कारं विचिन्त्य नमस्कारं पठेत् । आगमने ईर्यापथिकीं प्रतिक्रम्य संघट्टं पडिक्कमामि संघट्टस्स पडिक्कमणत्थं करेमि काउस्सग्गं अन्नत्थ० जाव अप्पाणं वोसिरामि । नमस्कारं विचिंत्य नमस्कारं पठेत् ।

ततो युग्मं विघट्टयेत् । इति चरसङ्घट्टविधिः ॥ अथ स्थिरसङ्घट्टविधिः । तत्र स्थिरसङ्घट्टो हस्तपादधर्मध्वजपात्र-
दोरकझोलिकादिरूपः । स चोच्यते—पूर्वं मुनिरैर्यापथिकीं प्रतिक्रम्य पात्रदोरिकाझोलिकादि समीपे समा-
नीय कालोचिते काष्ठासने पादप्रोञ्छने वा उपविशेत् । पादावूर्द्ध्वजानुसमौ धारयेत् । रजोहरणं सम्मुख-
वश्रिकमग्रे कृतदशं दक्षिणकट्युत्सङ्गे स्थापयेत् । तथा पूर्वं हस्तं सङ्घट्टयेत् । तस्य विधिरयं—रजोहरणदशासं-
घातोपरि हस्तौ समीकृतावधोमुखौ न्यसेत् पुनरुन्मुखौ एवं त्रिः कुर्यात् । इति हस्तसङ्घट्टनं । पादौ रजोह-
रणेन समीकृततलौ त्रिः प्रमार्जयेत् पुनर्मीलयेत् एवं त्रिः कुर्यात् । इति पादसङ्घट्टनं । ततो हस्तौ ऊरुमध्य-
गतावेव स्थापयेत् । बहिः कृतावसङ्घट्टितौ भवतः । जान्वन्तरालबहिः कृतकराभ्यां गृहीतं वस्तु सङ्घट्टितम-
प्यसङ्घट्टितं स्यात् । पादौ अधः प्रसारितौ ततः पार्श्वनीतौ सङ्घट्टितावप्यसङ्घट्टितौ भवतः । असङ्घट्टितपाद-
द्वयगर्भगृहीतं पात्रादिसङ्घट्टितमप्यसङ्घट्टितं स्यात् तत्पूर्वं हस्तपादयोर्यत्नः कर्त्तव्यः । अकृतयोगैः स्पृष्टं वस्तु
शरीरं च सङ्घट्टितमप्यसङ्घट्टितं स्यात् । आवश्यकदशवैकालिकमण्डलीप्रवेशोत्तराध्ययनाचाराङ्गकल्पव्यवहार-
दशाश्रुतस्कन्धयोगवाहिनः कृतयोगा उच्यन्ते एतद्व्यूनयोगवाहिनोऽकृतयोगाः । ततो रजोहरणं सङ्घट्टयेत् ।
तत्सङ्घट्टनस्यायं विधिः—दक्षिणहस्ते तद्दण्डिकां गृहीत्वा वामहस्तेन तद्गर्भदशां गृह्णीयात् । दक्षिणाङ्गुल्यङ्गुष्ठ-
परिवर्त्तनेन दक्षिणावर्त्तेन भ्रमयेत् पुनर्वामावर्त्तेन एवं त्रिः कुर्यात् । पुनर्दक्षिणकरेण रजोहरणं गृहीत्वा वाम-
करचुलुकं कृत्वा रजोहरणदशाग्रं त्रिः प्रक्षिपेत् । पुनर्वामकरतलं प्रसार्य रजोहरण्या त्रिर्मार्जयेत् । एवं त्रिः

कुर्यात् । इति रजोहरणीसङ्घट्टविधिः ॥ ततो झोलिकां सङ्घट्टयेत्—झोलिकायाश्चतुरः कोणकान् संमील्य हस्तद्वयगर्भे विधाय रजोहरणोपरि दक्षिणाभिपातेन त्रिर्न्यसेत् त्रिर्वामाभिपातेन एवं त्रिः कुर्यात् । ततो ग्रन्थी दत्वा वामे बाहौ निक्षिपेत् । इति झोलिकासङ्घट्टनं ॥ काष्ठपात्रनालिकेरपात्रअलाबुपात्रमृत्पात्रकटाहकपिधानसङ्घट्टनं प्रतिलेखनारूपमेव दिनचर्याधिकाराद् ज्ञेयं । पात्रादीनां धारणविधिरुच्यते—सङ्घट्टितझोलिकान्तर्यावन्ति पात्राणि संघट्टितानि क्षिप्यन्ते तावन्ति सङ्घट्टितान्येव भवन्ति । तत्र नालिकेरालाबुपात्रे सङ्घट्य पादद्वयगर्भे स्थापयेत् । ततो दवरके ग्रन्थिं दत्वा त्रिस्त्रिः रजोहरणोपरि हस्तद्वयेन परिवर्त्तयेत् । इति दोरकसङ्घट्टनं ॥ तद्दोरकं नालिकेरालाबुपात्रे न्यसेत् । तेन दोरकेण धृतं नालिकेरालाबुपात्रं हस्तपादाभ्यां मुक्तमप्यसङ्घट्टितं न भवति तदुपरि सङ्घट्टस्थापितं कटाहकमप्यसङ्घट्टितं न भवति । पिधानमपि तथैव धृतदवरकालाबुनालिकेरपात्रोपरिस्थापितं संघट्टितं काष्ठपात्रं करपादाभ्यां मुक्तमप्यसंघट्टितं न भवति तेन दोरकेण वृत्तं हस्तपादमुक्तं पात्राद्यपि असंघट्टितं भवति संघट्टितदोरकधृतं हस्तपादमुक्तमप्यसंघट्टितं न भवति तथा संघट्टितं स्यात् इत्यपि पाठः । तदुपरि यदि तृतीयं पात्रं ध्रियते तत्सङ्घट्टितमप्यसङ्घट्टितं भवति तस्मात्तन्न धार्यं । यदि हस्तपादधृते पात्रे दोरकं कराद् मुच्यते तदा दोरकमसङ्घट्टितं न भवति । तथा सङ्घट्टितमपि काष्ठपात्रं अङ्गुष्ठमध्येकृत्याङ्गुलीर्बहिर्विधाय गृह्णीयात् । अन्यथा गृहीतमसङ्घट्टितं स्यात् । नालिकेरालाबुपात्रं सङ्घट्टितमङ्गुलिमध्येकृत्याङ्गुष्ठं बहिर्विधाय गृह्णीयात् अन्यथा गृहीतमसङ्घट्टितं स्यात् । सङ्घट्टितझोलिकान्तर्ग-

तानि सङ्घट्टितानि बहून्यपि पात्राणि सङ्घट्टितान्येव भवन्ति । तथा सङ्घट्टितपात्रे समानीतं वस्तु सपात्रं कृतयोगस्य सङ्घट्टितकरचरणस्य सरजोहरणमुखवस्त्रिकस्य करे दद्यात् यावता योगवाहिनौ कल्पादि मुञ्चतः । तत्रापि उपविष्टकरे ऊर्ध्वेन देयं ऊर्ध्वस्य करे उपविष्टेन देयं तथा कृतं सर्वमसङ्घट्टितं भवति । अर्द्धोपविष्टो मुञ्चति गृह्णाति वा पात्रादि उपरि सङ्घट्टयति निद्रायमाणः सङ्घट्टयति विकथाः कुर्वाणः सङ्घट्टयति असंयोगेन सङ्घट्टयति तत्सर्वमसङ्घट्टितं भवति भूमिपतितं वस्तु गृह्णाति गच्छतः स्थितस्य वा रजोहरणमुखवस्त्रिकयोरेकं शरीराद्विघट्टते दण्डं वा ऊर्ध्वस्थो वामाङ्गुष्ठप्रदेशिन्यन्तरालेन स्थापयति गच्छन्तौ स्थितौ वा भुंजौ वामदक्षिणतो नयति प्रकारैरेभिः सर्वमसङ्घट्टितं भवति । इति स्थिरसङ्घट्टविधिः ॥ उत्क्रमाने तु नालिकेरालाबुपात्रेषु पादगर्भे दन्तशृङ्गादि परित्यजेत् । भग्नपात्रसन्धाने तृसीकरणं सन्धाने वा लोहताम्ररीरीरूप्यस्वर्णसूत्रपट्टादिवर्जनं ताम्रवर्त्तलोहसिद्धं पानान्नं न गृह्णीयात् । दन्तशङ्खपरिधानायाः कज्जलाञ्जितनेत्रायाः करेण पानान्ने न गृह्णीयात् । केचिदत्र काचपरिधानामपि स्त्रियं परिहरन्ति । ताम्रलोहदंतरीरीतर्द(?)भिर्न भिक्षां गृह्णीयात् । शेषं सङ्घट्टवत् । इत्युक्तमानविधिः ॥ अथ कालकेषु कालग्रहणं तत्रोचितानुचितं कालमाचक्षते । तत्र कालग्रहणं नित्यं पङ्क्त्या योगोद्वहने षण्मासान् यावद्युज्यते ततः परं योगोद्वहने न युज्यते । गणियोगवर्जिता योगा आषाढपूर्णिमामारभ्य कार्त्तिकपूर्णिमापर्यन्तं समाप्यन्ते निश्चयेन ततोऽन्यत्र काले मेघविद्युदादिसंभवे न कालग्रहणं युज्यते गणियोगेऽपि आषाढकार्त्तिकपूर्णिमयोर्मध्य एव समाप्तिर्विधेया शेषेषु विशे-

षेण तत्रापि चैत्रशुक्लपञ्चम्या आरभ्य वैशाखकृष्णप्रतिपदं यावत् आश्विनशुक्लपञ्चमीमारभ्य कार्त्तिककृष्ण-प्रतिपदं यावत् द्वादश द्वादश दिनानि सर्वत्र कुलदेवतापूजार्थं कृतप्राणिवधेन महानस्वाध्यायकालः। तत्र कालग्रहणागमपाठो न युज्यते। ततः श्रावणभाद्रपदाश्विनार्द्धं एव पश्चादुपासनीयमपि कालग्रहणादि श्राद्ध-पक्षाद्यमावास्यान्तरे एव पूर्णीक्रियते। ततः पश्चादपि भवतु। अन्योऽप्यस्वाध्यायकालः कथ्यते—आर्द्रादि-स्वात्यन्तनक्षत्रदशगते रवौ विद्युद्गर्जितवृष्टिभिर्नास्वाध्यायकाल ऋतुस्वभावात्। तत्राप्युल्कापाते प्रहरम-स्वाध्यायः गर्जिते द्विप्रहरमस्वाध्यायः शेषकालेषु गर्जितविद्युदादिभिः सर्वदैवास्वाध्यायः। तथा सूर्येन्दुग्रहणे अहोरात्रमस्वाध्यायः। तथा योगोद्वहनक्षेत्राच्चतुर्दिक्षु षष्टिहस्ताद्यावत् एभिः प्रकारैरियत्कालमस्वाध्यायः स उच्यते,—पञ्चेन्द्रियजीवमरणादिभङ्गात् प्रहरत्रयमस्वाध्यायः। अथवा अस्वाध्यायकारिणी मक्षिकामात्रेऽपि जीवाङ्गे सर्वस्मिन्नपि पतिते सर्वमहोरात्रमस्वाध्यायः अन्यस्मिन् सूर्योद्गमे पूर्वाहोरात्रे व्यतीते स्वाध्याययोग्यः कालो भवति 'अहोरत्तित्ति' इत्यागमवचनात्। समीपगृहे षष्टिहस्तान्तः प्रसूतायां स्त्रियां सप्ताष्टदिना न्यस्वाध्यायः "अट्ठदिणा ते उसत्तसुक्कहिए" इत्यागमवचनात्। एवमस्वाध्यायकालं परित्यज्यान्यत्र काल ग्रहणागमपाठस्वाध्यायप्रस्थापनादि कर्त्तव्यं। तथा च पञ्चकल्यागमे अङ्गश्रुतस्कन्धानामुद्देशः शुक्लपक्ष एव विधीयते। तृतीयापञ्चमीदशम्येकादशीत्रयोदशीतिथिष्विति आचारणाग्रन्थेषु पुनश्चन्द्रबलादि यथोक्त-तिथिवारनक्षत्रेषु। इति स्वाध्यायास्वाध्यायकालपरिज्ञानं। तथा च योगवाही योगारम्भे कृतलोचः धौतोप-

धिर्भवति। सर्वसन्निधिं परित्यजेत्। वसत्युपकरणादि कल्प्यतर्पणजलेन प्रोक्षयेत्। कल्प्यतर्पणविधिर्ऋतुच-र्यायां वक्ष्यते। अत्र चतुर्मासीमध्ये व्रतोपधानयोगारम्भे वर्षमासशुद्धिर्न गवेष्यते दिनशुद्धिर्ग्राह्या। "मृदु-ध्रुवचरक्षिप्रैर्वारे भौमं शनिं विंना। आघाटनतपोनन्द्यालोचनादिषु भं शुभम् ॥ १ ॥" मृत्युयोगादि वर्ज-यित्वा मृगशिरआदिषु दशसु विद्यानक्षत्रेषु अमृतसिद्धियोगे रवियोगे च शुभशकुनेषु योगोद्वहनारंभं कुर्यात्। इह यदागमे परिच्छेदाः श्रुत १ श्रुतस्कन्ध २ अध्ययन ३ शत ४ वर्ग ५ उद्देशाः कथ्यन्ते। तत्र श्रुतं संपूर्ण आगमः यथा उत्तराध्ययनं आचाराङ्गं एवमादि। श्रुतस्कन्धस्तु श्रुतदलरूपः योगोद्वहने वाच-नायां च खण्डविश्रामरूपः। अध्ययनानि व्याख्येयसमाप्तौ श्रुतस्कन्धखण्डानि योगोद्वहनसङ्ख्याकराणि वाचनासु विश्रामरूपाणि केष्वपि सिद्धान्तेषु अध्ययनाभावतः शतानीति संज्ञा तेषामपि क्रियाध्ययनवत् तेष्वपि वर्गाः खण्डभूताः तेषां मध्येऽपि उद्देशा भवन्ति। उद्देशास्तु अध्ययनानां शतानां कथनीयान्तर-खण्डभेदा लघवो भवन्ति। ते च कचिद्योगोद्वहने पृथगुद्दिश्यन्ते। ते च आदिमान्तिमभेदभिन्ना भवन्ति। तेषामुद्देशादि समकालमेव भवति। इह च योगोद्वहने नन्दिकालग्रहणक्षमाश्रमणादिषु या उद्देशसमुद्दे-शानुज्ञाः कीर्त्यन्ते। तत्र उद्देशः तस्य सिद्धान्तस्य वाचनादिषु गुर्वाज्ञा, समुद्देशस्ततोऽपि विशेषाज्ञा, अ-नुज्ञा तत्कालं तस्य कर्मणः शीघ्रमेव करणीयादेशः। सर्वत्रापि त्रिवाचकं वस्तु निःसंशयं विशेषात् शकुन-गुर्वादेशनृपत्यादेशानां त्रिवाचकत्वेनैव दृढीभावः। तत्राङ्गश्रुतस्कन्धानामुद्देशादि दिवसप्रथमपादोनप्रहर-

मध्ये क्रियते नापराह्ने निशि वा अध्ययनोद्देशादि निशायामपि भवति। तत्र योगा द्विधा आगाढा अनागाढाश्च। येषु सर्वसमाप्तावेव परित्यागो योगान्तरप्रवेशश्च भवति ते आगाढाः। येषु च कालक्षमाश्रमणक्रियासमाप्तौ दिनसमाप्तिं विनापि योगविसर्गो योगान्तरप्रवेशो वा भवति ते अनागाढाः। तत उत्तराध्ययन १ प्रश्नव्याकरण २ आवश्यक ३ दशवैकालिक ४ भगवती ५ महानिशीथ ६ योगा आगाढाः। शेषा अनागाढाः। तत्र लघुनन्दीप्रोक्तक्रमेण पाक्षिकसूत्रोक्तक्रमेण वा दशवैकालिकाद्या महाप्रत्याख्यानान्ता उत्कालिकाः न तेषु कालग्रहणं सङ्घट्टादि भवति। उत्तराध्ययनाद्याः ते योगनिसर्गान्ताः कालिकाः तेषु कालग्रहणस्वाध्यायप्रस्थापनसङ्घट्टादि सर्वं क्रियते। शेषं नन्दीक्षमाश्रमणोद्देशादि कालिकोत्कालिकयोः सदृशमेव। तत्र कालिकोपयोग्यर्थं कालग्रहणविधिः स्वाध्यायप्रस्थानविधिश्च भण्यते। तत्र वसतौ पूर्वोक्तशुद्धायां पूर्वोत्तरयोर्दिशोरेकैकं कालमण्डलं कुर्यात्। तत्र परिणतखटिकया परिमार्जनमात्रेण वा मण्डले क्रियेते। वैरात्रिके प्राभातिके काले पश्चिमदिशि स्थापनाऽऽचार्यं स्थापयेत्। पूर्वस्यां दिशि कालग्रहणं व्याघातिके संध्याकाले दक्षिणदिशि स्थापनाचार्यम् उत्तरस्यां कालग्रहणम् अर्द्धरात्रिकेऽपि व्याघातिकवत्। तत्र मुनिद्वयं गवेष्यते। एको दण्डधरो यः कालदण्डीं धारयति। द्वितीयः कालग्राही क्रियाप्ररूपकः। ततः पूर्वमारम्भार्थं प्राभातिककालग्रहणाभिलापेन विधिरुच्यते। द्वावपि कालौ अन्यौ तथैव युक्त्या तदभिलापेन ज्ञेयौ। प्राभातिके काले पश्चिमदिशि स्थापनाऽऽचार्यं स्थापयेत् तत्र कालदण्डी च। ततः कालग्राही दण्डधरं वाम-

पार्श्वे विधाय द्वावपि कालमण्डलात् "आवस्सहीन् ३ निस्सीहीन् ३ भणन्तौ दक्षिणकरस्थरजोहरणमुखव-स्त्रिकौ भूमिं प्रतिलेखयन्तौ स्थापनाऽऽचार्यसमीपं गच्छतः। तत्र क्षमाश्रमणं दत्वा "इच्छाकारेण संदिस्सह भगवन् पाभाइय कालं पडियरेमो" इति भणतः। पुनः कालग्राही क्षमाश्रमणं दत्वा कालदण्डीं स्थापना-ऽऽचार्यपार्श्वाद् गृहीत्वा वामहस्तेन धृत्वा रजोहरणेन प्रतिलिख्य परमेष्ठिमन्त्रं भणन् दण्डधरहस्ते ददाति। ततो दक्षिणावर्तेन द्वावपि ततो दण्डधरो दिगालोकं कृत्वा "आवस्सहीन् ३ निस्सीहीन् ३ नमो खमासम-णाण"मिति भणन् स्थापनाऽऽचार्यमण्डलमागत्य ईर्यापथिकीं प्रतिक्रम्य अष्टोच्छ्वासप्रमाणं कायोत्सर्गं करोति। पारयित्वा परमेष्ठिमन्त्रं भणति । ततो मुखवस्त्रिकां प्रतिलिख्य द्वादशावर्त्तवन्दनं दत्वा क्षमाश्रमणः पूर्वं भणति "इच्छाकारेण पाभाइयकालवेला वट्टइ साहुणो उवउत्ता होह:" इति भणित्वा दण्डकं गृहीत्वा "आ-वस्सहीन् ३ निस्सीहीन् ३" भणन् कालग्राहिसमीपमागच्छति। आगत्यच पश्चिमाभिमुखस्तिष्ठति । ततः कालग्राही "आवस्सही असज्ज ३ निसीहीन् ३ नमो खमासमणाण" मिति भणन् स्थापनाऽऽचार्यमण्डले गत्वा ईर्यापथिकीं प्रतिक्रम्य कायोत्सर्गं करोति । कायोत्सर्गे नमस्कारं चिन्तयति पारयित्वा परमेष्ठिमन्त्रं भणित्वा मुखवस्त्रं प्रतिलिख्य द्वादशाऽऽवर्तवन्दनं दत्वा क्षमाश्रमणद्वयं दत्वा कथयति "इच्छा कारेण संदिस्सह पाभा णमो खमासमणाण" मिति भणन् कालमण्डलं गच्छति । तदागमने दण्डधरो हस्तस्थितं च दण्डं तत्संमुखं स्थापयति। ततः कालग्राही तदग्रे ऊर्ध्वस्थितः सन् ईर्यापथिकीं प्रतिक्रम्य कायोत्सर्गं

कृत्वा तत्र च परमेष्ठिमन्त्रं चिन्तयित्वा पारयित्वा नमस्कारं पठित्वा सदंशकं प्रतिलिख्य उपविश्य च वारत्रयं प्रतिलिख्य असखलितादिविधिना रजोहरणेन वारत्रयं कालं प्रतिलिखति । पुनरपि दक्षिणचरणोपरि संबन्धं कालमण्डले रजोहरणं स्थापयित्वा मुखपोतिकामुपरिकायं च प्रतिलिख्य वामहस्तेन कालमण्डलं संघट्टयित्वा दक्षिणहस्तगृहीतरजोहरणेन पादौ प्रमार्ष्टि । मुखवस्त्रं संगोपयित्वा दक्षिणजङ्घामूले रजोहरणं वामहस्ते उपविश्य च रजोहरणदशिकाभिर्दक्षिणहस्तं वारत्रयं मध्य उपरि च संघट्टयित्वा कालमण्डलस्थितसंपुटीकृतहस्तद्विकाङ्गुष्ठाभ्यां नासया दक्षिणकर्णे वामकर्णे च वारत्रयमुपयोगं कुर्यात् । ततः उपर्यधश्च हस्तद्वयेन एकान्तरितं वारत्रयमावर्तेन भूमिं परामृश्य दक्षिणहस्तेन गृहीत्वा रजोहरणेन कालमण्डलस्थितवामकराङ्गुष्ठाङ्गुलीनामन्तरे वारत्रयं प्रमृज्य वामजानुना कालमण्डलं संघट्टयित्वा दण्डधरो हस्तदण्डं गृहीत्वा प्रतिलिख्य कट्यां स्थापयति । एवं वारत्रयं मुखवस्त्रलेखनपूर्वं मण्डलं प्रतिलिख्य दण्डिकां नमस्कारपूर्वं दण्डधरहस्ते ददाति । ततो द्वाभ्यां हस्ताभ्यां कालमण्डलं संघट्टयित्वा हस्तयोः पादं संयोजयन् "निस्सीही ३ नमो खमासमणाण" मिति भणन् कालमण्डले प्रविशति चोलपट्टं प्रतिलिखति । अयं विधिर्गुरुमुखाद् ज्ञेयः । ततः ऊर्ध्वस्थो भूत्वा भणति "पाभाइकालियोवणियं करेमि काउस्सग्गं" कायोत्सर्गं करोति । तत्र नमस्कारे चिन्तयित्वा ऊर्ध्वस्थितदण्डधरधृतदण्डाऽग्रतः करोति । परमेष्ठिमन्त्रेण पारयित्वा बाहू समीकृत्य मुखे मुखवस्त्रिकां दत्वा मौनेन चतुर्विंशतिस्तवं प-

ठित्वा प्रथमाध्ययनद्वयं तृतीयाध्ययनैकश्लोकं मौनेन पठयित्वा तथा—“धम्मो मंगलमुक्किट्टं अहिंसा संजमो तवो । देवावि तं नमंसंति जस्स धम्मे सया मणो ॥ १ ॥ जहा दुमस्स पुप्फेसु भमरो आवियइरसं । नय पुप्फं किलामेई सोअ पीणेइ अप्पयं ॥ २ ॥ एमेए समणा मुत्ता जे लोए संति साहुणो । विहंगमा व पुप्फेसु दाणभत्ते सणे रया ॥ ३ ॥ वयं च वित्तिं लब्भामो न य कोइ उवहम्मई । आहागडेसु रीयंते पुप्फेसु भमरो जहा ॥ ४ ॥ महुकारसमा बुद्धा जे भवंति अणिस्सिया । नाणापिंडरया दंता तेण वुच्चंति साहुणो त्तिबेमि ॥ ५ ॥ दुम्मपुप्फि अज्झयणं पढमं समत्तं ॥ १ ॥ कहन्नु कुज्जा सामण्णं जो कामे न निवारए । पए पए विसीअंतो संकप्पस्स वसं गओ ॥ ६ ॥ वत्थगंधमलंकारं इत्थीओ सयणाणि अ । अच्छंदा जेन भुंजंति न से चाइति वुच्चई ॥ ७ ॥ जे अ कंते पिए भोए लद्धे वि पिट्ठि कुव्वई । साहीणे चयई भोए से हु चाइत्ति वुच्चई ॥ ८ ॥ समाइपेहाइ परिव्वयंतो सिआ मणो नीसरई बहिद्धा । न सा महं नो वि अहं पि तीसे इच्चेव ताओ विणइज्ज रागं ॥ ९ ॥ आयावयाही चयसोगमल्लं कामे कमाही कमियंखु दुक्खं । छिंदाइ दोसं विणइज्ज रागं एवं सुही होहिसि संपराए ॥ १० ॥ पक्खंदे जलियं जोइं धूमकेउं दुरासयं । निच्छंति वंतयं भोत्तुं कुले जाया अगंधणे ॥ ११ ॥ धीरत्थु ते जसोकामी जो तं जीवियकारणा । वंतं इच्छसि आवेउं सेअं ते मरणं भवे ॥ १२ ॥ अहं च भोगरायस्स तं च सि अंधगविण्हिणो । मा कुले गंधणा होमो संजमं निहुओ चर ॥ १३ ॥ जइ तं काहिसि भावं जा जा दिच्छसि नारिओ । वाया विद्धुव्वहडो अट्ठिअप्पा भविस्ससि ॥ १४ ॥ तीसे

सो वयणं सुच्चा संजया एसुभासिअं। अंकुसेण जहा नागो धम्मे संपडिवाइओ ॥ १५ ॥ एवं करंति संबुद्धा पंडिआ पविअक्खणा। विणअट्टंति भोगेसु जहा से पुरिसोत्तमो त्तिबेमि ॥ १६ ॥ इति सामन्नपुव्वियज्झयणं बीयं समत्तं। संजमे सुट्ठियप्पाणं विप्प मुक्काण ताइणं। तेसिमेयमणाइन्नं निग्गंथाण महेसिणं ॥ १७ ॥" पुनर्दक्षिणस्यां पश्चिमायामुत्तरस्यामपि दिश्येवमेव कायोत्सर्गकरणं नमस्कारचिन्तनं चतुर्विंशतिस्तवपाठपूर्वं दशवैकालिकाध्ययनद्वयतृतीयाध्ययनैकश्लोकपाठः प्रत्येकं चतसृष्वपि दिक्षु विधीयते, पुनरपि पूर्वाभिमुखो भूत्वा तथैव कायोत्सर्गं विधाय परमेष्ठिमन्त्रं स्मृत्वा मौनेन मुखेन परमेष्ठिमन्त्रं पठति । ततः आवस्सीही ३ निस्सीहीही ३ भणन् स्थापनाचार्यसमीपे गत्वैर्यापथिकीं प्रतिक्रम्य कायोत्सर्गे परमेष्ठिमन्त्रं चिन्तयित्वा मुखेन परमेष्ठिमन्त्रं भणित्वोपविश्य मुखवस्त्रिकां प्रतिलिख्य द्वादशावर्तवन्दनं दत्वा क्षमाश्रमणपूर्वं भणति "पाभाइकालं पवेएमि" इति पर्यन्तं मौनं अतो मुखरता। पुनः क्षमाश्रमणं दत्वा भणति "तवस्सिणो पाभाइओ कालो सुज्झइ" मुनयो भणन्ति "सुद्धत्ति" ततो दण्डधरोपि स्थापनाचार्यसमीपमागच्छति, द्वावपि दण्डधरकालग्राहिणौ स्थापनाचार्यपुरो भूम्यश्चितजानू उपविश्य नमस्कारं पठित्वा दशवैकालिकाद्यगाथाषट्कपाठेन स्वाध्यायं कुरुतः। ततः कालग्राही द्वादशावर्तवन्दनं दत्वा भणति "दिट्ठं सुअं व केणइ" मुनयो वदन्ति "न केणइ" इतिकालग्रहणविधिः। एवं प्राभातिककालयुक्त्या तत्तदभिलापेन व्याघातिकार्द्धरात्रिका वैरात्रिका अपि काला गृह्यन्ते। व्याघातिकं सन्ध्यायाम्, अर्द्धरात्रिकं रात्रिद्वितीयप्रहरे, वैरात्रिकं चतुर्थ-

प्रहरप्रारम्भे, प्राभातिकं घटिकाद्वयशेषायां निशायाम्, एवं चत्वारः काला निशि, व्याघातिकार्द्धरात्रिकयोर्दक्षिणस्यां स्थापनाचार्यः, वैरात्रिके पश्चिमायां दक्षिणस्यां वा, प्राभातिके पश्चिमायामेव, प्राभातिककालः क्षुद्रमार्जारशब्दादिभिर्भग्नः पुनः पुनः सप्त नव वा वेलाः पुनरारभ्यते। अन्ये व्याघातेन भग्नाः पुनर्न भवन्ति, एवं प्राभातिककाले संपादिते प्रतिलेखनावेलायां प्रतिलेखनाङ्गप्रतिलेखनोपधिप्रतिलेखना विधाय वसतिं प्रमार्ज्यास्थिचर्म्मादि संशोध्य कालग्राही ऐर्यापथिकीं प्रतिक्रम्य मुखवस्त्रिकां प्रतिलिख्य क्षमाश्रमणपूर्वं भणति "भगवन् वसहिं पवेएमि" पुनः क्षमाश्रमणपूर्वं भणति "वसहीसुज्झई" पुनः क्षमाश्रमणं दत्वा भणति "भगवन् पाभाइअ कालं पवेएमि" पुनः क्षमाश्रमणपूर्वं भणति "भगवन् पाभाइअकालो सुज्झई" ततो गुरुः योगवाही वान्येपि मुनयः स्थापनाचार्यपुरः स्वाध्यायं प्रस्थापयन्ति, नित्यकर्मेदं साधूनां, कालग्राहिणां। विशेषेण स्वाध्यायप्रस्थापनाविधिरुच्यते। कालग्राही अन्यो वा स्थापनाचार्यपुरो मुखवस्त्रिकां प्रतिलिख्य द्वादशावर्तवन्दनं दत्वा क्षमाश्रमणपूर्वं भणति "भगवन् सज्झाय पठवेमि" पुनः क्षमाश्रमणं दत्वा भणति "सज्झायस्स पट्ठावणत्थं करेमि काउस्सग्गं अन्नत्थ यावत् अप्पाणं वोसिरामि" नमस्कारं विचिन्त्य शनैर्बाहू समाहृत्य मौनेनैवार्हन्नमस्कारेण पारयित्वा सप्तविंशत्युच्छ्वासं चतुर्विंशतिस्तवं पठित्वा मौनेनैव दशवैकालिकाध्ययनद्वयं तृतीयाध्ययनैकश्लोकपर्यन्तं मौनेनैव पठति पुनरपि तथैव कायोत्सर्गं विधाय नमस्कारं विचिन्त्य पारयित्वा मौनेन नमस्कारं पठित्वा मौनेनैव द्वादशावर्तवन्दनं ददाति, ततः क्षमाश्रमणं

दत्वा मौनेम भणति "सज्झायं पवेएमि" स्वाध्यायप्रस्थापने एतत्पर्यन्तं मौनं अतो मुखरता। ततः क्षमाश्रमणपूर्वं भणति "भगवन् सज्झाय सुज्झई" गुरुः कथयति "सुज्झइ" ततः क्षमाश्रमणद्वयपूर्वं भणति "भगवन् सज्झायं संदिसावेमि सज्झायं करेमि" ततो नतजानुरुपविश्य नमस्कारभणनपूर्वं दशवैकालिकाद्यपञ्चश्लोकीं पठति, द्वादशावर्तवन्दनं ददाति, ततः कालमण्डले गत्वा मुखवस्त्रिकां प्रतिलिख्य त्रिवेलं तथैव कालग्रहणवत् कुर्यात्। मण्डूकप्लुतन्यायेन तथैव कालमण्डलप्रवेशः। इति स्वाध्यायप्रस्थापनविधिः। कालग्रहणं प्रति द्वेद्वे स्वाध्यायप्रस्थापने प्राभातिके काले प्रतिलेखनान्तरितं स्वाध्यायप्रस्थापनं, अन्येषु कालेषु त्रिष्वपि कालग्रहणानन्तरं तत्कालमेव स्वाध्यायप्रस्थापनं, तत उद्देशक्षमाश्रमणं नन्दीकरणादियथाकालोचितो विधिर्विधेयः, ततः पुनरपि स्वाध्यायप्रस्थापनं, एवं कालं कालं प्रति स्वाध्यायप्रस्थापनद्वयं, द्वयोरपि स्वाध्यायप्रस्थापनयोरन्ते कायोत्सर्गद्वयं एकत्र "सज्झायपडिक्कमणत्थं करेमि काउस्सग्गं अन्नत्थ उस० जाव अप्पाणं वोसिरामि" कायोत्सर्गे नमस्कारचिन्तनं पारयित्वा नमस्कारभणनं । द्वितीये "कालपडिक्कमणत्थं करेमि काउस्सग्गं" तथैव द्वितीयस्वाध्यायप्रस्थापनान्तेप्येवमेव । इति कालग्रहणस्वाध्यायप्रस्थापनविधिः। तथाच योगवाहिनः प्राभातिकप्रतिक्रमणान्ते "जोगक्खे वा वणियं करेमि काउस्सग्गं अन्नत्थ० याव अप्पाणं०" चतुर्विंशतिस्तवचिन्तनं चतुर्विंशतिस्तवभणनं इति नित्यं योगवाहिनः कुर्वन्ति, ततः प्रभाते योगोद्वहनारम्भे समाप्तौ च श्रुतस्कन्धेषु आरम्भसमाप्तौ नन्दिकरणं भवति । तद्विधिरुच्यते, चैत्ये

॥ ९० ॥

...वा समवसरणस्थापनं, प्रदक्षिणाकरणं पूर्ववत्, ततः शिष्यो गुरुं प्रति क्षमाश्रमणपूर्वं भणति "इच्छाकारेण तुम्हे अम्हं अमुगसुअस्कंधस्स उद्देसानिमित्तं नंदिकड्डावणियं वासक्खेवं करेह चेइआइ च वंदावेह" ततो गुरुः पूर्वयुक्त्याभिमन्त्रितवासान् शिष्यशिरसि क्षिपति, ततः पूर्वयुक्त्या द्वावपि वर्धमानस्तुतिभिश्चैत्यवन्दनं कुरुतः, शान्तिश्रुतक्षेत्रभुवनशासनवैयावृत्यकरकायोत्सर्गस्तुतिस्तथैव, ततः शक्रस्तवपाठः अर्हणादिस्तोत्रकथनं "जय वीयरा" गाथा पूर्ववत्, ततो मुखवस्त्रिकां प्रतिलिख्य योगवाही द्वादशावर्तवन्दनं ददाति, ततः उद्देसाइनिमित्तं नंदिकड्डावणियं करेमि काउस्सग्गं अन्नत्थ उस० अप्पा०" कायोत्सर्गे चतुर्विंशतिस्तवचिन्तनं पारयित्वा मुखेन चतुर्विंशतिस्तवभणनं, ततः ऊर्ध्वस्थ एव गुरुः शिष्यं वामपार्श्वे संस्थाप्य नमस्कारत्रयं पठित्वा लघुनन्दिं पठति "नाणं पंचविहं पन्नत्तं" इत्यादि यावत् । इमं पुण पठवणं पडुच्च अमुगस्स साधुस्स अमुगाणं वा साहूणं अमुगाए वा साहूणीए अमुगाणं वा साहुणीणं" प्रथमवेलवाचनान्ते उद्देशनन्दी द्वितीयवेलवाचनान्ते समुद्देशनन्दी तृतीयवेलवाचनान्ते "अणुन्नाणंदी पवट्टइ" इति सवासक्षेपं गुरुः भणति । उद्देशनन्दी समुद्देशनन्दी अणुन्नानन्दी वा पवट्टइ एवं त्रिर्नन्दीवाचनं वासक्षेपश्च त्रिवेलं, ततो गुरुः संनिहितानां साधुश्रावकादीनां गन्धाक्षताद्यभिमन्त्र्य जिनपादौ संस्पृश्य ददाति, सर्वे तच्छिरसि "नित्थारगपारगो होइ" इति भणन्तः क्षिपन्ति, इति सर्वेषु योगोद्वहनेषु श्रुतस्कन्धारम्भसमापनेषु नन्दीविधिरयमेव। इति योगोद्वहने नन्दीविधिः ॥ ॥ अथोद्देशादिविधिरुच्यते॥ पूर्वं मुखवस्त्रिकां प्रति-

लिख्य द्वादशावर्त्तवन्दनं दत्वा योगवाही क्षमाश्रमणपूर्वं भणति "इच्छाकारेण तुब्भे अम्हं अमुगं सयं अमुगसुअस्कंधस्स वा अमुगं वग्गं अमुगसयस्स अमुगं उद्देसं आइल्लं अंतिल्लं वा उद्दिसह" गुरुः कथयति "उद्दिसामि" पुनः शिष्यः क्षमाश्रमणपूर्वं भणति "संदिसह किं भणामि" गुरुर्भणति "वंदित्तु[2] पवेयय" पुनः क्षमाश्रमणं दत्वा शिष्यो भणति "भगवन् तुब्भेहिं अम्हं अमुगसुअस्कंधं अमुगअज्झयणं अमुगउद्देसं उद्देसियं[3]" गुरुर्भणति "उद्दिसियं खमासमणाणं हत्थेणं सुत्तेणं तदुभयेणं गुरुगुणेहिं बुड्ढाहि नित्थारगपारगो होइ" पुनः शिष्यो भणति "इच्छामो णसिट्ठं" ततः क्षमाश्रमणं दत्वा भणति "तुम्हाणं पवेइयं" पुनः क्षमाश्रमणपूर्वं भणति "संदिसह साहूणं पवेएमि" गुरुर्भणति "पवेअय, उद्देसे योगं करिज्जाहि, समुद्देशे थिरपरिचिअं करिज्जाहि, अनुज्ञायां सम्मं अवधारिज्ज अन्नेहिंपि पवेइज्जा" ततः शिष्यो भणति "अमुगस्स सुअस्कंधस्स अमुगस्स अज्झयणस्स अमुगस्स उद्देसस्स उद्दिसावणिअं करेमि काउस्सग्गं अन्नत्थउस० जाव अप्पाणं०" कायोत्सर्गश्चतुर्विंशतिस्तवचिन्तनं चतुर्विंशतिस्तवभणनं पुनः मुखवस्त्रिकां प्रतिलिख्य द्वादशावर्तवन्दनं दत्वा क्षमाश्रमणदानपूर्वं भणति "इच्छाकारेण तुब्भे अम्हं अमुगं सुअ० जाव उद्देसं समुद्दिसह" शेषं क्षमाश्रमणगुरुवचनाशिष्यवचनादिकायोत्सर्गादि समुद्देशालापेन पूर्ववत् । पुनः मुखवस्त्रिकां प्रतिलिख्य वन्दनं दत्वा क्षमाश्रमणपूर्वं भणति "इच्छाकारेण तुब्भे अम्हं जाव अमुग उद्देसं अणुन्नवेह"

१ अमुगअज्झयणस्स वा अमुगउद्देसं अमुगसुअस्कंधस्स वा अमुगं सयं इत्यपि । २ वंदित्ता इत्यपि । ३ उद्दिसियं इत्यपि ।

गुरुः कथयति "अणुन्नवेमि" शेषं सर्वं क्षमाश्रमणगुरुवचनशिष्यवचनकायोत्सर्गादि पूर्ववत् अनुज्ञालापेन, तथा च उद्देशे क्षमाश्रमणान्ते गुरुवाक्यं "योगं करिज्जाहि" समुद्देशे क्षमाश्रमणान्ते गुरुवाक्यं "थिरपरिचिअं करिज्जाहि" अनुज्ञाक्षमाश्रमणान्ते गुरुवाक्यं सम्मं अवधारिज्जा अन्नेहिंपि पवेइज्ज इति सर्वत्र "संदिसह साहूणं पवेएमि" इति शिष्यवचनान्ते उद्देशसमुद्देशसानुज्ञासु यथाक्रमं गुरुवाक्यानि श्रुतस्कन्धस्याङ्गस्योद्देशानुज्ञयोः पूर्वं नन्दी ततः शिष्यः क्षमाश्रमणं दत्वा भणति कालिकेषु भगवन् "संघट्टमुहपत्ती पडिलेहेमि" इति मुखवस्त्रिकां प्रतिलिख्य द्वादशावर्तवन्दनं दत्वा क्षमाश्रमणं दत्वा भणति "संघट्टं संदिसावेमि संघटस्स संदिसावणिअं करेमि काउस्सग्गं अन्नत्थउ० यावअ०" चतुर्विंशतिस्तवचिन्तनं चतुर्विंशतिस्तवभणनं तथा च यदि कालिकमध्ये उक्तमानमभ्येति तत्राप्येवमेव मुखवस्त्रिकावन्दनककायोत्सर्गादि द्वितीयं कार्यं, उक्तमानाभावे कालिकेषु संघट्टसंदेशः सदैव कार्यः। उत्कालिकेषु संघट्टोक्तमानोद्देशोपि नास्ति क्रियापि नास्ति "ततः अमुगसुअस्कंधस्स उद्देसस्स अज्झयणस्स वा उद्दिसावणिअं समुद्दिसावणिअं अनुन्नावणिअं वा निरुद्धं करावेह पारणं वा करेवेह" ततो गुरुर्निरुद्धे, आचाम्लप्रत्याख्यानं कारयति पारणे निर्विकृतिकप्रत्याख्यानं निर्विकृतिके शिष्यः पूर्वं द्वादशावर्तवन्दनं दत्वा प्रत्याख्यानं करोति आचाम्ले वन्दनं विनैव अयमुद्देशादिविधिः। ततः पुनः स्वाध्यायप्रस्थापनं, कालिकेषु उत्कालिकेषु कालग्रहणस्वाध्यायप्रस्थापनसंघट्टोक्तमानविधिर्नास्त्येव। तथा कालिकेषु उद्देशादिविधिर्यस्य कालस्यानुयायी यावतां श्रुतस्कन्धानाम-

ध्ययनानामुद्देशानां भवति तावानेव उद्देशसमुद्देशानुज्ञाभिस्तावतां श्रुतस्कन्धाध्ययनोद्देशानां त्रिवेलं मुखवस्त्रिकावन्दनकक्षमाश्रमणकायोत्सर्गास्तत्तदभिलापेन कर्तव्याः । उत्कालिकेषु दिनानुयायी स एव विधिः, व्याघातिकार्द्धरात्रिक[1]कालानुयायी संघट्टोक्तमानप्रत्याख्यानविधिर्न भवति, अयं तु विधिः प्राभातिककालमेवानुसरति, तथा श्रुतस्कन्धारम्भे कैश्चिदुपवास इष्यते, कैश्चनाचाम्लं, तत्र गुरोर्वचः प्रमाणं । इति सर्वोपि योगसंसाधनविधिः ॥ ॥ अथ योगा उच्यन्ते । आवश्यक १ दशवैकालिक २ मण्डलिक[2] ३ उत्तराध्ययन ४ आचाराङ्ग ५ सूत्रकृत ६ स्थानाङ्ग ७ समवायाङ्ग ८ निशीथ ९ जीतकल्प १० कल्प ११ व्यवहार १२ दशाश्रुतस्कन्ध १३ ज्ञाताधर्मकथा १४ उपासकदशा १५ अन्तकृद्दशा १६ अनुत्तरोपपातिकदशा १७ प्रश्नव्याकरण १८ विपाकश्रुत १९ उपाङ्ग २० प्रकीर्णक २१ महानिशीथ २२ भगवतीयोगाः २३ तत्र आवश्यके एक एव श्रुतस्कन्धः प्रथमदिने उद्दिश्यते, प्रथमाध्ययनं सामायिकाभिधानं चोद्देशसमुद्देशानुज्ञाभिः तत्र नन्दी आचाम्लं च मुखवस्त्रिका ४ वन्दन ४ क्षमाश्रमणावर्त ४ कायोत्सर्ग ३ । १ । द्वितीयदिने निर्विकृतिकं द्वितीयाध्ययनस्य चतुर्विंशतिस्तवाभिधानस्योद्देशसमुद्देशानुज्ञाः मुखवस्त्रिका ३ वन्दनक ३ क्षमाश्रमणावर्त ३ कायोत्सर्ग ३ । २ । तृतीयदिने आचाम्लं तृतीयाध्ययनस्य वन्दनाख्यस्योद्देशसमुद्देशानुज्ञाः मुवंक्षका[3] ३ । ३ ।

१ व्याघातिकार्द्धरात्रिकवैरात्रिककालानुयायी इत्यपि । २ मण्डलिकप्रवेशक इत्यपि । ३ मु० मुखवस्त्रिक, वं–वंदनक, क्ष–क्षमाश्रमणावर्त–का–कायोत्सर्ग इत्येवं सर्वत्र बोध्यम् ।

चतुर्थदिने निर्विकृतिकं चतुर्थाध्ययनस्य प्रतिक्रमणाख्यस्योद्देशसमुद्देशानुज्ञाः मुवंक्षका ३ । ४ । पञ्चमेदिने आचाम्लं पञ्चमाध्ययनस्य कायोत्सर्गाभिधानस्योद्देशसमुद्देशानुज्ञाः मुवंक्षका ३ । ५ । षष्ठदिने निर्विकृतिकं षष्ठाध्ययनस्य प्रत्याख्यानाभिधानस्य उद्देशसमुद्देशानुज्ञाः मुवंक्षका ३ । ६ । सप्तमदिने आचाम्लं आवश्यकश्रुतस्कन्धस्य अनुज्ञा नन्दी च मुवंक्षका ३ । ७ । अष्टमदिने आचाम्लं आवश्यकश्रुतस्कन्धानुज्ञा नन्दी च मुवंक्षका ३ । ८ ॥ इति अष्ट दिनान्यावश्यकस्य उत्कालिकाः आगाढयोगाः ॥ ॥ अथायमावश्यकयन्त्रकन्यासः[1] । दशवैकालिके एक एव श्रुतस्कन्धः, प्रथमदिने आचाम्लं नन्दीश्रुतस्कन्धस्योद्देशः प्रथमाध्ययनस्य द्रुमपुष्पिकाख्यस्योद्देशसमुद्देशानुज्ञाः मुखवस्त्रिका ४ वन्दनक ४ क्षमाश्रमणावर्त ४ कायोत्सर्ग ४ । १ । द्वितीयदिने निर्विकृतिकं द्वितीयाध्ययनस्य श्रामण्यपूर्वकाख्यस्योद्देशसमुद्देशानुज्ञाः मुवंक्षका ३ । २ । तृतीयदिने आचाम्लं तृतीयाध्ययनस्य क्षुल्लकाचारकथाख्यस्योद्देशसमुद्देशानुज्ञाः मुवंक्षका ३ । ३ । चतुर्थदिने निर्विकृतिकं चतुर्थाध्ययनस्य षड्जीवनिकायाख्यस्योद्देशसमुद्देशानुज्ञाः मुवंक्षका ३ । ४ । पञ्चमदिने आचाम्लं पञ्चमाध्ययनस्य पिण्डैषणाख्यस्योद्दे० ३ पञ्चमाध्ययने प्रथमोद्देशस्योद्देशसमुद्देशानुज्ञाः, पञ्चमाध्ययने द्वितीयोद्देशस्योद्देशसमुद्देशानुज्ञाः मुवंक्षका ९ । ५ । षष्ठदिने निर्विकृतिकं षष्ठाध्ययनस्य धर्मार्थकामाख्यस्योद्दे० ३ मुवंक्षका ३ । ६ । सप्तमदिने आचाम्लं सप्तमाध्ययनस्य वाक्यशुद्धिनामकस्योद्दे० ३ मुवंक्षका ३ । ७ । अष्टम-

[1] प्रथमं यंत्रं गृहव्यम् ।

दिने निर्विकृतिकं अष्टमाध्ययनस्याचारप्रणिध्याख्यस्योद्दे० ३ मुवंक्षका ३ । ८ । नवमदिने आचाम्लं नवमाध्ययनस्य विनयसमाध्ययने प्रथमोद्देशस्योद्देशसमुद्देशानुज्ञाः नवमाध्ययने द्वितीयोद्देशस्योद्दे० ३ मुवंक्षका ३ । ९ । दशमदिने नवमाध्ययने तृतीयोद्देशस्योद्दे० नवमाध्ययने चतुर्थोद्देशस्योद्दे० ३ मुवंक्षका ३ । १० । एकादशदिने आ० दशमाध्ययनस्य सभिक्षुनामकस्योद्दे० ३ मुवंक्षका ३ । ११ । द्वादशदिने निर्विकृतिकं प्रथमचूलिकाया रतिकल्पनाम्न्या उद्देशस० ३ मुवंक्षका ३ । १२ । त्रयोदशदिने आ० द्वितीयचूलिकाया विचित्रचर्यानाम्न्या उद्दे० ३ मुवंक्षका ३ । १३ । चतुर्दशदिने आ० श्रुतस्कन्धसमुद्देशः मुवंक्षका १ । १४ । पञ्चदशदिने आ० नन्दीश्रुतानुज्ञाः मुवंक्षका १ । १५ ॥ इति दशवैकालिकयोगे पञ्चदश दिनानि उत्कालिका आगाढयोगाः ॥ ॥ अथायं दशवैकालिकयंत्रकन्यासः॥ अथ मण्डलीप्रवेशस्य श्रुतस्कन्धाध्ययनोद्देशसमुद्देशानुज्ञाः । तद्वाचनाव्यवच्छेदात् स्कन्दिलाचार्ये व्यवच्छिन्ना उद्धारमात्रं तु वर्तते किं तु मुनीनां सप्तमण्डलीप्रवेशार्थं सप्ताचाम्लानि विधीयन्ते, तत्र तृतीयाचाम्ले या किलोत्थापनाख्या नन्दी साश्रुतोद्देशसमुद्देशानुज्ञा नन्दी न भवति, किं तु मुनीनां महाव्रतारोपनन्दीतत्करणात् संपूर्णमण्डलीप्रवेशश्च यथा "सुत्ते अत्थे" इत्यादि पूर्ववत् ॥ इति मण्डलीप्रवेशः ३ ॥ ॥ अथ उत्तराध्ययने श्रुतस्कन्ध एक एव, प्रथमदिने आचाम्लं नन्दी कालग्रहणम् १ उत्तराध्ययनश्रुतस्कन्धस्योद्देशः प्रथमाध्ययनस्योद्देशसमुद्देशानुज्ञाः मुख० ४ वन्द० ४ क्षमा० ४

१ द्वितीयं यन्त्रं द्रष्टव्यम् ।

कायो० ४ । १ । द्वितीयदिने निर्विकृतिकं कालग्रहणं १ द्वितीयाध्ययनस्योद्दे० ३ मुवंक्षका ३ । २ । तृतीयदिने आ० कालग्रहणम् १ तृतीयाध्ययनस्योद्दे० ३ मुवंक्षका० ३ । ३ । चतुर्थदिने आ० कालग्रहणम् १ चतुर्थाध्ययनस्योद्देशसमुद्देशौ । यदि योगवाही तस्मिन्नेव दिने असङ्ख्याध्ययनं त्रयोदशवृत्तमात्रं सम्यक् पठति, तदा तस्मिन्नेव दिने तस्यानुज्ञा, नोचेत्कण्ठपाठे करोति, तदा द्वितीयदिने सम्यगधीत्य आचाम्लेनैवानुज्ञा मुखवस्त्रिकाद्वयं त्रयं वा वन्दनकद्वयं त्रयं वा क्षमाश्रमणद्वयं त्रयं वा कायोत्सर्गद्वयं त्रयं वा ।४। पञ्चमदिने यदि चतुर्थदिने असंख्याध्ययनं सम्यगधीतं तदा नि० अनधीते आ० काल १ चतुर्थाध्ययनानुज्ञा मुवंक्षका० १ । ५ । षष्ठदिने नि० काल १ पञ्चमाध्ययनस्योद्दे० ३ मुवंक्षका० ३ । ६ । सप्तमदिने आ० काल १ षष्ठाध्ययनस्योद्दे० मुवंक्षका० ३ । ७ । अष्टमदिने नि० काल १ सप्तमाध्ययनस्योद्दे० ३ मुवंक्षका० ८ । नवमदिने आ० काल १ अष्टमाध्ययनस्योद्दे० मुवंक्षका० ३ । ९ । दशमदिने नि० काल १ नवमाध्ययनस्योद्दे० मुवंक्षका० ३ । १० । एकादशदिने आ० काल० १ दशमाध्ययनस्योद्दे० ३ मुवंक्षका० ३ । ११ । द्वादशदिने नि० का० १ एकादशाध्ययनस्योद्दे० ३ मुवंक्षका० ३ । १२ । त्रयोदशदिने आ० काल १ द्वादशाध्यनस्योद्दे० ३ मुवंक्षका० ३ । १३ । चतुर्दशदिने नि० काल० १ त्रयोदशाध्ययनस्योद्दे० ३ मुवंक्षका० ३ । १४ । पञ्चदशदिने आ० काल० १ चतुर्दशाध्ययनस्योद्दे० ३ मुवंक्षका ३ । १५ । षोडशदिने नि० काल० १ पञ्चदशषोडशाध्ययनयोरुद्देशसमुद्देशानुज्ञाः मुवंक्षका० ६ । १६ । सप्तदशदिने आ० काल० १ सप्तदशाष्टादशाध्ययन-

योरुद्देशसमुद्देशानुज्ञाः मुवंक्षका० ६ । १७ । अष्टादशदिने नि० काल०, १ एकोनविंशतितमविंशतितमाध्ययनयोरुद्दे० ३ मुवंक्षका० ६ । १८ । एकोनविंशतितमदिने आ० काल० १ एकविंशतितमद्वाविंशतितमयोरध्ययनयोरुद्दे० ३ मुवंक्षका० ६ । १९ । विंशतितमदिने नि० काल० १ त्रयोविंशतितमचतुर्विंशतितमयोरध्ययनयोरुद्दे० ३ मुवंक्षका० ६ । २० । एकविंशतितमदिने आ० काल १ पञ्चविंशतितमषड्विंशतितमयोरध्ययनयोरु० ३ मुवंक्षका० ६ । २१ । द्वाविंशतितमदिने नि० काल० १ सप्तविंशतितमाष्टाविंशतितमयोरध्ययनयोरुद्दे० ३ मुवंक्षका० ६ । २२ । त्रयोविंशतितमदिने आ० काल १ एकोनत्रिंशत्तमत्रिंशत्तमयोरध्ययनयोरु० मुवंक्षकाः ६ । २३ । चतुर्विंशतितमदिने नि० काल० १ एकत्रिंशत्तमद्वात्रिंशत्तमयोरध्ययनयोरु० ३ मुवंक्षका० ६ । २४ । पञ्चविंशतितमदिने आ० का० १ त्रयस्त्रिंशत्तमचतुस्त्रिंशत्तमयोरध्ययनयोरु० ३ मुवंक्षका० ६ । २५ । षड्विंशतितमदिने नि० का० १ पञ्चत्रिंशत्तमषट्त्रिंशत्तमयोरध्ययनयोरु० ३ मुवंक्षका० ६ । २६ । सप्तविंशतितमदिने आ० का० १ श्रुतस्कन्धसमुद्देश० मुवंक्षका १ । २७ । अष्टाविंशदिने आ० नन्दी काल० १ श्रुतस्कन्धानुज्ञाः मु० १ वं० १ क्ष० १ का० १ । २८ । इत्यष्टाविंशतिदिनैरुत्तराध्ययनयोगोद्वहनं पूर्यते कालिका आगाढयोगाः ॥ अयमुत्तराध्ययनेयन्त्रकन्यासः[1] ॥ ॥ आचाराङ्गे श्रुतस्कन्धद्वयं, तत्र प्रथमश्रुतस्कन्धे ब्रह्मचर्याख्ये प्रथमदिने आ० नन्दी कालग्रहणम् १ अत्र आचाराङ्गस्योद्देशः । प्रथमश्रुतस्कन्धस्योद्देशः, तत्र

१ तृतीयं पत्रं द्रष्टव्यम् ।

प्रथमस्य परिज्ञाभिधानाख्यस्य उद्देशः, ततः प्रथमाध्ययनस्य प्रथमोद्देश उद्दिश्यते, ततो द्वितीयोद्देश उद्दिश्यते, ततः प्रथमाध्यनं समुद्दिश्यते, ततः प्रथमोद्देशः समुद्दिश्यते, ततो द्वितीयोद्देशः समुद्दिश्यते, ततो दिनपश्चिमप्रहरे प्रथमोद्देशोनुज्ञाप्यते, द्वितीयोद्देशोनुज्ञाप्यते, मुख० १० वन्द० १० क्षमा० १० कायो० १०। १। द्वितीयदिने नि० काल० १ तत्र प्रथमाध्ययनस्य तृतीयचतुर्थयोरुद्देशसमुद्देशानुज्ञाः मुवंक्षका० ६। २। तृतीयदिने आ० काल० १ प्रथमाध्ययनस्य पञ्चमषष्ठयोरुद्देशयोरु० मुवंक्षका० ६। ३। चतुर्थदिने नि० काल १ प्रथमाध्ययनस्य सप्तमोद्देशस्योद्दे० ३ प्रथमाध्ययनस्यानुज्ञाः मुवंक्षका० ४। ४। एवं चतुर्भिर्दिनैः प्रथमं परिज्ञाभिधानमध्ययनं समाप्यते। पञ्चमदिने आ० काल० १ द्वितीयस्य लोकविजयाध्ययनस्योद्दे० ३ द्वितीयाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ९। ५। षष्ठदिने नि० काल० १ द्वितीयाध्ययनस्य तृतीयचतुर्थयोरुद्देशयोरु० ३ मुवंक्षका० ६। ६। सप्तमदिने आ० काल० १ तृतीयाध्ययनस्य पञ्चमषष्ठयोरुद्देशयोरु० ३ मुवंक्षका० ६। ७। इति द्वितीयाध्ययनं दिनत्रयेण समाप्यते। अष्टमदिने नि० काल० १ तृतीयस्य सितोषणीयाध्ययनस्यो० ३ तृतीयाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० मुवंक्षका० ९। ८। नवमदिने आ० काल० १ तृतीयाध्ययनस्य तृतीयचतुर्थयोरुद्देशयोरु० ३ मुवंक्षका० ६। ९। इति तृतीयमध्ययनं दिनद्वयेन समाप्यते। दशमदिने नि० काल० १ चतुर्थस्य सम्यक्त्वाभिधानस्याध्ययनस्यो० ३ चतुर्थाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ९। १०। एकादशदिने आ० काल० १ चतुर्थाध्ययनस्य तृतीयचतुर्थयो-

रुद्देशयोरु० ३ मुवंक्षका० ६ । ११ ॥ इति चतुर्थमध्ययनं दिनद्वयेन समाप्यते । द्वादशदिने नि० काल० १ पञ्चमस्य आवन्तिकाध्ययनस्यो० ३ पञ्चमाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ९ । १२ । त्रयोदशदिने आ० काल० १ पञ्चमाध्ययनस्य तृतीयचतुर्थयोरुद्देशयोरु० ३ मुवंक्षका० ६ । १३ । चतुर्दशदिने नि० काल० १ पञ्चमाध्ययनस्य पञ्चमषष्ठयोरुद्देशयोरु० ३ मुवंक्षका० ६ । १४ । इति पञ्चमाध्ययनं त्रिभिर्दिनैः समाप्यते । पञ्चदशदिने आ० काल० १ षष्ठस्य धुवाध्ययनस्योद्देशसमुद्देशौ षष्ठाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ८ । १५ । षोडशदिने नि० काल० १ षष्ठाध्ययनस्य तृतीयचतुर्थयोरुद्देशयोरु० ३ मुवंक्षका० ६ । १६ । सप्तदशदिने आ० काल० १ षष्ठाध्ययनस्य पञ्चमोद्देशस्यो० ३ षष्ठाध्ययनानुज्ञा च मुवंक्षका० ४ । १७ । एवं त्रिभिर्दिनैः षष्ठमध्ययनं समाप्यते । अष्टादशदिने नि० काल० १ आचाराङ्गप्रथमश्रुतस्कन्धसप्तमाध्ययनस्य विमोहाख्यस्यो० ३ सप्तमाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ९ । १८ । एकोनविंशतितमदिने आ० काल० १ सप्तमाध्ययनस्य ३ तृतीयचतुर्थयोरुद्देशयोरु० ३ । मुवंक्षका० ६ । १९ । विंशतितमदिने नि० काल० १ सप्तमाध्ययनस्य पञ्चमषष्ठयोरुद्देशयोरु० ३ मुवंक्षका० ६ । २० । एकविंशतितमदिने आ० काल० १ सप्तमाध्ययनस्य सप्तमाष्टमयोरुद्देशयोरु० ३ मुवंक्षका० ६ । २१ । इति सप्तममध्ययनं चतुर्भिर्दिनैः समाप्यते । द्वाविंशतितमदिने नि० काल० १ अष्टमाध्ययनस्योपाध्यानश्रुताख्यस्य उद्देशसमुद्देशानुज्ञाः अष्टमाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ९ । २२ । त्रयोविंश-

तितमदिने आ० काल० १ अष्टमाध्ययनस्य तृतीयचतुर्थयोरुद्देशयोरु० ३ मुवंक्षका० ६ । २३ । इति अष्टमाध्ययनं दिनद्वयेन समाप्यते । चतुर्विंशतितमदिने आ० काल० १ तत्र नवमं महापरिज्ञाध्ययनं व्यवच्छिन्नम्, तस्योद्दे० ३ आचाराङ्गप्रथमश्रुतस्कन्धस्यापि समुद्देशानुज्ञे नन्दी मु० ९ वं० ९ क्ष० ९ का० ९ । २४ । इत्याचाराङ्गप्रथमश्रुतस्कन्धः चतुर्विंशतिदिनैः पूर्यते ॥ प्रथमश्रुतस्कन्धयन्त्रकन्यासः[1] ॥ ॥ अथ आचाराङ्गस्य द्वितीयश्रुतस्कन्ध आरभ्यते ॥ प्रथमदिने आ० नन्दी १ काल० १ आचाराङ्गद्वितीयश्रुतस्कन्धस्योद्देशः, तस्यैव प्रथमाध्ययनस्य पिण्डैषणाख्यस्योद्देशसमुद्देशः प्रथमाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका ९ । १ । द्वितीयदिने नि० काल० १ प्रथमाध्ययनस्य तृतीयचतुर्थयोरुद्देशयोरु० मुवंक्षका० ६ । २ । तृतीयदिने आ० का० १ प्रथमाध्ययनस्य पञ्चमषष्ठयोरुद्देशयोरु० मुवंक्षका० ६ । ३ । चतुर्थदिने नि० काल० १ प्रथमाध्ययनस्य सप्तमाष्टमयोरुद्देशयोरु० ३ मुवंक्षका० ६ । ४ । पञ्चमदिने आ० काल० १ प्रथमाध्ययनस्य नवमदशमयोरुद्देशयोरु० ३ मुवंक्षका० ६ । ५ । षष्ठदिने नि० काल० १ प्रथमाध्ययनस्य एकादशोद्देशस्योद्दे० ३ प्रथमाध्ययनस्यानुज्ञा च मुवंक्षका० ६ । ६ । इति द्वितीयश्रुतस्कन्धस्य प्रथमाध्ययनं षड्भिर्दिनैः समाप्यते । सप्तमदिने आ० काल० १ द्वितीयस्य शय्याख्यस्याध्ययनस्योद्देशसमुद्देशौ द्वितीयाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ८ । ७ । अष्टमदिने नि० काल० १ द्वितीयाध्ययनस्य तृतीयोद्देशस्योद्दे० ३ द्वितीयाध्ययनस्या-

१ चतुर्थं यन्त्रं द्रष्टव्यम् ।

नुज्ञा च सुवंक्षका० ४ । ८ । इति द्वितीयमध्ययनं दिनद्वयेन समाप्यते । नवमदिने आ० काल० १ तृतीयस्य ईर्याध्ययनस्योद्देशसमुद्देशौ तृतीयाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ सुवंक्षका० ८ । ९ । दशमदिने नि० काल० १ तृतीयाध्ययनस्य तृतीयोद्देशस्योद्दे० ३ तृतीयाध्ययनानुज्ञा च सुवंक्षका० ४ । १० । इति तृतीयाध्ययनं दिनद्वयेन समाप्यते । एकादशदिने आ० काल० १ चतुर्थस्य भाषाध्ययनस्योद्दे० ३ चतुर्थाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ सुवंक्षका० ९ । ११ । द्वादशदिने नि० काल० १ पञ्चमस्य वस्त्रैषणाध्ययनस्योद्दे० ३ पञ्चमाध्ययनस्य प्रथमद्वितीययोरुद्देशयो० ३ सुवंक्षका० ९ । १२ । त्रयोदशदिने आ० काल० १ षष्ठस्य पात्रैषणाध्ययनस्योद्दे० ३ षष्ठाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ सुवंक्षका० ९ । १३ । चतुर्दशदिने नि० काल० १ सप्तमस्यौग्राग्रप्रतिमाख्यस्याध्ययनस्योद्दे० ३ सप्तमाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० सुवंक्षका० ९ । १४ । अष्टमाध्ययनादारभ्य चतुर्दशाध्ययनं यावत् सप्तैककान्यध्ययनानि आयुक्तपानकैर्भवन्ति आयुक्तपानकं उत्क्रमानं वा संघट्टानुक्रमेण पूर्वमेव कथितं । पञ्चदशदिने आ० काल० १ अष्टमाध्ययनस्यो० ३ सुवंक्षका० ३ । १५ ॥ अत्र आयुक्तपानारम्भः ॥ षोडशदिने नि० काल० १ नवमाध्ययनस्योद्दे० ३ सुवंक्षका० ३ । १६ । सप्तदशदिने आ० काल० १ दशमाध्ययनस्यो० ३ सुवंक्षका० ३ । १७ । अष्टादशदिने नि० काल० १ एकादशाध्ययनस्यो० ३ सुवंक्षका० ३ । १८ । एकोनविंशतितमेदिने आ० काल० १ द्वादशाध्ययनस्यो० ३ सुवंक्षका० ३ । १९ । विंशतितमे दिने नि० काल० १ त्रयोदशाध्ययनस्यो० ३ सुवं-

क्षका० ३। २०। एकविंशतितमे दिने आ० काल० १ चतुर्दशाध्ययनस्यो० ३ मुवंक्षका० ३। २१। द्वाविंशतितमे दिने नि० काल० १ पञ्चदशचूलिकाया भावनाख्याया उद्देशसमुद्देशानुज्ञाः मुवंक्षका० ३। अत्र दिने आयुक्तपानपरित्यागः २२। त्रयोविंशतितमे दिने आ० काल० १ षोडशविमुक्तनाम्न्याः चूलिकाया उद्दे० ३ मुवंक्षका० ३। २३। चतुर्विंशतितमदिने आ० काल० १ श्रुतस्कन्धस्य समुद्देशानुज्ञे मुवंक्षका० २ नन्दी २४ पञ्चविंशतितमे दिने आ० काल० १ आचाराङ्गसमुद्देशः मुवंक्षका० २। २५। षड्विंशतितमदिने आ० काल० १ आचाराङ्गानुज्ञा मुवंक्षका० १। २६॥ इत्याचाराङ्गस्य द्वितीयश्रुतस्कन्धयोगाः॥ श्रुतस्कन्धद्वयेन ५० कालग्रहण ५० नन्दी ५ कालिका अनागाढयोगाः॥ आचाराङ्गद्वितीययन्त्रकन्यासः[1]॥ अथ सूत्रकृतयोगेषु श्रुतस्कन्धद्वयं प्रथमश्रुतस्कन्धे दिने नन्दी आचाम्लं कालग्रहणं १ सूत्रकृतांगोद्देशः। सूत्रकृतप्रथमश्रुतस्कन्धप्रथमाध्ययनोद्देशसमुद्देशानुज्ञाः प्रथमाध्ययनस्य समाख्यस्य प्रथमद्वितीययोरुद्देशयोरुद्देशसमुद्देशानुज्ञाः मुख० ११ वन्द० ११ क्षमा० ११ कायो० ११। द्वितीयदिने निर्विकृतिकं काल० १ प्रथमाध्ययनस्य तृतीयचतुर्थयोरुद्देशयोरु० ३ मुवंक्षका० ६। ३। तृतीयदिने आ० काल० १ द्वितीयस्य वैकालिकाख्यस्याध्ययनस्योद्देशसमुद्देशौ द्वितीयाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ८। ३। चतुर्थदिने नि० काल० १ द्वितीयाध्ययनस्य तृतीयस्योद्देशस्यो० ३ द्वितीयाध्ययनानुज्ञा च मुवंक्षका० ४। ४। पञ्चमदिने आ० काल० १

[1] पञ्चमं यन्त्रमवलोकनीयम्।

तृतीयस्योपसर्गपरिज्ञाख्यस्याध्ययनस्यो० ३ तृतीयाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ९।५। षष्ठदिने नि० काल० १ तृतीयाध्ययनस्य तृतीयचतुर्थयोरुद्देशयोरु० ३ मुवंक्षका० ६।६। सप्तमदिने आ० काल० १ चतुर्थस्य स्त्रीपरिज्ञाख्यस्याध्ययनस्यो० ३ चतुर्थाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ९।७। अष्टमदिने नि० काल० १ पञ्चमस्य निरयविभक्त्याख्यस्याध्ययनस्यो० ३ पञ्चमाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ९।८। नवमदिने आ० काल० १ षष्ठाध्ययनस्य महावीरस्तवाख्यस्याध्ययनस्यो० ३ मुवंक्षका० ३।९। दशमदिने नि० काल० १ कुशीलाख्यस्य सप्तमाध्ययनस्यो० ३ मुवंक्षका० ३।१। एकादशदिने आ० का० १ अष्टमस्य परिभाषाख्यस्याध्ययनस्यो० ३ मुवंक्षका० ३।११। द्वादशदिने नि० काल० १ नवमस्य वीर्यसमाधिनाम्नोध्ययनस्यो० ३ मुवंक्षका० ३।१२। त्रयोदशदिने आ० काल० १ दशमस्य धर्मसमाध्ययनस्यो० ३ मुवंक्षका० ३।१३। चतुर्दशदिने नि० काल० १ एकादशस्य मार्गसमवसरणयाख्यस्याध्ययनस्यो० ३ मुवंक्षका० ३।१४। पञ्चदशदिने आ० काल० १ द्वादशस्य यथातथाध्ययनस्यो० ३ मुवंक्षका० ३।१५। षोडशदिने नि० काल० १ त्रयोदशस्य ग्रन्थाध्ययनस्यो० ३ मुवंक्षका० ३।१६। सप्तदशदिने आ० काल० १ चतुर्दशस्य यदतीताख्यस्याध्ययनस्यो० ३ मुवंक्षका० ३।१७। अष्टादशदिने नि० काल० १ पञ्चदशस्य गाथाख्याध्ययनस्यो० ३ मुवंक्षका० ३।१८। एकोनविंशतितमदिने आ० काल० १ षोडशाध्ययनस्यो० ३ मुवंक्षका० ३।१९। विंशतितमदिने आ० काल० १ श्रुतस्कन्धानुज्ञाः मु० ३ वन्द०

२ क्ष० २ का० २ नन्दी २० ॥ इति सूत्रकृतप्रथमश्रुतस्कन्धे विंशतिदिनानि ॥ प्रथमयन्त्रकन्यासः[1] ॥ अथ सूत्रकृतद्वितीयश्रुतस्कन्धः ॥ प्रथमदिने आ० काल० १ नन्दीद्वितीयश्रुतस्कन्धस्य उद्देशः प्रथमस्य पुण्डरीकाख्याध्ययनस्योद्दे० ३ मुवंक्षका० ४ । १ । द्वितीयदिने नि० काल० १ द्वितीयस्य क्रियास्थानाध्ययनस्योद्दे० ३ मुवंक्षका० ३ । २ । तृतीयदिने आ० काल० १ तृतीयस्याहारपरिज्ञाध्ययनस्योद्दे० ३ मुवंक्षका० ३ । ३ । चतुर्थदिने नि० काल० १ चतुर्थस्य प्रत्याख्यानक्रियाध्ययनस्योद्दे० ३ मुवंक्षका० ३ । ४ । पञ्चमदिने आ० काल० १ पञ्चमस्य अनगाराध्ययनस्योद्दे० ३ मुवंक्षका० ३ । ५ । षष्ठदिने नि० काल० १ षष्ठस्य आर्द्राख्याध्ययनस्योद्दे० ३ मुवंक्षका० ३ । ६ । सप्तमदिने आ० काल० १ सप्तमस्य नालिन्दाख्यस्याध्ययनस्योद्दे० ३ मुवंक्षका० ३ । ७ । अष्टमदिने आ० काल० १ श्रुतस्कन्धस्य समुद्देशानुज्ञा मुवंक्षका० २ नन्दी ८ । नवमदिने आ० काल० १ सूत्रकृताङ्गसमुद्देशः मुवंक्षका० १ । दशमदिने आ० काल० १ सूत्रकृताङ्गानुज्ञा नन्दी मु० १ वन्द० १ क्ष० १ का० १ । १० । इति सूत्रकृतद्वितीयश्रुतस्कन्धयोगेषु दि० १० उभयमीलने दि० ३० नन्दी ५ काल० ३० कालिका अनागाढयोगाः ॥ द्वितीययन्त्रकन्यासः[2] ॥ स्थानाङ्गश्रुतस्कन्धे प्रथमदिने आ० काल० १ नन्दी स्थानाङ्गस्य उद्देशः श्रुतस्कन्धस्योद्देशः प्रथमाध्ययनस्यो० ३ मुवंक्षका० ५ । १ । द्वितीयदिने नि० काल० १ द्वितीयाध्ययनस्योद्दे० ३ द्वितीयाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ९ । २ । तृती-

१ षष्ठं यन्त्रं द्रष्टव्यम् । २ सप्तमं यन्त्रं द्रष्टव्यम् ।

यदिने आ० काल० १ द्वितीयाध्ययनस्य तृतीयचतुर्थयोरुद्देशयोरु० मुवंक्षका० ६ । ३ । चतुर्थदिने नि० काल० १ तृतीयाध्ययनस्यो० ३ तृतीयाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० मुवंक्षका० ९ । ४ । पञ्चमदिने आ० काल० १ तृतीयाध्ययनस्य तृतीयचतुर्थयोरुद्देशयोरु० मुवंक्षका० ६ । ५ । षष्ठदिने नि० काल० १ चतुर्थाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ९ । ६ । सप्तमदिने आ० काल० १ चतुर्थाध्ययनस्य तृतीयचतुर्थयोरुद्देशयोरु० ३ मुवंक्षका० ६ । ७ । अष्टमदिने नि० काल० १ पञ्चमाध्ययनस्योद्देशसमुद्देशौ पञ्चमाध्ययनस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ८ । ८ । नवमदिने आ० काल० १ पञ्चमाध्ययनस्य तृतीयस्योद्देशस्यो० ३ तृतीयाध्ययनस्यानुज्ञा च मुवंक्षका० ४ । ९ । दशमदिने नि० काल० १ षष्ठाध्ययनस्यो० ३ मुवंक्षका० ४ । ९ । दशमदिने नि० काल० १ षष्ठाध्ययनस्यो० ३ मुवंक्षका० ३ । १० । एकादशदिने आ० काल० १ सप्तमाध्ययनस्यो० ३ मुवंक्षका० ३ । ११ । द्वादशदिने नि० काल० १ अष्टमाध्ययनस्यो० ३ मुवंक्षका० ३ । १२ । त्रयोदशदिने आ० काल० १ नवमाध्ययनस्यो० ३ मुवंक्षका० ३ । १३ । चतुर्दशदिने नि० काल० १ दशमाध्ययनस्यो० ३ मुवंक्षका० ३ । १४ । पञ्चदशदिने आ० काल० १ श्रुतस्कन्धस्य समुद्देशः मुवंक्षका० ११ । १५ । षोडशदिने आ० काल० १ श्रुतस्कन्धस्यानुज्ञा मुवंक्षका० १ नन्दी १ । १६ । सप्तदशदिने आ० काल० १ स्थानाङ्गसमुद्देशः मुवंक्षका० १ । १७ । अष्टादशदिने आ० काल० १ स्थानाङ्गानुज्ञा मु०

१ क्ष० १ का० १ नन्दी १ । १८ । इति स्थानाङ्गे अष्टादश दिनानि नन्दी ३ ॥ यन्त्रकन्यासः[1] ॥ कालिका अनागाढयोगाः ॥ समवायाङ्गे प्रथमदिने आ० नन्दी १ काल० १ समवायाङ्गस्य उद्देशः मुवंक्षकाः १ । १ । द्वितीयदिने आ० काल० १ समवायाङ्गस्य समुद्देशः मुवंक्षका० १ । २ । तृतीयेदिने आ० काल० १ समवायाङ्गस्य अनुज्ञा नन्दी मुवंक्षका० १ । ३ । इति समवायाङ्गे दि० ३ नन्दी २ कालिका आगाढयोगाः ॥ यन्त्रकन्यासः[2] ॥ अथ निशीथयोगाः ॥ तत्र प्रथमदिने आ० काल० १ तत एकमेवाध्ययनं तस्योद्देशः प्रथमद्वितीययोरुद्देशयोरु० ३ । मुवंक्षका० ७ । १ । द्वितीयदिने नि० काल० १ तृतीयचतुर्थयोरुद्देशयोरु० ३ । मुवंक्षका० ६ । २ । तृतीयदिने आ० काल० १ पञ्चमषष्ठयोरुद्देशयोरु० ३ । मुवंक्षका० ६ । ३ । चतुर्थदिने नि० काल० १ सप्तमाष्टमयोरुद्देशयोरु० ३ । मुवंक्षका० ६ । ४ । पञ्चमदिने आ० काल० १ नवमदशमयोरुद्देशयोरु० ३ मुवंक्षका० ६ । ५ । षष्ठदिने नि० काल० १ एकादशद्वादशयोरुद्देशयोरु० ३ मुवंक्षका० ६ । ६ । सप्तमदिने आ० काल० १ त्रयोदशचतुर्दशयोरुद्देशयोरु० ३ मुवंक्षका० ६ । ७ । अष्टमदिने नि० काल० १ पञ्चदशषोडशयोरुद्देशयोरु० ३ मुवंक्षका० ८ । नवमदिने आ० काल० १ सप्तदशाष्टादशयोरुद्देशयोरु० ३ । ९ । मुवंक्षका० ६ । ९ । दशमदिने नि० काल० १ एकोनविंशतिविंशतितमयोरुद्देशयोरु० ३ निशीथस्य समुद्देशानुज्ञे मुवंक्षका० ८ । १० । एकादशदिने आ० काल० १ श्रुतस्कन्धस्य समुद्देशः मुवंक्षका० १ । ११ । द्वादशदिने आ०

---

१ अष्टमं यन्त्रं द्रष्टव्यम् । २ नवमं यन्त्रं द्रष्टव्यम् ।

काल० १ श्रुतस्कन्धानुज्ञा मुवंक्षका० १ नन्दी १ । १२ । इति दशाश्रुतस्कन्धतपो दिनद्वादशकेन पूर्यते नन्दी १ कालिका आगाढयोगाः ॥ यन्त्र[1]कन्यासः ॥ कल्पव्यवहारदशानां श्रुतस्कन्ध एक एव । कल्पे दिनत्रयं व्यवहारे दिनपञ्चकं दशाश्रुतस्कन्धे दिनद्वादशकं सर्वं दिनविंशतिः नन्दीद्वयम् ॥ इह केचित् कल्पव्यवहारयोरेकं श्रुतस्कन्धं वदन्ति । दशानामपरं पञ्चकल्पेवचोपीदं[2] केचिद्व्यवहारदशाश्रुतस्कन्धयोरेकं श्रुतस्कन्धं वदन्ति । अथ ज्ञाताधर्मकथाङ्गे द्वौ श्रुतस्कन्धौ तत्पूर्वं ज्ञाताश्रुतस्कन्धः । प्रथमदिने आचाम्लं १ नन्दी १ काल० १ अङ्गस्योद्देशः श्रुतस्कन्धस्योद्देशः प्रथमाध्ययनस्योद्देशसमुद्देशानुज्ञा० मुखव० ५ वन्द० ५ क्षमा० ५ कायो० ५ । १ । द्वितीयदिने निर्विकृतिकं काल० १ द्वितीयाध्ययनस्यो० ३ मुवंक्षका० ३ । २ । तृतीयदिने आ० काल० १ तृतीयाध्ययनस्यो० ३ मुवंक्षका० ३ । ३ । एवं चतुर्थदिने नि० काल० १ चतुर्थाध्ययनस्यो० ३ मुवंक्षका ३ । ४ । एवमेकान्तराचाम्लनिर्विकृतिकैः कालग्रहणैः मु० ३ वन्द० ३ क्ष० ३ का० ३ प्रथमाध्ययनानामेकोनविंशतिपर्यन्तानामुद्देशसमुद्देशानुज्ञाभिः पूरणम् । विंशतितमदिने नन्दी आ० काल० १ श्रुतस्कन्धसमुद्देशः श्रुतस्कन्धानुज्ञा मुवंक्षका० २ । २० । इति ज्ञाताप्रथमश्रुतस्कन्धे दिनविंशतिः । नन्दी २ कालिका अनागाढयोगाः ॥ यन्त्र[3]कन्यासः ॥ अथ द्वितीयो धर्मकथाश्रुतस्कन्धः तत्र दश वर्गाः तेषु क्रमेण दश दश चतुःपञ्चाशच्चतुःपञ्चाशत् द्वात्रिंशत् द्वात्रिंशत् चतुश्चतुः[4] अष्ट अष्टाध्ययनानि । तेषामध्ययनानां आदिमा-

१ दशमं यन्त्रं द्रष्टव्यम् । २ वचोप्येवं इत्यपि । ३ एकादशं यन्त्रं द्रष्टव्यम् । ४ चत्वारिचत्वारि इ०

न्तिमभेदानां वर्गाः सममेव उद्देशसमुद्देशानुज्ञाः प्रथमदिने नन्दी १ आचाम्लं १ कालग्रहणम् १ धर्मकथा-द्वितीयश्रुतस्कन्धस्योद्देशः प्रथमवर्गस्योद्देशः, पुनस्तत्र प्रथमवर्गे दशानामध्ययनानामादिमानामुद्देशः, अन्तिमानामुद्देशः पुनर्वर्गस्य समुद्देशः, पुनरादिमानां समुद्देशः, अन्तिमानां समुद्देशः, पुनर्वर्गस्यानुज्ञा, पुनरादिमानामनुज्ञा, अन्तिमानामनुज्ञा मुख० वन्द० १० क्षमा० १० का० १० [समुद्देशानुज्ञे मुवंक्षका० ८ । १० ॥ इति निशीथयोगाः दशभिर्दिनैः समाप्यन्ते नन्दी नास्ति कालिका अनागाढयोगाः ॥ यन्त्रकन्यासः ॥ अत्रापि जीवकल्प एकेन निर्वृतिकेन उद्दिश्यते समुद्दिश्यते अनुज्ञायते च तत्र काल० १ मु० ३ वन्द० ३ क्ष० ३ का० ३ नन्दी नास्ति । पञ्चकल्पस्तु एकाचाम्लेनोद्दिश्यते समुद्दिश्यते अनुज्ञायते च, तत्र काल १ मुवंक्षका० ३ नन्दी नास्ति । अथ कल्पाध्ययने षष्ठे दिने नि० का० १ षष्ठाध्ययनस्यो० ३ मुवंक्षका० ३ । ६ । सप्तमे दिने आ० का० १ सप्तमाध्ययनस्यो० ३ मुवंक्षका० ३ । ७ । अष्टमे दिने नि० का० १ अष्टमाध्ययनस्यो० ३ मुवंक्षका० ३ । ८ । नवमे दिने आ० का० १ नवमाध्ययनस्यो० ३ मुवंक्षका० ३ यो० १०] द्वितीयदिने नि० का० द्वितीयवर्गस्योद्देशः दशानामध्ययनानामादिमानामुद्देशः अन्तिमानामुद्देशः पुनर्वर्गस्य समुद्देशः दशानामध्ययनानामादिमानां समुद्देशः अन्तिमानां समुद्देशः पुनर्वर्गस्य अनुज्ञा पुनः आदिमानामनुज्ञा अन्तिमानामनुज्ञा मुवंक्षका० ९ । २ । तृतीयदिने आ० का० १ तृतीयवर्गस्योद्देशः चतुःपञ्चाशदध्ययनानामादिमानामु०, अन्तिमानामु०, पुनर्वर्गस्य समुद्देशः, आदिमानां समु०, अन्तिमानां स०, पुनर्वर्गस्या-

नुज्ञा, आदिमानामनु०, अन्तिमानामनु०, मुवंक्षका० ९ । ३ । चतुर्थदिने नि० का० चतुर्थवर्गस्योद्देशः, चतुःपञ्चाशदध्ययनानामादिमानामु०, अन्तिमानामु०, पुनर्वर्गस्य समुद्देशः, आदि० स०, अन्ति० स०, पुनर्वर्गस्यानुज्ञा, आदि० अ०, अन्ति० अ०, मुवंक्षका० ९ । ४ । पञ्चमदिने आ० का० पञ्चमवर्गस्योद्देशः द्वात्रिंशदध्ययनानामादि०, अन्ति०, पुनर्वर्गस्य समुद्देशः, आदि० अन्ति० पुनर्वर्गस्य अनुज्ञा, आदि० अन्ति० मुवंक्षका० ९ । ५ । षष्ठदिने नि० काल० षष्ठवर्गस्य उद्देशः द्वात्रिंशदध्ययनानामादि० अन्ति० पुनर्वर्गस्य समुद्देशः आदि० अन्नि० पुनर्वर्गस्य अनुज्ञा, आदि० अन्ति० मुवंक्षका ९ । ६ । सप्तमदिने आ० काल० १ सप्तमवर्गस्य उद्देशः चतुर्णामध्ययनानामादि० शेषं तथैव मुवंक्षका० ९ । ७ । अष्टमदिने नि० का० १ अष्टमअष्टमवर्गस्य उद्देशः चतुर्णामध्ययनानामादिमा० शेषं तथैव मुवंक्षका० ९ । ८ । नवमदिने आ० का० १ नवमवर्गस्योद्देशः अष्टानामध्ययनानामादिमा० शेषं तथैव मुवंक्षका० ९ । ९ । दशमदिने नि० का० दशमवर्गस्योद्देशः अष्टानामध्ययनानामादि० शेषं तथैव मुवंक्षका० ९ । १० एकादशदिने आ० काल० १ नन्दी श्रुतस्कन्धस्य समुद्देशानुज्ञे मुवंक्षका० २ । ११ । द्वादशदिने आ० काल० १ अङ्गसमुद्देशः मुवंक्षका० १ । १२ । त्रयोदशदिने आ० नन्दी १ काल० १ अङ्गानुज्ञा मुवंक्षका० १ । १३ । इति त्रयोदशभिर्दिनैः ज्ञाताधर्मकथाद्वितीयश्रुतस्कन्धः पूर्यते । द्वितीययन्त्र[1]कन्यासः ॥ इति एवं ज्ञाताधर्मकथायां श्रुतस्कन्धद्वये दि० ३३ नन्दी

---

1 द्वादशं यन्त्रं द्रष्टव्यम् ।

५ कालिका अनागाढयोगाः ॥ उपासकदशाङ्गे एकः श्रुतस्कन्धो दशाध्ययनानि तत्र प्रथम दिने नन्दी १ आ० का० १ उपासकदशाङ्ग उद्देशाः श्रुतस्कन्धोद्देशः प्रथमाध्ययनस्योद्देशसमुद्देशानुज्ञाः मुवंक्षका० ५ । १ । द्वितीयदिने नि० काल० १ द्वितीयाध्ययनस्यो० ३ मुवंक्षका ३ एवं तृतीयादिषु दिनेषु दशपर्यन्तेषु कालैस्तृतीयादिदशपर्यन्तानामध्ययनानामेकान्तरिताचाम्लनिर्विकृतिकैः पूरणम्, मुवंक्षका० ३ सर्वत्र ३ । १० । एकादशदिने आ० काल० १ श्रुतस्कन्धसमुद्देशः मुवंक्षका० १ । ११ । द्वादशदिने आ० काल० १ श्रुतस्कन्धानुज्ञा नन्दी १ मुवंक्षका० १ । १२ । त्रयोदशदिने आ० काल० १ अङ्गसमुद्देशः मुवंक्षका० १ । १३ । चतुर्दशादिने आ० काल० १ अङ्गसमुद्देशः मुवंक्षका० १ । १३ । चतुर्दशदिने आ० काल० १ नन्दी १ अङ्गानुज्ञा मुवंक्षका १ । १४ । एवमुपासकदशाङ्गे दि० १४ नन्दी ३ कालिका अनागाढयोगाः ॥ यन्त्रकोयम्[1] ॥ अथ अन्तकृतदशाङ्गे एक एव श्रुतस्कन्धः, तत्राष्टौ वर्गाः तेषु वर्गेषु क्रमाद्दशाष्ट त्रयोदश षोडश त्रयोदश दशाध्ययनानि । तत्र प्रथमदिने आ० नन्दी १ काल० १ अन्तकृद्दशाङ्गस्योद्देशः श्रुतस्कन्धस्योद्देशः प्रथमवर्गोद्देशः दशानामध्ययनानामादिमानामुद्देश० अन्तिमानामुद्देशः प्रथमवर्गस्य समुद्देशः आदिमानामुद्देशः अन्तिमानां समुद्देशः प्रथमवर्गस्यानुज्ञा आदिमानामनुज्ञा अन्तिमानामनुज्ञा । मुख० ११ वन्द० ११ क्षमा० ११ कायो० ११ । १ । द्वितीयदिने नि० काल० १ द्वितीयवर्गस्योद्देशः अष्टानामध्ययनानामादि० शेषं तथैव

---

१ त्रयोदशं यन्त्रं द्रष्टव्यम् ।

द्वितीयवर्गस्य समुद्देशः आदि० शेषं तथैव । द्वितीयवर्गस्यानुज्ञा आदि० शेषं तथैव । मुवंक्षका० ९ । २ । तृतीयदिने आ० काल० १ तृतीयाध्ययनस्योद्देशः त्रयोदशानामध्ययनानामादि० तृतीयवर्गस्य समु० आदि० शेषं तथैव मुवंक्षका० ९ । ३ । चतुर्थदिने नि० काल० १ चतुर्थवर्गस्योद्देशः दशानामध्ययनानामादि० शेषं तथैव । पुनश्चतुर्थवर्गस्य समुद्देशः आदि० शेषं तथैव, पुनश्चतुर्थवर्गस्यस० आदि० शेषं तथैव, पुनश्चतुर्थवर्गस्यानुज्ञा आदि० शेषं तथैव, मुवंक्षका० ९ । ४ । पञ्चमदिने आ० काल० १ पञ्चमवर्गस्योद्देशः दशानामध्ययनानामादिमानामु० अन्तिमानामु० पञ्चमवर्गस्यस० आदि० शेषं तथैव पञ्चमवर्गस्यानुज्ञा आदि० शेषं तथैव मुवंक्षका० ९ । ५ । षष्ठदिने नि० काल० १ षष्ठवर्गस्योद्देशः षोडशानामध्ययनानामादि० शेषं पूर्ववत् मुवंक्षका० ९ । ६ । सप्तमदिने आ० काल० १ सप्तमवर्गस्योद्देशः त्रयोदशानामध्ययनानामादि० शेषं पूर्ववत् मुवंक्षका० ९ । ७ । अष्टमदिने नि० काल० १ अष्टमवर्गस्योद्देशः दशानामध्ययनानामादि० शेषं पूर्ववत् मुवंक्षका० ९ । ८ । नवमदिने आ० काल० १ श्रुतस्कन्धसमुद्देशः मुवंक्षका० १ । ९ । दशमदिने आ० नन्दी काल० १ श्रुतस्कन्धानुज्ञा मुवंक्षका० १ । १० । एकादशदिने आ० काल० १ अङ्गसमुद्देशः मुवंक्षका० १।११। द्वादशदिने आ० नन्दी १ काल० १ अङ्गानुज्ञा मुवंक्षका० १ । १२ । एवमन्तकृद्दशाङ्गे दि० १२ नन्दी ३ कालिका आगाढयोगाः । यन्त्र[1]कन्यासः । अनुत्तरोपपातिकदशाङ्गे एकः श्रुतस्कन्धः त्रयो वर्गाः क्रमात् दश

1 चतुर्दशं यन्त्रं द्रष्टव्यम् ।

त्रयोदश दशाध्ययनानि प्रथमदिने आ० काल० १ नन्दी १ अनुत्तरोपपातिकदशाङ्गोद्देश० श्रुतस्कन्धोद्देशः प्रथमवर्गस्योद्देशः दशानामध्ययनानामादि० शेषं तथैव प्रथमवर्गस्यस० आदि० शेषं तथैव प्रथमवर्गस्यानुज्ञा आदि० शेषं तथैव मुवंक्षका ११ । १ द्वितीयदिने नि० काल० १ द्वितीयवर्गस्योद्देशः त्रयोदशानामध्ययनानामादि० शेषं तथैव द्वितीयवर्गस्यस० आदि० शेषं तथैव द्वितीयवर्गस्यानुज्ञा आदि० शेषं तथैव मुवंक्षका० ९ । २ । तृतीयदिने आ० काल० १ तृतीयवर्गस्योद्देशः दशानामध्ययनानामादि० शेषं तथैव तृतीयवर्गस्यस० आदि० शेषं तथैव तृतीयवर्गस्यानुज्ञा आदि० शेषं तथैव मुवंक्षका० ९ । ३ । चतुर्थदिने आ० काल० १ श्रुतस्कन्धसमुद्देशः मुवंक्षका० ९ । ४ । पञ्चमदिने आ० काल० १ नन्दी १ श्रुतस्कन्धानुज्ञा मुवंक्षका० १ । ५ । षष्ठदिने आ० काल० १ अङ्गसमुद्देशः मुवंक्षका० १ । ६ । सप्तमदिने आ० काल० १ नन्दी अङ्गानुज्ञा मुवंक्षका० १ । ७ । एवमनुत्तरोपपातिकदशाङ्गे दि० ७ नन्दी ३ कालिका अनागाढयोगाः ॥ यन्त्रमिदम्[1] ॥ अथ प्रश्नव्याकरणाङ्गे एकः श्रुतस्कन्धः । प्रथमदिने आ० नन्दी १ काल० १ प्रश्नव्याकरणाङ्गस्योद्देशः श्रुतस्कन्धस्योद्देशः प्रथमाध्ययनस्यो० ३ मुवंक्षका० ५ । १ । द्वितीयदिने नि० काल० १ द्वितीयाध्ययनस्यो० ३ मुवंक्षका० ३ । २ । एवं तृतीयादिदिनेषु दशपर्यन्तेषु तृतीयादिदशपर्यन्ताध्ययनानामेकान्तरितनिर्विकृतिकाचाम्लैः उद्देशसमुद्देशानुज्ञा विधेयाः सर्वेषु मु० ३ वं ३ क्ष० ३ का० ३ । १० । एकादशदिने आ० काल० १ श्रुतस्कन्ध-

---

१ पञ्चदशं यन्त्रं द्रष्टव्यम् ।

समुद्देशः मुवंक्षका० १ । ११ । द्वादशदिने आ० नन्दी काल० १ श्रुतस्कन्धानुज्ञा मुवंक्षका० १ । १२ । त्रयोदशदिने आ० काल० १ अङ्गसमुद्देशः मुवंक्षका० १ । १३ । चतुर्दशदिने आ० नन्दी १ काल० १ अङ्गानुज्ञा मुवंक्षका० १ । १४ । एतेषु सर्वेष्वपि दिनेषु आयुक्तपानकविधेया इति प्रश्नव्याकरणाङ्गे दि० १४ नन्दी ३ कालिका अनागाढयोगाः ॥ यन्त्रकन्यासः ॥ अथ विपाकश्रुताङ्गे श्रुतस्कन्धद्वयं तत्र प्रथमदिने आ० नन्दी १ काल० १ विपाकश्रुताङ्गस्योद्देशः प्रथमश्रुतस्कन्धस्योद्देशश्च प्रथमाध्ययनस्योद्देशसमुद्देशानुज्ञाः मुवंक्षका० ५।१। द्वितीयदिने नि० काल० १ द्वितीयाध्ययनस्यो० ३ मुवंक्षका० ३ । २ । एवं तृतीयादिदशपर्यन्तेषु [1]दिनेषु तृतीयादिदशपर्यन्तानामध्ययनानामेकान्तराचाम्लनिर्विकृतिकैः क्रमेण कालग्रहणैः उद्देशसमुद्देशानुज्ञाः सर्वेषु मुवंक्षका० ३ । १० । एकादशदिने आ० नन्दी १ काल० १ । श्रुतस्कन्धस्य समुद्देशानुज्ञे मुवंक्षका० ३ । ११ । एवं विपाकश्रुतप्रथमश्रुतस्कन्धे दि० ११ नन्दी २ कालिका अनागाढयोगाः ॥ यन्त्रको[2]यं (न्यासः) ॥ अथ विपाकश्रुताङ्गे द्वितीयश्रुतस्कन्धे प्रथमदिने आ० नन्दी १ काल० १ श्रुतस्कन्धस्योद्देशः प्रथमाध्ययनस्यो० ३ मुवंक्षका० ४ । १ । द्वितीयदिने नि० काल० १ द्वितीयाध्ययनस्यो० ३ मुवंक्षका० ३ । २ । एवं तृतीयादिदशपर्यन्तेषु दिनेषु तृतीयादिदशपर्यन्तानामध्ययनानामुद्देशसमुद्देशानुज्ञाः सर्वेषु मुवंक्षका० ३ । १० । एकादशदिने आ० नन्दी १ काल० १ श्रुतस्कन्धस्य समुद्देशानुज्ञे मुवंक्षका० २ । ११ । द्वादशदिने आ० काल० १ अङ्ग-

१ षोडशं यन्त्रं द्रष्टव्यम् । २ सप्तदशं यन्त्रं द्रष्टव्यम् ।

समुद्देशः मुवंक्षका० १। १२। त्रयोदशादिने आ० नन्दी १ काल० १ अङ्गानुज्ञा मुवंक्षका० १। १३। एवं द्वितीयश्रुतस्कन्धे दि० १३ नन्दी ३ कालिका अनागाढयोगाः सर्वाङ्गे दि० २४ नन्दी ५ विपाकश्रुतस्कन्धस्य यन्त्रकद्वयम्[1]। अत्र च अन्तकृद्दशादि पञ्चाङ्गेषु निरयावलिका उपाङ्गे तत्र एकः श्रुतस्कन्धः तत्र पञ्चवर्गाः। प्रथमदिने आ० नन्दी १ काल० १ निरयावलिकाश्रुतस्कन्धोद्देशः पुनः प्रथमवर्गस्योद्देशः ततो दशाध्ययनानामादिमानामुद्देशः अन्तिमानामुद्देशः ततः वर्गस्य समुद्देशः आदिमानां समुद्देशः अन्तिमानां समुद्देशः पुनर्वर्गस्यानुज्ञा आदिमानामनुज्ञा अन्तिमानामनुज्ञा मुख० १० वन्द० १० क्षमा० १० कायो० १०। १। द्वितीयदिने नि० काल० १ द्वितीयवर्गस्योद्देशः दशानामध्ययनानामादि० अन्ति० द्वितीयवर्गस्य स० आदि० अन्ति० द्वितीयवर्गस्यानुज्ञा आदि० अन्ति० मुवंक्षका० ९। २। तृतीयदिने आ० काल० १ तृतीयवर्गस्योद्देशः दशानामध्ययनानामादि० अन्ति० तृतीयवर्गस्य समु० आदि० अन्ति० तृतीयवर्गस्यानुज्ञा आदि० अन्ति० मुवंक्षका० ९। ३। चतुर्थदिने नि० काल० १ चतुर्थवर्गस्योद्देशः दशानामध्ययनानामादि० अन्ति० चतुर्थवर्गस्य स० आदि० अन्ति० चतुर्थवर्गस्यानुज्ञा आदि० अन्ति० मुवंक्षका० ९। ४। पञ्चमदिने आ० काल० १ पञ्चमवर्गस्योद्देशः द्वादशाध्ययनानामादि० अन्ति० पञ्चमवर्गस्य स० आदि० अन्ति पञ्चमवर्गस्यानुज्ञा आदि० अन्ति० मुवंक्षका० ९। ५। षष्ठदिने आ० काल० श्रुतस्कन्धस्य समुद्देशः मुवंक्षका० १। ६।

---

1 अष्टादशं यन्त्रं द्रष्टव्यम्।

सप्तमदिने आ० नन्दी १ काल० १ श्रुतस्कन्धानुज्ञा मुवंक्षका० १ । ७ । इति निरयावलिकाश्रुतस्कन्धः सप्तभिर्दिनैः पूर्यते नन्दी १ कालिका आगाढयोगाः ॥ यन्त्रकन्यासः[1] ॥ अत्र आचाराङ्गे औपपातिकमुपाङ्गमुत्कालिकं त्रिभिराचाम्लैरुद्देशसमुद्देशानुज्ञाभिर्निवर्त्तते १ । सूत्रकृते राजप्रश्नेणिकमुपाङ्गमुत्कालिकमाचाम्लत्रयेण निवर्तते उद्देशसमुद्देशानुज्ञाभिः २ । स्थानाङ्गे जीवाभिगमोपाङ्गमुत्कालिकमुद्देशसमुद्देशानुज्ञाभिस्त्रिभिराचाम्लैर्निवर्तते । समवायाङ्गे प्रज्ञापनोपाङ्गमुत्कालिकम् उद्देशसमुद्देशानुज्ञाभिस्त्रिभिराचाम्लैः निवर्तते ४ । भगवत्यङ्गे सूर्यप्रज्ञप्तिरुपाङ्गं कालिकं त्रिभिः कालैरुद्देशसमुद्देशानुज्ञाभिः आचाम्लत्रयेण निवर्तते ५ ज्ञाताधर्मकथायां जम्बूद्वीपप्रज्ञप्तिरुपाङ्गं कालिकं उद्देशसमुद्देशानुज्ञाभिः त्रिभिः कालैः त्रिभिराचाम्लैर्निवर्तते ६ उपासकदशायां चंद्रप्रज्ञप्तिरुपाङ्गं कालिकं उद्देशसमुद्देशानुज्ञाभिस्त्रिभिः कालैस्त्रिभिराचाम्लैर्निवर्तते ७ कालिकेषु संघट्टा उत्कालिकेषु न सर्वत्राप्येवं । अन्तकृद्दशादिषु सर्वेषु विपाकान्तेष्वङ्गेषु निरयावलिकैव उपाङ्गं पूर्वमेवोक्तं । निरयावलिकावर्जितेषु उपाङ्गेषु नन्दी नास्ति । निरयावलिकावर्जितेषु सर्वेषु उपाङ्गेषु मुवंक्षका० १ दिनंप्रति निरयावलिकायां पञ्च वर्गाः । कल्पिका १ कल्पावतंसिका २ पुष्पिका ३ पुष्पचूलिका ४ वह्निदशा ५ औपपातिकम् १ राजप्रश्नेणिकम् २ जीवाभिगमः ३ प्रज्ञापना ४ अमूनि चत्वार्युपाङ्गानि अन्ययोगमध्ये निर्विकृतिकदिने आचाम्लं विधायोद्देशसमुद्देशानुज्ञाभिः समाप्यन्ते । तत्रैव दिने एतन्निमित्तं मुवंक्षका०

१ एकोनविंशतितमं यन्त्रं द्रष्टव्यम् ।

१२ तथा प्रकीर्णकाः नन्दी १ अनुयोगद्वाराणि २ देवेन्द्रस्तवः ३ तण्डुलवैकालिकम् ४ चन्द्राविध्वंजः ५ आतुरप्रत्याख्यानं ६ गणिविद्या ७ कल्पाकल्पिकं ८। क्षुल्लकल्पश्रुतं ९ राजकल्पश्रुतं १० प्रमादप्रमाथः ११ पौरुषीमण्डलं १२ विद्याचारणव्यवच्छेदः १३ आयविशुद्धिः १४ मरणविशुद्धिः १५ ध्यानविवक्तिः १६ मरणविवक्तिः १७ संलेखनाश्रुतं १८ वीतरागश्रुतं १९ महाप्रत्याख्यानं २० एतेषां सर्वेषामुत्कालिकानामन्ययोगोद्वहनमध्ये निर्विकृतिकमध्ये आचाम्लं विधाय एकदिन एवोद्देशसमुद्देशानुज्ञा विधीयन्ते । समकालनामग्रहणेनैव एषु सर्वेषु मुवंक्षका० ३। केचिदौपपातिकराजप्रश्नश्रेणिकजीवाभिगमप्रज्ञापनानामुद्देशसमुद्देशानुज्ञाः त्रिभिराचाम्लैः त्रिभिः कालैः कथयन्ति इति मतान्तरम् । शेषाः कालिकाः सिद्धान्ताः व्यवच्छिन्नाः केचित् । खण्डिता यदि वर्तन्ते तदा तेषां उद्देशसमुद्देशानुज्ञा वाचनादिन एव कालग्रहणं विधाय विधीयन्ते इति प्रकीर्णकयोगाः। अथ महानिशीथयोगा उच्यन्ते । तत्रैकः श्रुतस्कन्धः तत्र प्रथमदिने आचाम्लं नन्दी १ कालग्रहणं १ महानिशीथश्रुतस्कन्धोद्देशः प्रथमाध्ययनस्योद्देशसमुद्देशानुज्ञाः मुख० ४ वन्द० ४ क्षमा० ४ कायो० ४। १। द्वितीयदिने आ० काल० १ द्वितीयाध्ययनस्योद्देशः द्वितीयाध्ययने प्रथमद्वितीययोरुद्देशयोरुद्देशसमुद्देशानुज्ञाः मुवंक्षका० ७। २। तृतीयदिने आ० काल० १ तृतीयचतुर्थयोरुद्देशयोरु० ३ मुवंक्षका० ६। ३। चतुर्थदिने आ० काल० १ पञ्चमषष्ठयोरुद्देशयोरु० मुवंक्षका० ६। ४। पञ्चमदिने आ० काल० १ सप्तमाष्टमयोरुद्देशयोरु० ३ मुवंक्षका० ६। ५। षष्ठदिने आ० काल० १ नवमस्योद्देशसमुद्देशानुज्ञाः द्वितीया-

ध्ययनस्य समुद्देशानुज्ञे मुवंक्षका० ५ । ६ । सप्तमदिने आ० काल० १ तृतीयाध्ययनस्योद्देशः प्रथमद्वितीययोरुद्देशयोरु० मुवंक्षका० ७ । ७ । अष्टमदिने आ० काल० १ तृतीयचतुर्थयोरुद्देशयोरु० ३ मुवंक्षका० ६ । ८ । नवमदिने आ० काल० १ पञ्चमषष्ठयोरुद्देशयोरु० मुवंक्षका० ६ । ९ । दशमदिने आ० काल० १ सप्तमाष्टमयोरुद्देशयोरु० ३ मुवंक्षका० ६ । १० । एकादशदिने आ० काल० १ नवमदशमयोरुद्देशयोरु० मुवंक्षका० ६ । ११ । द्वादशदिने आ० काल० १ एकादशद्वादशयोरुद्देशयोरु० ३ मुवंक्षका० ६ । १२ । त्रयोदशदिने आ० काल० १ त्रयोदशचतुर्दशयोरुद्देशयोरु० ३ मुवंक्षका० ६ । १३ । चतुर्दशदिने आ० का० १ पञ्चदशषोडशयोरु० अध्ययनस्य समुद्देशानुज्ञे मुवंक्षका० ६ । १४ । पञ्चदशदिने आ० काल० चतुर्थाध्ययनस्यो १ प्रथमद्वितीययोरुद्देशयोः ३ मुवंक्षका० ६ । १५ । षोडशदिने आ० का० तृतीयचतुर्थयोरुद्देशयोरु० ३ मुवंक्षका० ६ । १६ । काल० १ तृतीयचतुर्थयोरुद्देशयोरु० ३ मुवंक्षका० ६ । १६ । सप्तदशदिने आ० काल० १ पञ्चमषष्ठयोरुद्देशयोरु० ३ मुवंक्षका० ६ । १७ । अष्टादशदिने आ० का० १ सप्तमाष्टमयोरुद्देशयोरु० ३ मुवंक्षका० ६ । १८ । एकोनविंशतितमदिने आ० काल० १ नवमदशमयोरुद्देशयोरु० ३ मुवंक्षका० ६ । १९ । विंशतितमदिने आ० काल० १ एकादशद्वादशयोरुद्देशयोरु० मुवंक्षका० ६ । २० । एकविंशतितमदिने आ० काल० १ त्रयोदशचतुर्दशयोरुद्देशयोरु० मुवंक्षका० ६ । २१ । अत्र च प्रत्यहमुद्देशद्वयस्य उद्देशसमुद्देशानुज्ञा नियता एव । द्वाविंशतितमे दिने आ० काल० १ पञ्चदशषोडशयोरुद्देशयोरु० ३ । चतुर्थाध्ययनस्य समुद्दे-

शानुज्ञे मुवंक्षका ६ । २२ । त्रयोविंशानितमदिने आ० काल० १ पञ्चमाध्ययनस्योद्देशः प्रथमद्वितीययोरुद्देश-
योरु० ३ मुवंक्षका० ६ । २३ । चतुर्विंशातितमदिने आ० काल० १ तृतीयचतुर्थयोरुद्देशयोरु० ३ । मुवंक्षका०
६ । २४ । पञ्चविंशातितमदिने आ० काल० १ पञ्चमषष्ठयोरुद्देशयोरु० ३ मुवंक्षका० ६ । २५ । षड्विंशातित-
मदिने आ० काल० १ सप्तमाष्टमयोरुद्देशयोरु० ३ मुवंक्षका० ६ । २६ । सप्तविंशातितमे दिने आ० काल० १
नवमदशमयोरुद्देशयोरु० ३ मुवंक्षका० ६ । २७ । अष्टाविंशातितमदिने आ० काल० १ एकादशद्वादशयोरु०
३ पञ्चमाध्ययनस्य समुद्देशानुज्ञे च मुवंक्षका० ८ । २८ । एकोनत्रिंशतमदिने आ० काल० १ षष्ठाध्ययनस्यो-
द्देशः प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ७ । २९ । त्रिंशत्तमदिने आ० काल० १ तृतीयचतुर्थयोरुद्देश-
योरु० ३ षष्ठाध्ययनस्य समुद्देशानुज्ञे च मुवंक्षका० ८ । ३० । एकत्रिंशत्तमदिने आ० का० १ सप्तमाध्ययनस्य
रुद्देशः प्रथमद्वितीययोरुद्देशयोरु० मुवंक्षका० ७ । ३१ । द्वात्रिंशत्तमदिने आ० काल० १ तृतीयचतुर्थयोरुद्देश-
योरु० ३ मुवंक्षका० ६ । ३२ । त्रयस्त्रिंशत्तमदिने आ० काल० १ पञ्चमषष्ठयोरुद्देशयोरु० ३ सप्तमाध्ययन-
स्यसमुद्देशानुज्ञे मुवंक्षका० ८ । ३३ । चतुस्त्रिंशत्तमदिने आ० काल० १ अष्टमाध्ययनस्योद्देशः प्रथमद्विती-
ययोरुद्देशयोरु० ३ मुवंक्षका० ७ । ३४ । पञ्चत्रिंशत्तमदिने आ० काल० १ तृतीयचतुर्थयोरुद्देशयोरु० ३ मुवं-
क्षका० ६ । ३५ । षट् त्रिंशत्तमदिने आ० काल० १ पञ्चमषष्ठयोरुद्देशयोरु० मुवंक्षका० ३ । ३६ । सप्तत्रिंश-
त्तमदिने आ० काल० १ सप्तमाष्टमयोरुद्देशयोरु० ३ मुवंक्षका० ६ । ३७ । अष्टात्रिंशत्तमदिने आ० काल० १

नवमदशमयोरु० ३ मुवंक्षका० ६ । ३८ । एकोनचत्वारिंशत्तमदिने आ० काल० १ एकादशद्वादशयोरुद्देशयोरु० ३ मुवंक्षका० ६ । ३९ । चत्वारिंशत्तमदिने आ० काल० १ त्रयोदशचतुर्दशयोरुद्देशयोरु० मुवंक्षका० ६ । ४० । एकचत्वारिंशत्तमदिने आ० काल० १ पञ्चदशषोडशयोरुद्देशयोरु० मुवंक्षका० ६ । ४१ । द्विचत्वारिंशत्तमदिने आ० काल० १ सप्तदशाष्टादशयोरुद्देशयोरु० ३ मुवंक्षका० ६ । ४२ । त्रिचत्वारिंशत्तमदिने आ० काल० १ एकोनविंशतितमविंशतितमयोरुद्देशयोरु० ३ अष्टमाध्ययनस्य समुद्देशानुज्ञे च मुवंक्षका० ८ । ४३ । चतुश्चत्वारिंशत्तमदिने आ० काल० १ श्रुतस्कन्धसमुद्देशः मुवंक्षका० १ । ४४ । पञ्चचत्वारिंशत्तमदिने आ० काल० १ नन्दी १ श्रुतस्कन्धानुज्ञा मु० १ वं १ क्ष० १ का० १ । ४५ । इति महानिशीथश्रुतस्कन्धे दि० ४५ नन्दी १ कालिका आगाढयोगाः । अत्र पञ्चचत्वारिंशदाचाम्लानि अयुक्तपानकैरेव विधीयन्ते । यन्त्रकं[1]न्यासः । अथसर्वयोगोद्वहनकथनानन्तरं बहुकालावधेः बहुक्रियस्य बहुवक्तव्यस्य विवाहप्रज्ञप्त्यभिधानस्य भगवत्यङ्गस्य गणियोगोद्वहनक्रमस्य विधिरभिधीयते । सचायं षण्मासाः षड्दिवसान्विता अवधिः । तत्र दिनसंख्या १८६ भवति । तत्र पञ्चमाङ्गे श्रुतस्कन्धे नास्ति एकचत्वारिंशच्छतानि, एतस्य चर्याशेषयोगोद्वहनचर्याक्रमेण पूर्वमेवोक्ता, तत्र प्रथमदिने आचाम्लं १ नन्दी १ काल० १ प्रथमशतस्योद्देशः प्रथमशतस्य प्रथमद्वितीययोरुद्देशयोरुद्देशसमुद्देशानुज्ञाः मुख० ८ वन्द० ८ क्षमा० ८ कायो० ८ एवं द्वितीय-

१ विंशतितमं यन्त्रं द्रष्टव्यम् ।

तृतीयचतुर्थदिनेषु प्रथमशतस्य तृतीयाद्युद्देशद्वयं द्वयं त्रिभिःकालैस्त्रिभिः कालैस्त्रिभिर्दिनैरेकान्तनिर्विकृति-काचाम्लैः उद्दिश्यते समुद्दिश्यते अनुज्ञायते च । एषु मुवंक्षका० षट् षट् ४ पञ्चमदिने आ० काल० १ नवम-दशमयोरुद्देशयोरु० ३ प्रथमशतस्य समुद्देशानुज्ञे च मुवंक्षका० ८ । ५ । षष्ठदिने आ० काल० १ द्वितीयश-तस्य उद्देशः द्वितीयशतस्य प्रथमोद्देशस्य स्कन्धकाभिधानस्योद्देशसमुद्देशौ, यदि तस्मिन् दिने योगवाहिनः स्कन्धकोद्देशो मुखपाठं नागतः तदा तत्रैव दिने तस्यानुज्ञा नोचेदागतः तदा तद्द्वितीयदिने आचाम्लं विधाय मुखपाठमागतः सोनुज्ञाप्यः मुवंक्षका० ३ । ६ सप्तमदिने आ० काल० १ स्कन्धकानुज्ञा मुवंक्षका० १ । ७ अष्टमदिने नि० काल० १ प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ६ । ८ । नवमदशमैकादशदिनेषु तृती-यचतुर्थपञ्चमषष्ठसप्तमाष्टमोद्देशानां पूर्ववत् उद्दे० मुवंक्षका० ६ सर्वत्र दिनत्रये । द्वादशदिने आ० काल० १ नवमदशमयोरुद्देशयोरु० ३ । द्वितीयशतस्य समुद्देशानुज्ञे च मुवंक्षका० ८ । १२ द्वितीयशते सप्त दिनानि दिनं प्रति पञ्चदत्तयो भवन्ति पानभोजनयोः तिस्रो भोजनस्य, द्वे पानकस्य अथ द्वे भोजनस्य तिस्रः पान-कस्य, अथवा द्विद्विपानभोजनयोरेका लवणस्य । दत्ति[१]संज्ञेन—यतिर्गृहस्थगृहं गतः, प्रथमं यद्दत्तं तदेव गृहीत्वा निर्गच्छति नान्यद्वस्तु गृह्णाति न द्वितीयं गृह्णाति इति यतीनां दत्तिः । गृहिणां तु दत्तिः प्रत्याख्यानमजानन् पात्रे यत्प्रथममेव ददाति नरो वा नारी वा तेनैव तृप्तिः क्रियते नान्यद् गृह्यते इति गृहिणां दत्तिः । त्रयो-

१ वृत्ति शब्देन इत्यपि ।

दशदिने आ० काल० १ तृतीयशतस्योद्देशः प्रथमोद्देशस्योद्दे० ३ मुवंक्षका० ४। १३। चतुर्दशदिने आ० काल० १ तृतीयशतस्य द्वितीयोद्देशस्य चमराख्यस्यो० ३ मुवंक्षका० ३। १४। यतिस्तत्रैव दिने चमरोद्देशो मुखपाठमायाति[1], तदा तत्र दिने तस्यानुज्ञा कर्तव्या नोचेदायाति, तदा द्वितीयदिने तस्मिन् मुखपाठमागते आचाम्लेन अनुज्ञा विधेया, तत्र मुवंक्षका० १। १५। इति पञ्चदश दिनानि गतानि, एतेषु व्यतीतेषु पञ्चदशसु। कालेष्वतिक्रान्तेषु षष्ठयोगो लगति, अनुक्रमेण षष्ठयोगे पञ्चदिनानि निर्विकृतिकं षष्ठदिने आचाम्लं षट् दिनानि निर्विकृतिकं, सप्तमदिने आचाम्लं पुनरनयैव युक्त्या पञ्चदिनानि निर्विकृतिकं षष्ठदिने आचाम्लं तावद्यावद्गोशालोद्देशः, गोशालस्तु पञ्चदशदिनानन्तरं चतुस्त्रिंशद्दिनपर्यन्तं १५ षोडशदिने काल० १ तृतीयचतुर्थयोरुद्देशयोरु० ३ मुवंक्षका० ६। १६। सप्तदशदिने काल० १ पञ्चमषष्ठयोरुद्देशयोरु० ३। मुवंक्षका० ६। १७। अष्टादशदिने काल० १ सप्तमाष्टमयोरु० ३ मुवंक्षका० ६। १८। एकोनविंशतितमदिने काल० १ नवमदशमयोरुद्देशयोरु० ३ तृतीयशतस्य समुद्देशानुज्ञे मुवंक्षका० ८। १९। अत्रापि तृतीयशते पञ्च दत्तयः। विंशतितमदिने काल० १ चतुर्थशतस्योद्देशः चतुर्थशतस्य प्रथमानां चतुर्णामुद्देशानामादिमानामुद्देशसमुद्देशानुज्ञाः चतुर्णां परेषामन्तिमानामुद्देशसमुद्देशानुज्ञाः मुवंक्षका० ७। २०। एकविंशतितमदिने काल० १ नवमदशमयोरुद्देशयोरु० ३ चतुर्थशतस्य समुद्देशानुज्ञे च मुवंक्षका० ८। २१। द्वाविंशतितमदिने काल० १

---

१ मुखपाठे समायाति इत्यपि।

पञ्चमशतस्योद्देशः पञ्चमशतस्य प्रथमद्वितीययोरुद्देशयोरु० ३ मुवंक्षका० ७ । २२ । त्रयोविंशतितमदिने काल० १ तृतीयचतुर्थयोरुद्देशयोरु० ३ । मुवंक्षका० ६ । २३ । चतुर्विंशतितमदिने काल० १ पञ्चमषष्ठयोरुद्देशयोरु० ३ मुवंक्षका० ६ । २४ । पञ्चविंशतितमे दिने काल० १ सप्तमाष्टमयोरुद्देशयोरु० ३ मुवंक्षका० ६।२५। षड्विंशतितमदिने काल० १ नवमदशमयोरु० ३ पञ्चमशतस्य समुद्देशानुज्ञे च मुवंक्षका० ८ । २६ । षष्ठे सप्तमे अष्टमे च शते पञ्चमवगुक्तिः, द्वाविंशतितमदिनमारभ्य एकचत्वारिंशत्तमदिनं यावत् पञ्चमाद्यानि अष्टमपर्यन्तानि शतानि पञ्चभिः पञ्चभिर्दिनैरतिक्रामन्ति ४१ । द्विचत्वारिंशत्तमदिने काल० १ नवमशतस्योद्देशः सप्तदशोद्देशानामादिमानामुद्देशः सप्तदशोद्देशानामन्तिमानामुद्देशः नवमशतस्य समुद्देशः सप्तदशोद्देशानामादिमानां समुद्देशः सप्तदशोद्देशानामन्तिमानां समुद्देशः नवमशतानुज्ञा सप्तदशानामादिमानामनुज्ञा सप्तदशानामन्तिमानामनुज्ञा मुवंक्षका० ९ नवमदशमैकादशद्वादशत्रयोदशचतुर्दशशतेषु एकैव रीतिः, चतुस्त्रिंशचतुस्त्रिंशत् द्वादश दश दश दश क्रमादुद्देशाः सर्वत्र अर्धेनान्तिमा द्विधा कृत्वा एकस्मिन्नेव एकस्मिन्नेव दिने एकेन एकेनैव कालेन शतैः समुद्दिश्यन्ते अनुज्ञायन्ते च । द्विचत्वारिंशत्तमदिनमारभ्य सप्तचत्वारिंशद्दिनपर्यन्तमेकैव रीतिः मुवंक्षका० सर्वेषु प्रत्येकं नव नव । ४७ । अष्टचत्वारिंशत्तमदिने आ० काल० १ पञ्चदशशतस्य गोशालनाम्ना उद्देशसमुद्देशौ, यदि तस्मिन् दिने गोशालशतं योगवाही पठति तदा तत्रैव दिने अनुज्ञा, नोचेद्द्वितीयदिने द्वितीयाचाम्लं विधाय द्वितीयका-

लेनानुज्ञां करोति एकदिने सुवंक्षका० २ द्वितीयदिने सुवंक्षका० १ दिनद्वये दत्तित्रयं द्वे भोजनस्य एका पानस्य, अथवा द्वे पानस्य एका भोजनस्य, गोशालशतानुज्ञे यावदेकोनपञ्चाशद्दिनानि एकोनपञ्चाशत् काला जाताः, स्कन्धकचमरोद्देशगोशालशतेषु अनुज्ञापितेषु पुरतः क्षमाश्रमणकालादि कर्तुं न कल्प्यते, एतन्मध्ये एव सप्ततिः कालग्रहणानि, मुखवस्त्रिकावन्दनकक्षमाश्रमणकायोत्सर्गादि द्विवेलं विधाय समापनीयम् । एकोनपञ्चाशद्दिनेभ्यः ऊर्ध्वं गोशालेनुज्ञाते अष्टमयोगा लगन्ति, तेषु सप्तनिर्विकृतिकानि अष्टममाचाम्लं नित्यमेवैवं पुरतोपि, अथवा संप्रति स्थविराणामिति मतम् । अष्टमीषु चतुर्दशीष्वाचाम्लं, शेषदिनेषु निर्विकृतिकानि षण्मासान्तं, गोशाले दत्तित्रयभङ्गे सर्वं भग्नं भवति, चमरादूर्ध्वमष्टमयोगे लग्ने व्यञ्जनादि विकृतिगतादि गुर्वनुज्ञातकवलादि अन्ययोगनिर्विकृतिकवत् कल्पते, अतः "विगई विसज्जावणत्थं ओहडावणत्थं" वा कायोत्सर्गः क्रियते "अन्नत्थ० जाव अप्पाणं वोसिरामि" नमस्कारचिन्तनं नमस्कारभणनं च, तत्प्रथमदिनेषु पूर्वोक्तगणियोगरीत्या व्यञ्जनादिग्रहणं, गोशालादूर्ध्वं पञ्चाशत्तमादिदिनेषु एकैकस्य शतस्य एकेनैकेन कालेन षड्विंशतिशतानां पञ्चसप्ततिदिनपर्यन्तमुद्देशसमुद्देशानुज्ञाः तत्र शतमध्यगतानामुद्देशानामुद्देशसमुद्देशानुज्ञाः अर्धानामादिमसंज्ञाया अर्धानामन्तिमसंज्ञाया येषु शतेषु विषमा उद्देशास्तेषु एकाधिका आदिमा एव विधीयन्ते, तद्यथा पञ्चाशत्तमदिने काल० १ षोडशशते उद्देशाश्चतुर्दश आदिमाः सप्त अन्तिमाः सप्त एषामन्येषां च तत्रैव दिने शतैः सह उद्देशसमुद्देशानुज्ञाः सुवंक्षका० ९।५०।

एकपञ्चाशत्तमदिने काल० १ सप्तदशे शते सप्तदशोद्देशाः आदिमा नव ९ अन्तिमा अष्ट ८ मुवंक्षका० ९। ५१। द्विपञ्चाशत्तमदिने काल० १ अष्टादशशते उद्देशा दश १० आदिमाः पञ्च ५ अन्तिमाः पञ्च ५ मुवंक्षका० ९। ५२। त्रिपञ्चाशत्तमदिने काल० १ एकोनविंशतितमे शते उद्देशा दश १० आदिमाः पञ्च ५ अन्तिमाः पञ्च ५ मुवंक्षका० ९। ५३। चतुष्पञ्चाशत्तमदिने काल० १ विंशतितमशते उद्देशाः दश १० आदिमाः पञ्च ५ अन्तिमाः पञ्च ५ मुवंक्षका० ९। ५४। पञ्चपञ्चाशत्तमदिने काल० १ एकविंशतितमे शते उद्देशाः अशीतिः ८० आदिमाश्चत्वारिंशत् ४० अन्तिमाश्चत्वारिंशत् ४० मुवंक्षका० ९। ५५। षट्पञ्चाशत्तमदिने काल० १ द्वाविंशतितमे शते उद्देशाः षष्टिः ६० आदिमास्त्रिंशत् ३० अन्तिमास्त्रिंशत् ३० मुवंक्षका० ९। ५६। सप्तपञ्चाशत्तमदिने काल० १ त्रयोविंशतितमे शते उद्देशाः पञ्चाशत् ५० आदिमाः पञ्चविंशतिः २५ अन्तिमाः पञ्चविंशतिः २५ मुवंक्षका० ९। ५७। अष्टपञ्चाशत्तमदिने काल० १ चतुर्विंशतितमे शते उद्देशाः चतुर्विंशतिः आदिमा द्वादश अन्तिमा द्वादश मुवंक्षका० ९। ५८। एकोनषष्टितमे दिने काल० १ पञ्चविंशतितमे शते उद्देशाः द्वादश आदिमाः षट् अन्तिमाः षट् मुवंक्षका० ९। ५९। षष्ट्यादि चतुष्पष्टिपर्यन्त ६०। ६१। ६२। ६३। ६४। दिनेषु काल० ५ षड्विंशतितमे बन्धिशते सप्तविंशतितमे करांशुकशते अष्टाविंशतितमे कर्मसमार्जनशते एकोनत्रिंशत्तमे कर्मप्रस्थापनशते त्रिंशत्तमे समवसरणशते एतेषु पञ्चस्वपि शतेषु एकादशैकादशोद्देशाः अर्धार्धेन कृत्वा उद्देशसमुद्देशानुज्ञा आरोप्यन्ते, आदिमाः षट् षट् अन्तिमाः

पञ्च पञ्च एतेषु मुवंक्षका० नव नव ६४ पञ्चषष्टितमदिने काल० १ एकत्रिंशत्तमे उपपातशते उद्देशा अष्टाविंशतिः २८ आदिमाश्चतुर्दश १४ अन्तिमाश्चतुर्दश १४ मुवंक्षका० ९ । ६५ । षट्षष्टितमदिने काल० १ द्वात्रिंशत्तमे उद्वर्तनाशते उद्देशाः अष्टाविंशतिः २८ आदिमाश्चतुर्दश १४ अन्तिमाश्चतुर्दश १४ मुवंक्षका० ९ । ६६ सप्तषष्टितमदिने काल० १ त्रयस्त्रिंशत्तमे शते एकेन्द्रियमहाज्योत्स्नाशतानि द्वादश १२, तेषु उद्देशाश्चतुर्विंशत्यधिकशतमेकं आदिमा द्वाषष्टिः ६२ अन्तिमा द्वाषष्टिः मुवंक्षका० ९ । ६७ । अष्टषष्टितमदिने काल० १ चतुस्त्रिंशत्तमे शते श्रेणिशतानि द्वादश १२, तेषु उद्देशाः शतमेकं चतुर्विंशत्यधिकं १२४ आदिमा द्वाषष्टिः ६२ अन्तिमा द्वाषष्टिः ६२ मुवंक्षका० ९ । ६८ । एकोनसप्ततितमे दिने काल० १ पञ्चत्रिंशत्तमे शते एकेन्द्रियमहाज्योत्स्नाशतानि द्वादश, तेषु उद्देशा द्वात्रिंशदधिकं शतं १३२ आदिमाः षट्षष्टिः ६६ अन्तिमाः षट्षष्टिः ६६ । मुवंक्षका० ९ । ६९ । सप्ततितमदिने काल० १ षट्त्रिंशत्तमे शते द्वीन्द्रियमहाज्योत्स्नाशतानि द्वादश १२ तेषु उद्देशा द्वात्रिंशदधिकं शतं १३२ आदिमाः षट्षष्टिः ६६ अन्तिमाः षट्षष्टिः ६६ मुवंक्षका० ९ । ७० । एकसप्ततितमदिने काल० १ सप्तत्रिंशत्तमे शते त्रीन्द्रियमहाज्योत्स्नाशतानि द्वादश तेषु उद्देशा द्वात्रिंशदधिकं शतं १३२ आदिमाः ६६ अन्तिमाः ६६ मुवंक्षका० ९ । ७१ । द्वासप्ततितमदिने काल० १ अष्टात्रिंशत्तमशते चतुरिन्द्रियमहाज्योत्स्नाशतानि द्वादश १२ तेष्वपि उद्देशाः १३२ आदिमाः ६६ अन्तिमाः ६६ मुवंक्षका० ९ । ७२ । त्रिसप्ततितमदिने काल० १ । एकोनचत्वारिंशत्तमे शते असंज्ञिप-

श्वेन्द्रियमहाज्योत्लाशतानि द्वादश तेषु उद्देशाः १३२ आदिमाः ६६ अन्तिमाः ६६ मुवंक्षका० ९ । ७३ चतुः-सप्ततितमदिने काल० १ चत्वारिंशत्तमे शते संज्ञिपञ्चेन्द्रियमहाज्योत्लाशते उद्देशा एकत्रिंशदधिकं शत-द्वयं २३१ आदिमाः ११६ अन्तिमाः ११५ मुवंक्षका० ९ । ७४ । पञ्चसप्ततितमे दिने काल० १ एकचत्वारिंश-त्तमे राशिज्योत्लाशते उद्देशाः षण्णवत्यधिकं शतं १९६ आदिमाः ९८ अन्तिमाः ९८ मुवंक्षका० ९ । ७५ । षट्सप्ततितमदिने आ० काल० १ अङ्गसमुद्देशः मुवंक्षका० १ । ७६ । सप्तसप्ततितमदिने आ० काल० १ नन्दी १ भगवत्यङ्गानुज्ञा मुवंक्षका० १ । ७७ । एत्थसंगहणिगाहाओ "अठदसुदेसाइं दोचउत्तीसाइं बारसं-वेगं । सयं तिन्नि दसुद्देसाइं गोसालसयं तु एक सरं ॥ १ ॥ इत्थ अट्ठसयाइं दसगुद्देसाइं इत्यर्थः । बीए पढमु-द्देसे खंदोतइयंमि चमरओ बीए । गोसालो पन्नरसमे एण पणतिग हुंति दत्तीओ ॥ २ ॥ एआ सभत्तपाणा पारणदुगेण होइ अणु नवण । खंदाईण कम्मेणं वोच्छामि विहिं अणुभाए ॥ ३ ॥ चमरम्मि छट्ठ जोगो विग-ईए विसज्जणत्थ मुस्सग्गो । अट्ठम जोगो लग्गई गोसालसए अणुन्नाए ॥ ४ ॥ चउदससतरसतिन्निउ दस उद्देसाइं तह असी सट्ठी । पन्नासा चउवीसा बारस पंचसुएकारा ॥ ५ ॥ अट्ठावीसा दोसु चउवीससयं च पंच छत्तीसा । दोन्नि सयाई गतीसा चरिमसयं चेव छन्नऊअं ॥ ६ ॥ पनरस कालग एहिं पनरसदिवसेहिं चमर अणुन्नाए । लग्गइय छट्ठजोगो पणनिवीआ अंविलं छट्ठं ॥ ७ ॥ अउणा वन्न दिणेहिं अउणा (४९) वन्ना सएहिं कालेहिं । अट्ठम जोगो लग्गइ अट्ठम हि अहे निरुद्धं च ॥ ८ ॥ संपइ सामायारीए गोसाल अणु-

झाए अट्ठमी चउद्दसीसु अंबीलं कीरइति महानिसीहे विही अज्झयणं १ नव ३ सोलस ३ सोलस ४ बारस ५ चउक्क ६ छ ७ वीसा ८ अट्ठज्झयणुद्देसा तेसीइ महानिस्सीहस्सा ॥ १ ॥ यन्त्र¹कन्यासः ॥ एवं विवाहप्रज्ञप्तिपञ्चमाङ्गयोगेषु सप्तसप्तति दिनानि सप्तति कालाश्च पूर्यन्ते। शेषाणि नवोत्तरशतदिनानि विना कालैर्विना वन्दनकक्षमाश्रमणकायोत्सर्गादिकर्मभिः संघट्टोक्तमानप्रत्याख्याननिर्विकृतिकादिमुखवस्त्रिकावन्दनकैरेवोद्देशादिवर्जितानि पूर्यन्ते। गोशालानन्तरं अष्टमीचतुर्दशीदिनयोः आचाम्लं शेषदिनेषु निर्विकृतिकानि षण्मासाः षड्दिवसपर्यन्तम्। एकोनपञ्चाशद्दिनानन्तरं षडशीत्युत्तरशतदिनानि यावदायुक्तपानकं भगवतीयोगेषु षडशीत्युत्तरशतदिनानि यावत् सर्वत्र भवति। संघट्टा कालिकयोगेषु निश्चिता एव । इति भगवत्यां गणियोगविधिः। अत्र मास ६ दिन ६ सर्वदिन १८६ काल ७७ नन्दी २ कालिका आगाढयोगाः। अत्र च सर्वयोगेषु अध्ययनवर्गशत उद्देशसमुद्देशानन्तरं तेषामध्ययनोद्देशादीनामुद्देशसमुद्देशानुज्ञाः कथिताः। इयं युक्तिरस्मत्पूर्वगुरूणां सिद्धान्ताम्बुधिपारगाणां श्रीजगत्तिलकसूरिपादानामुपदेशात्। अस्मद्गुर्वाचरणाच्च पूर्वसामाचारीषु पुनरुद्देशाध्ययनानामनुज्ञापनानन्तरं वर्गाध्ययनशतादीनामनुज्ञाः। ततः स्याद्वादशालिनि जिनमते नोभयत्रापि दोषः। स्वगुरुसंप्रदाय एव प्रमाणीकार्यः। तथा च योगोद्वहने क्रियमाणे तिथिक्षयवृद्ध्योरौदयिक्येव तिथिर्ग्राह्या । संघट्टायुक्तमानकालस्वाध्यायप्रतिक्रमणप्रत्याख्यानादिक्रियाभङ्गे वान्तरो-

¹ एकविंशतितमं यन्त्रं द्रष्टव्यम्।

गोद्रुमाकालमलोत्सर्गदेशविड्वरपलायनप्रभृत्युपद्रवेषु भग्नदिनानि योगोद्वहने परिपूर्णे तयैव रीत्या पूरणीयानि योगोद्वहनकालसंख्या यथा—आवश्यके दिनं ८ दशवैकालिके दिन १५ मण्डलिप्रवेशे दिन ७ उत्तराध्ययने दिन २८ आचाराङ्गे दिन ५० स्थानाङ्गे दिन १८ समवायाङ्गे दिन ३ निशीथे दिन १० कल्पव्यवहारदशाश्रुतस्कन्धेषु दिन २० सूत्रकृते दिन ३० भगवत्यङ्गे दिन १८६ ज्ञाताधर्मकथाङ्गे दिन ३३ उपासकदशाङ्गे दिन २० निरयावलिकोपाङ्गे दिन ७ अन्तकृद्दशाङ्गे दिन १२ अनुत्तरोपपातिकदशाङ्गे दिन ७ उपपातिके दिन ३ राजप्रश्नेणिके दिन ३ जीवाभिगमे दिन ३ प्रज्ञापनायां दिन ३ सूर्यप्रज्ञप्तौ दिन ३ जम्बूद्वीपप्रज्ञप्तौ दिन ३ चन्द्रप्रज्ञप्तौ दिन ३ प्रश्नव्याकरणाङ्गे दिन १४ विपाकश्रुते दिन २४ महानिशीथे दिन ४५ जीतकल्पे दिन १ पञ्चकल्पे दिन १ एवं दिन ५६१ एतेषां मासा गणने मास १८ दिन २१ इति सर्वयोगदिनमाससंख्या।
इत्याचार्यश्रीवर्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायने योगोद्वहनकीर्त्तनो नाम एकविंशतितम उदयः॥

द्वाविंशतितम उदयः।

अथ वाचनाग्रहणविधिः।

स यथा वाचनार्हो मुनिर्यथा। गुरुभक्तः क्षमावांश्च कृतयोगो निरामयः। प्रज्ञावानष्टभिश्चैव शुद्धैर्बुद्धि-

१ अत्र सर्वत्र दिनेत्यविभक्तिकमस्ति दिनं दिनानि मासः मासा इति वा यथासंभवं सविभक्तिकन्तु स्वयमुन्नेयम्।

गुणैर्युतः ॥ १ ॥ विनीतः शास्त्ररागी च सर्वव्याक्षेपवर्जितः । निद्रालस्यादिजेता च विषयेच्छाविवर्जितः ॥ २ ॥ यतिर्विज्ञाततत्त्वश्च निर्मत्सरमनाः सदा । सिद्धान्तवाचनाकार्यमर्हतीदृश उत्तमः ॥ ३ ॥" इति वाचनायोग्यलक्षणम् । गुरुलक्षणं योगोद्वहनाधिकारे पूर्वमेवोक्तम् । वाचनासामग्रीलक्षणं यथा—"सहाया योगयोग्याश्च कालो योगसमस्तथा । बहुपुस्तकसंपत्तिः पानान्ने सुलभे तथा ॥ १ ॥ कालग्रहणयोग्यं च क्षेत्रं विघ्नविवर्जितम् । लेखिन्यश्च मषीपात्रं शयनीयाशने शुभे ॥ २ ॥ परित्यागोन्यकार्याणां पटुता दृष्टिजिह्वयोः । कर्णश्रुतिश्चेति योग्या सामग्री वाचनाक्रमे ॥ ३ ॥" इति वाचनासामग्रीलक्षणम् । एवंविधियोगे व्यूढयोगो मुनिः प्राभातिकं कालग्रहणं कुर्यात् स्वाध्यायप्रस्थापनं च, तेनैव विधिना । ततः गुरुपार्श्वे समागत्यैर्यापथिकीं प्रतिक्रम्य अनुयोगमुखवस्त्रिकां प्रतिलिख्य द्वादशावर्तवन्दनं दद्यात् । ततः क्षमाश्रमणपूर्वं गुर्वग्रे भणति "भगवन् अणुओगं आढवेह" गुरुः कथयति "आढवेमि" पुनः शिष्यः क्षमाश्रमणपूर्वकं कथयति "अणुओगस्स आढवणत्थं करेमि काउस्सग्गं अन्नत्थ० जाव अ०" कायोत्सर्गः नमस्कारचिन्तनं नमस्कारभणनं, ततो गुर्वग्रे सुखासनेनोपविश्य मुखवस्त्रिकाञ्चितः पुस्तकालोचनेन गुरुवागनुकरणेन वा गीतादिवचनदोषरहितो मधुरस्वरेण सिद्धान्तं वाचयेत् । अत्र वाचनायां परिपाटीवाचनमेव करणीयम् । अर्थग्रहणं टीकाचूर्णिप्रभृतीनां व्याख्यानं कालान्तरे, कालादिक्रियावर्जितमपि भवति । प्रथमवाचनायां दशवैकालिकं, ततः आवश्यकं, ततः उत्तराध्ययनं, ततः आचाराङ्गं, शेषागमानां यथारुचि यथायोगं क्रमोत्क्रमैरपि वाचना,

वाचनाग्रहणानन्तरं गुरुणा सह स्वाध्यायप्रस्थापना, ततः "अणओगस्स पडिक्कमणत्थं करेमि काउस्सग्गं अन्नत्थ० जाव अप्पाणं०" कायोत्सर्गः नमस्कारचिन्तनं नमस्कारभणनं ततो वाचनाक्रमे विधीयमाने संघट्टा चाम्लादि न किमपि। साधुभिः सर्वदा दिनकृत्यमेव विधेयं, प्राभातिककालस्वाध्यायप्रस्थापनद्वयानुयोगकायोत्सर्गः वाचनाग्रहणं यावत् प्रत्यहं विधेया । इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायने वाचनाग्रहणकीर्तनो नाम द्वाविंशतितम उदयः ॥

त्रयोविंशतितम उदयः ।

अथ वाचनानुज्ञाविधिः ।

स यथा। वाचनानुज्ञाशब्देन वाचनाचार्यपदस्थापना उच्यते, तल्लक्षणं यथा "कृतयोगश्च गीतार्थो वाचनारचितश्रमः। सर्वैर्गुरुगुणैर्युक्तो वाचनाचार्य इष्यते ॥ १ ॥" गुरुः ईदृशं शिष्यं वाचनाचार्यपदे समारोपयेत्। तत्र आचार्यपदस्थापनायोगे तिथिवारर्क्षलग्ने गुरुः कृतविशिष्टवेषः कृतलोचं कृताचाम्लं शिष्यं निजपार्श्वमानयेत्। ततः उत्थापनावत् समवसरणादिरचनं विधाय शिष्यैः समवसरणस्य प्रदक्षिणात्रयं दापयेत्।

शिष्यो गुरुः पुरः क्षमाश्रमणपूर्वं भणति "इच्छाकारेण तुज्झे अम्हं वायणा अनुज्ञापया रोवणियं नंदि-

वणियं वासक्खेवं करेह चेइयाइं च वंदावेह" उभौ पूर्ववत् । वर्द्धमानस्तुतिभिश्चैत्यवन्दनं कुरुतः, श्रुत-शान्तिक्षेत्रभुवनशासनवैयावृत्यकरदेवतास्तुतिकथनं पूर्ववत् । ततः शक्रस्तवपाठभणनं, अर्हणादिस्तोत्रकथनं, जयवीयरायजगगुरुगाथापठनं, मुखवस्त्रिकाप्रतिलेखनं, द्वादशावर्तवन्दनकं, ततः शिष्यः क्षमाश्रमणं दत्वा भणति । "इच्छाकारेण तुब्भे अह्मं वायणादाणं तवाइ अणुन्नं दिसाय अणुन्नं अणुजाणह" गुरुः कथयति "अणुजाणामि" शेषं षट्क्षमाश्रमणदानादि गुरुवचनादि तथैव । ततो "वायणादाण तवाणुन्ना दिसाणुन्ना अणुजाणावणिअं करेमि काउस्सग्गं अन्नत्थ जाव अप्पाणं वो०" कायोत्सर्गः चतुर्विंशतिस्तवचिन्तनं मुखेन चतुर्विंशतिस्तवभणनं, ततो गुरुः शिष्यकर्णे वासक्षेपपूर्वकं वर्द्धमानविद्यां त्रिर्ददाति । सर्वावधिप्रभृतिमध्यगतलब्धिगतपदचतुष्टयं विहाय शिष्यः सम्यगवधारयति । ततो गुरुः शिष्यशिरसि वासक्षेपं कुर्वन् भणति "जाओसि वायणायरिओ वायणादाणं तवाणुन्नं दिसाणुन्नं विहिणा अणुज्जाणामि । ततः एकवेलं लघुनन्दीभणनं, नन्दीपठनान्ते गुरुर्भणति "इमं पुणं पट्ठवणं पडुच्च अमुगस्स साहुस्स वायणादाणाइ अणुन्ना नंदी पवट्टइ" इति भणन् शिष्यशिरसि गुरुर्वासान् क्षिपति । वासाभिमन्त्रणं वर्द्धमानविद्यया साधुसाध्व्यादिभ्यो वासदानम्, "अमुगो वायणायरिओ जाओत्ति" वदन्तः सर्वेपि गुरुणा सह वाचनाचार्यशिरसि वासक्षेपं कुर्वन्ति । ततो वाचनाचार्यो गुरुणा समं समवसरणं त्रिःप्रदक्षिणीकरोति । पुनः केवलं गुरुः त्रिः प्रदक्षिणी करोति । एककम्बलोपर्युपविष्टो वाचनाचार्यो देशनां करोति । ततः सर्वसङ्घप्रत्यक्षं गच्छप्रत्यक्षं

॥ १११ ॥

व्रतदानं नन्दीकरणं योगोद्वहनं वाचनादानं तपोविधानं दिगाद्यनुज्ञां श्राद्धानां व्रतारोपं आराधनां साधु-श्राद्धानां प्रतिष्ठाशान्तिकं पौष्टिकमनुजानाति । वाचनाचार्यादिपदस्थापनानन्तरं मन्त्राराधनार्थं गुरुः संभिन्नवलयं वर्द्धमानविद्यापटं वाचनाचार्याय ददाति । वाचनाचार्यः इच्छंति कृत्वा गृह्णाति । ततो वाचनाचार्यो गुरुं ज्येष्ठसाधूंश्च वन्दते ॥ इति वाचनाचार्यपदविधिः यथा राज्यस्थितौ राजा १ युव० २ मन्त्री ३ सेनापतिः ४ श्रेष्ठः श्राद्धाः महोत्सवं कुर्वन्ति । सामान्यसाधोर्मार्गणानुज्ञादानेप्ययमेव विधिः नवरं, गणमुख्यतादाने "वायणायरिओ जाओसि" इति गुरुवचनं नास्ति । नन्दीपठनं मन्त्रवर्द्धमानविद्यादानं पटदानं आसनदानं च नास्ति । गणोत्तमपदमपि गुरुगुणयुतस्य भवति ॥ इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायणे वाचनानुज्ञाकीर्त्तनो नाम त्रयोविंशतितम उदयः ॥ २३ ॥

चतुर्विंशतितम उदयः ।

अथोपाध्यायपदस्थापनविधिः ।

स यथा । आचार्यपदस्थापनविधिस्तथैव अयं किल विशेषः । उपाध्यायपदे अक्षमुष्टिवलयादि नास्ति, गुरुः

---

१ अयं पाठो मूलपुस्तके नास्ति ।

वन्दनकं च न ददाति, कालग्रहणविधिर्वृद्धनन्दीपाठश्च नावेहि जवारादि न, किन्तु त्रिर्लघुनन्दीपाठः चतुर्धीरवर्द्धमानविद्यापटदानं संपूर्णवर्द्धमानविद्योपदेशः इति क्रियते । साधुनामापि पुरातनमेव, शेषमाचार्यपदविधेरवसेयम् ॥ इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायणे उपाध्यायपदस्थापनकीर्त्तनो नाम चतुर्विंशतितम उदयः ॥ २४ ॥

पञ्चविंशतितम उदयः ।

अथाचार्यपदस्थापनविधिः ।

स यथा। "दीक्षायां स्थापनायां च शस्तं मूलं पुनर्वसू। स्वाती मैत्रं करः श्रोत्रं पौष्णं ब्राह्मयोत्तरात्रयम् ॥१॥" एतेषु नक्षत्रेषु लत्तादिसप्तदोषरहितेषु संवत्सरमासदिनलग्नशुद्धौ पदस्थापनं विधीयते । लग्ने ग्रहयुक्तिर्दीक्षावत् । संवत्सरमासदिननक्षत्रशुद्धिर्विवाहवत् । आचार्यपदयोग्यलक्षणं यथा—"षट्त्रिंशद्गुणसंयुक्तः सुरूपोऽखण्डितेन्द्रियः । अखण्डिताङ्गोपाङ्गश्च सर्वविद्याविशारदः ॥ १ ॥ कृतयोगो द्वादशाङ्गीपरिज्ञानसचेतनः । शूरो दयालुर्धीरश्च गम्भीरो मधुरस्वरः ॥ २ ॥ रम्यार्यदेशसंभूत आद्यवर्णत्रयोद्भवः । पक्षद्वयविशुद्धश्च

१ एवं च शूद्रान्त्ययोस्सत्सु चापि वैदुष्यादिषु नाचार्यपदप्राप्तिः । एतेन कुटुम्बिजट्टादिशूद्रशरीरसाधुभ्य आचार्यादिसर्वसंघबन्धपदारोपणेन संप्रदायं विस्मरन्तः प्रत्याख्याताः । अनुपदमेव निषेधं च वक्ष्यति ।

जितक्रोधो जितेन्द्रियः ॥ ३ ॥ विनीतो देशकालादिपरिज्ञाने कृतश्रमः । षड्दर्शनानां तत्वानि जानन् प्रमितिषट्कवित् ॥ ४ ॥ व्युत्पत्तिप्रतिभायुक्तस्तपःकार्ये सदा रतः । चोदना तद्विशेषज्ञो द्वासप्ततिकलायुतः ॥ ५ ॥ षड्भाषावित् सर्वदेशभाषाभाषणसंयुतः । चतुर्दशसु विद्यासु लौकिकासु विचक्षणः ॥ ६ ॥ सौम्यः क्षमावान् मन्त्रादि सर्वं जानन् सकारणम् । आवर्जकः सदाचारः कृतज्ञः प्राञ्जलाशयः ॥ ७ ॥ सलज्जो नीतिमान् योगमष्टाङ्गं प्रविशन् सदा । ईदृशो मुनिरुत्कृष्ट आचार्यपदमर्हति ॥ ८ ॥" तथागमे—"पडिरूवो तेयस्सी जुगप्पहाणागमो महुरवक्को । गंभीरो धीमंतो उवएसपरो अ आयरिओ ॥ ९ ॥" गुरुगुणाः पूर्वमेवोक्ताः। आचार्यपदायोग्यलक्षणं यथा—"पञ्चाचारविनिर्मुक्तः क्रूरः परुषभाषणः । कुरूपः खण्डिताङ्गश्च दुष्टदेशसमुद्भवः ॥ १ ॥ हीनजातिकुलो मानी निर्विद्यश्चाविशेषवित् । विकत्थनश्च सासूयो बाह्यदृष्टिश्चलेन्द्रियः ॥ २ ॥ जनद्वेष्यः कातरश्च निर्गुणो निष्कलः खलः इत्यादिदोषभाग् साधुर्नाचार्यपदमर्हति ॥३॥" तथा चोक्तमागमे—"हत्थे पाए कन्ने नासा उट्ठे विवज्जिया चेव । वामणगवडभखुज्जा पंगुलटुंटा य काणा य ॥ १ ॥ पच्छावि हुंति विगला आयरियत्तं न कप्पए । तेसिं सीसो ठावे अव्वो काणगमहिसोव नन्नम्मि ॥ २ ॥" इति आचार्यपदायोग्याः । वडभः क्षीणबलः, खुज्जा कुब्जः, इत्यमी आचार्यपदं नार्हन्ति । पूर्वोक्तगुणयुक्ते पात्रे आचार्यपदारोपणं, तस्यायं विधिः । पूर्वं वेदियवादिवापननिरुञ्छनमहोत्सवमहादानानिवारितभोजनदानामारि-

१ एतच्च यथासंभवं विहर्तव्यविषयभाषापरतया व्याख्येयंनो चेत्स्यादसंभवः ।

घोषणामार्गणतोषणादिकर्म श्राद्धैर्विधीयते । अयं लोकव्यवहारः, पदस्थापनानन्तरं च श्राद्धैः सगृहभोजनवाराः सङ्घार्चनादिकर्म विधीयते । एतत्कर्मद्वयं शोभानिमित्तं श्राद्धानां पुण्यवृद्ध्यर्थं च । मूलविधिस्त्वयं । तत्र लग्नदिनात् प्रथमे दिने सन्ध्यायां गुरुः सदशवस्त्रमयं आचारवेषं खड्गाङ्कितस्फुरमध्ये निधाय गणिविद्यया इति मन्त्रयेत् निशि संस्थापयेच्च । सर्वश्राद्धाश्च वेषसमीपे गीतवाद्यादिमहोत्सवैश्च जागरणं कुर्वन्ति । ततो लग्नदिने भविष्यदाचार्यः कृतलोचो ब्राह्मे मुहूर्ते काष्ठग्रहणं करोति स्वाध्यायं प्रस्थापयति च । अत्रत्यं करणीयं कर्म भगवतीप्रत्यक्षभाषितं पत्रान्तरे लिखितमस्ति । निषद्यास्थापनं सिंहासनेनैव पूर्यते । ततः आसन्ने लग्नावसरे प्रतिलेखितभूमौ कम्बलादि प्रतिलिख्य द्वे निषद्ये क्रियेते । ते च निषद्ये संघट्टा अक्षयोग्यं गुरुयोग्यं च स्थाप्येते । ततो गुरुरेकत्र निषद्यायां अक्षग्रन्थिं स्थापयति । द्वितीयनिषद्यायां स्वयमुपविशति । ततो भविष्यदाचार्यः चोलपट्टमुखवस्त्रिकारजोहरणमात्रधारी गुरोरग्रे क्षमाश्रमणपूर्वं भणति "भगवत्याभाइयकालं पवेएमि" गुरुः कथयति "पवेएहि" पुनः शिष्यः क्षमाश्रमणपूर्वं भणति "भगवत्याभाइयकालं पवेइअं" गुरुः कथयति "पवेइअं खमासमणाणं हत्थेणं सुत्तेणं अत्थेणं तदुभएणं गुरुगुणेहिं बुड्ढाहिं नित्थारगपारगो होहि" ततः शिष्यो गुर्वग्रे वन्दित्वा मुखवस्त्रिकां प्रतिलेखयति । ततो गुरुः शिष्यश्च द्वावपि स्थापनाचार्यपुरो द्वादशावर्तवन्दनं दत्वा, शिष्यः क्षमाश्रमणपूर्वं भणति "भगवन् सज्झायं पठवेमि" ततो गुरुशिष्यावपि स्वाध्यायं प्रस्थापयतः पूर्ववत् । ततो द्वावपि "सज्झायपट्ठवणत्थं करेमि काउस्सग्गं अन्नत्थ ऊ०

यावत् अप्पाणं वोसिरामि" कायोत्सर्गे नमस्कारं चिन्तयतः । ततो द्वावपि ऊर्ध्वीकृतभुजौ चतुर्विंशतिस्तवं पठित्वा धम्मो मंगलमारभ्य संयमे सुट्ठिअप्पाणं इतिपर्यन्तगाथासप्तदशकं मौनेन पठतः, पुनर्मुखवस्त्रिकां प्रतिलिख्य वन्दनं ददतः, पुनः क्षमाश्रमणपूर्वं स्वाध्यायं प्रवेदयतः, पुनर्मुखवस्त्रिकां प्रतिलिख्य वन्दनं ददतः, ततो गुरुः स्वनिषद्यायामुपविशति । शिष्यः शेषस्वाध्यायं विधिना प्रस्थापयति । ततश्चैत्ये विशुद्धपौषधागारे तीर्थे वा रम्यारामे वा समवसरणं संस्थापयेत् । भाव्याचार्यः समवसरणं प्रदक्षिणीकरोति त्रिः, गुरुश्च निषद्योपरिस्थितामक्षपोट्टलिकां सूरिमन्त्रेण श्रीखण्डकर्पूरादिभिर्गन्धैरभिमन्त्रयति । अक्षपोट्टलिकावलययन्त्रस्थापनाप्रतिष्ठाविधिः कल्पनाविधिश्च प्रतिष्ठाधिकारे कथयिष्यते । ततो गुरुः निषद्यात उत्थाय निषद्यां पुरस्कृत्य ऊर्ध्वीभवति । शिष्यः क्षमाश्रमणपूर्वं भणति "भगवन् इच्छाकारेण तुज्झे अम्हं दव्वगुणपज्जवेहिं अणुओग अणुजाणावणियं नंदि कड्ढावणिअं वासक्खेवं करेह चेइआइंतु वंदावेह" ततो गुरुः श्रीखण्डवासान् कर्पूरकस्तूरिकाकालागरुकुङ्कुमवासितान् सूरिमन्त्रेणाभिमन्त्रयति । वासाभिमन्त्रेण मुद्राः षोडश । परमेष्ठिमुद्रा १ कामधेनुमुद्रा २ गरुडमुद्रा ३ आरात्रिकमुद्रा ४ सौभाग्यमुद्रा ५ गणधरमुद्रा ६ अञ्जलिमुद्रा ७ मुक्ताशुक्तिमुद्रा ८ यथाजातमुद्रा ९ वज्रमुद्रा १० मुद्गरमुद्रा ११ योनिमुद्रा १२ स्नानमुद्रा १३ छत्रमुद्रा १४ समाधानमुद्रा १५ कल्पवृक्षमुद्रा १६ इति मुद्रादिभिः सूरिमन्त्रेण वासानभिमन्त्र्य भाव्याचार्यशिरसि क्षिपेत् । ततो गुरुशिष्यौ दक्षिणवामस्थौ वर्द्धमानस्तुतिभिश्चैत्यवन्दनं कुरुतः । ततः श्रुत १ शान्ति २ क्षेत्र ३ भुवन ४

शासन ५ वैयावृत्यकर ६ देवतास्तुतयः पूर्ववत्तथैव । ततः शक्रस्तवभणनपूर्वमर्हणादिस्तोत्रभणनम्, जयवीयरायगाथाकथनम्, ततः शिष्यो मुखवस्त्रिकां प्रतिलिख्य द्वादशावर्तवन्दनं ददाति । ततो द्वावपि कायोत्सर्गं कुरुतः, "अणुओगपट्ठावणनिमित्तं करेमि काउस्सग्गं अन्नत्थ उ० यावदप्पाणं वोसिरामि" चतुर्विंशतिस्तवचिन्तनं मुखेन चतुर्विंशतिस्तवभणनं, तत ऊर्ध्वस्थ एव सूरिर्भविष्यत्सूरिर्वा गीतार्थः कृतयोगोन्यो यतिर्वा नमस्कारत्रयं पठित्वा मुखपाठेन वा पुस्तकाधारेण वा सप्तशतीं नन्दीं पठति । भाव्याचार्यो मुखवस्त्रिकाच्छन्नमुख एकचित्तः शृणोति । नन्दीसमाप्तौ गन्धाभिमन्त्रणं, गन्धानां तीर्थंकरपादस्पर्शनं, चतुर्विधसङ्घस्य गन्धाक्षतदानं, ततः शिष्यः क्षमाश्रमणपूर्वं भणति "इच्छाकारेण तुज्झे अह्मं अणुओगं अणुजाणह" गुरुर्भणति "अहं एयस्स दव्वगुणपज्जवेहिं खमासमणाणं हत्थेणं अणुओगं अणुजाणामि" पुनः शिष्यः क्षमाश्रमणपूर्वं भणति "संदिसह किं भणामि" गुरुर्भणति "वंदित्तापवेयया" पुनः शिष्यः क्षमाश्रमणपूर्वं भणति "तुम्भे अह्मं अणुओगो अणुन्नाओ इच्छामि अणुसिट्ठं" गुरुर्भणति "सम्मं अवधारय अन्नेसिं च प्रवेअय" पुनः शिष्यः क्षमाश्रमणपूर्वं भणति "तुम्हाणं पवेइयं संदिसह साहूणं पवेएमि" गुरुः कथयति "खमासमणाणं हत्थेणं सुत्तेणं अत्थेणं तदुभएणं गुरुगुणेहिं वुड्ढाहि नित्थारगपारगो होइ" ततो लघुसूरिः समवसरणं सूरिं च त्रिः प्रदक्षिणयति । ततः शिष्यः कायोत्सर्गं करोति "अणुओग अणुजाणावणियत्थं करेमि काउस्सग्गं अन्नत्थ ऊ० यावदप्पाणं वो०" कायोत्सर्गे चतुर्विंशतिस्तवचिन्तनं मुखे च भणनं, पुनर्ले-

घुसूरिः समवसरणं गुरुं च त्रिः प्रदक्षिणयति । एवं क्षमाश्रमणकायोत्सर्गप्रदक्षिणाकर्म त्रिवेलं कुर्यात् । ततो लघुसूरिः गुरोर्दक्षिणभुजासन्ने नवकल्पितायां निषद्यायां निषीदति । ततः प्राप्तायां लग्नवेलायां गुरुः लघुसूरेर्दक्षिणकर्णं गन्धाक्षतपुष्पैः संपूज्य गुरुपरम्परागतं सकलर्द्धिसिद्धिदायकं नित्यं चिन्तामणिकल्पद्रुमाधिकप्रभावं सूरिमन्त्रं त्रिवेलं तत्कर्णे कथयति । अक्षपोट्टलिकां च गन्धाक्षतैः समं तत्करे ददाति । शिष्योप्यवहितो मन्त्रमक्षपोट्टलिकां च गन्धाक्षतैः परमास्तिक्यशाली गृह्णाति । गुरुस्तस्य निजनामाविरोधि सप्तकशुद्धं गुरुपरम्परागतं वा दैवतोपदिष्टं वा नाम कुर्यात् । ततः सङ्घो वासान् क्षिपति, ततो गुरुः स्वनिषद्यात उत्तिष्ठति, तत्र शिष्य उपविशति, गुरुरपि सर्वसाधुसहितः मुखवस्त्रिकां प्रतिलिख्य नव्याचार्यपदयोर्वन्दनं ददाति । पुनर्नव्याचार्योपि निषद्यासीनस्य गुरोस्तथैव वन्दनं ददाति । तुल्यगुणख्यापनार्थं द्वयोरपि न दोषः । ततो गुरुर्नव्याचार्यस्य जीव इति कथयित्वा "वक्खाणं करेहि" इति कथयति । नव्याचार्योपि स्वविद्यानुरूपं च नन्द्यादिव्याख्यानं करोति । व्याख्यानानन्तरं साधवः साध्व्यः श्रावकः श्राविकाश्च वन्दनं ददति । ततो नव्याचार्यो गुरुनिषद्यात उत्थाय स्वनिषद्यामधितिष्ठति । गुरुर्मूलनिषद्यायामुपविश्य नव्याचार्यस्योपबृंहणं करोति । यथा—"धन्यस्त्वं येन विज्ञातः संसारगिरिदारकः । वज्रवद्दुर्भिदश्चायं महाभाग जिनागमः ॥ १ ॥ इदं चारोपितं यत्ते पदं सत्संपदां पदम् । अत्युत्तममिदं लोके महासत्वनिषेवितम् ॥ २ ॥ धन्येभ्यो दीयते तात धन्या एवास्य पारगाः । गत्वास्य पारं ते धन्याः पारं गच्छन्ति संसृतेः ॥ ३ ॥ भीतं संसार-

कान्ताराात् समर्थस्य विमोचने । साधुवृन्दमिदं सर्वं भवतश्शरणागतम् ॥ ४ ॥ संप्राप्य गुणसंदोहं निर्मलं परमेश्वरम् । त्राणं संसारभीतानां धन्याः कुर्वन्ति देहिनाम् ॥ ५ ॥ तदेते भावरोगार्तास्त्वं च भावभिषग्वरः । अतस्त्वयामी सज्जीवा मोचनीयाः प्रयत्नतः ॥ ६ ॥ गुरुश्च मोचयत्येतानप्रमत्तो हितोद्यतः । बद्धलक्षो दृढं मोक्षे निःस्पृहो भव चारके ॥ ७ ॥ कल्पोयमिति कृत्वा त्वमीदृशोपि प्रणोदितः । निजावस्थानुरूपं हि चेष्टितव्यं सदा त्वया ॥ ८ ॥” अथ शिष्यशिक्षणम् “युष्माभिरपि नैवैष सुस्थबोहित्थसन्निभः । संसारसागरोत्तारी विमोक्तव्यः कदाचन ॥ ९ ॥ प्रतिकूलं न कर्तव्यमनुकूलरतैः सदा । भाव्यमस्य गृहत्यागो येन वः सफलो भवेत् ॥ १० ॥ अन्यथा जन्तुबन्धूनामाज्ञालोपः कृतो भवेत् । ततो विडम्बना शेषा भवेदत्र परत्र च ॥ ११ ॥ ततः कुलवधून्यायात् कार्ये निर्भर्त्सितैरपि । यावज्जीवं न मोक्तव्यं पादमूलममुष्य भोः ॥ १२ ॥ ते ज्ञानभाजनं धन्यास्ते सद्दर्शननिर्मलाः । ते निष्प्रकम्पचारित्रा ये सदा गुरुसेविनः ॥ १३ ॥ धन्नोसि तुमं नायं जिणवयणं जेण सव्वदुक्खहरं । ता संममिमं भवया पउंजियव्वं सया कालं ॥ १ ॥ इह गउरिणं च परमं असंमजोगो य जोगओ अवरो । तात ह इह जअइव्वं जह एत्तो केवलं होइ ॥ २ ॥ परमो य एस हेऊ केवलनाणस्स अन्नपाणीणं । मोहावणयणओ तह संवेगाईसभावेणं ॥ ३ ॥ उत्तम मियं पयं जिणवरेहिं लोगुत्तमेहिं पन्नत्तं । उत्तमफलसंजणयं उत्तमजणसेविअं लोए ॥ ४ ॥ धन्नाणनिवेसिज्जाइ धन्ना गच्छंति पारमेयस्स । गंतुं इमस्स पारं पारं वचंति दुक्खाणं ॥ ५ ॥

भयभीयाण दुहं ताणं जो कुणइ सो धन्नो ॥ ६ ॥ अन्नाण वाहिगहिया जइवि न सम्मं इहा उरा हुंति । तहवि पुण भाववेज्जा तेसिं अवणेंति तं वाहिं ॥ ७ ॥ ता तंसि भाववेज्जो भवदुक्खनिवीडिया तुहं एए । हंदि सरणं पवन्ना मो एयव्वा पयत्तेणं ॥ ८ ॥ मोएइ अप्पमत्तो परहिअकरणंमि निच्चमुज्जुत्तो । भवसोक्खा-पडिबद्धो पडिबद्धो मोक्खसोक्खम्मि ॥ ९ ॥ ता एरिसो चिय तुमं तहवि अभणिओसि समयनीईए । निय-यावत्थासरिसं भवया निच्चंपि कायव्वं ॥ १० ॥" अथ शिष्यशिक्षादानम् "तुब्भेहिंपि न एसो संसाराड-विमहाकडिल्लंमि । सिद्धिपुरसत्थवाहो जत्तेण खणंपि मोत्तव्वो ॥ ११ ॥ नयपडिकूले अव्वं वयणं एयस्स नाणरासिस्स । एवं गिहवासचाओ जंसफलो होइ तुम्हाणं ॥ १२ ॥ इहरा परमगुरूणं आणाभंगो निसे-विओ होइ । विहला य हुंति तम्मी नियमा इहलोअ परलोअ ॥ १३ ॥ ता कुलवहुनाएणं कज्जे निब्भच्छि-एहिवि कहिंचि । एअस्स पायमूलं आमरणं तं न मोत्तव्वं ॥ १४ ॥ नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य । धन्ना आवकहाए गुरुकुलवासं न मुंचंति ॥ १५ ॥ एवं चिय वयणीणं अणुसट्ठिं कुणइ एत्थ आयरिओ । तह अज्ज चंदणमिगा वईण साहेइ परमगुणे ॥ १६ ॥" ततः उपबृंहणानन्तरं साधवः सूरेः पुस्त-कोपकरणाद्युपदां कुर्वन्ति । श्रावकाश्च दशाहं सङ्घपूजादि महोत्सवं कुर्वन्ति, अष्टाह्निकायात्रादि च । गुरु-श्चोपबृंहणां कृत्वा शेषशिष्याणां तदुपासनविनयानुशास्तिं करोति । तत उभावपि कायोत्सर्गं कुरुतः "अणु-ओग विसज्जणत्थं करेमि काउस्सग्गं अन्नत्थ ऊ० यावदप्पाणं वोसिरामि" चतुर्विंशतिस्तवचिन्तनं पार-

यित्वा मुखेन च चतुर्विंशतिस्तवभणनं "कालस्स पडिक्कमणत्थं यावद्प्पाणं वोसिरामि" चतुर्विंशतिस्तव-चिन्तनं पारयित्वा मुखेन च चतुर्विंशतिस्तवभणनं। ततो नव्याचार्यः क्षमाश्रमणपूर्वं भणति "भगवन् अणुओग अणुजाणावणिअं निरुद्धं करावेह" ततो गुरुराचाम्लप्रत्याख्यानं कारयति। अत्र नव्यसूरेः कङ्कणबन्धमुद्रिकादिपरिधापनं लोकाचारं पूर्वमेव क्रियते॥ इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायणे आचार्यपदस्थापनाकीर्तनो नाम पञ्चविंशतितम उदयः॥ २५॥

षड्विंशतितम उदयः।

अथ यतीनां द्वादशप्रतिमोद्वहनविधिः।

तत्र च यतिप्रतिमा द्वादश, ताश्च दुःषमाकाले दुष्कराः सेवार्तसंहननवशात्, धैर्यबलपरीषहसहनाभावाच्च। तथापि श्रीआर्यमहागिरेर्जिनकल्पतुलनान्यायेन कश्चनापि धृतिमान् धीरो मुनिः कियतीरपि प्रतिमाः साधयति, तदर्थं तद्विधिरभिधीयते। ताश्च प्रतिमा द्वादश यथा—"मासाइ सतंता पढमा दुतइय सत्तरा इंदी। अहराई इगराई भिक्खूपडिमाण बारसगं॥ १॥" एकमासिकी १ द्वैमासिकी २ त्रैमासिकी ३ चातुर्मासिकी ४ पाञ्चमासिकी ५ षाण्मासिकी ६ साप्तमासिकी ७ पुनः साप्तरात्रिकी ८ साप्तरात्रिकी ९ पुनः साप्तरात्रिकी १० अहोरात्रिकी ११ एकरात्रिकी १२ चेति द्वादशयतिप्रतिमाः। प्रतिमोद्वहनयोग्यमुनिलक्षणं

यथा—"संपूर्णविद्यो धृतिमान् वज्रसंहननं वहन् सत्त्वो जिनमते सम्यग् ज्ञाता स्थिराशयः ॥ १ ॥ गुर्वनुज्ञां वहन् चित्ते श्रुताभिगमतत्त्ववित् । निसृष्टदेहा धीरश्च जिनकल्पार्हशक्तिभाक् ॥ २ ॥ परीषहसहो दान्तो गच्छेपि ममतां त्यजन् । दोषधातुप्रकोपेपि न वहन् रागसंभवम् ॥ ३ ॥ अभ्यञ्जनं रसत्यक्तं पानान्नं क्वापि कल्पयन् । ईदृशोर्हति शुद्धात्मा प्रतिमोद्वहनं मुनिः ॥ ४ ॥" प्रतिमोद्वहनविधिर्यथा—"सर्वगच्छपरित्यागो निर्ममत्वं च साधुषु । पुस्तकेषु च पात्रेषु वस्त्रेषु वसतावपि ॥ ५ ॥ रसोज्झितस्य भक्तस्य ग्रहणं वनवासिता । अक्षोभो वज्रपातेपि निर्भयत्वं हरावपि ॥ ६ ॥ अलोभो निजदेहेपि सुखित्वं यातनास्वपि । शीतेऽप्रकम्पो माघेपि तापेऽतापो तपेऽपिहि ॥ ७ ॥ तृड्ढ्रमेपि नैर्मूच्छ्यं नैष्क्रोधं देहतक्षके । अविस्मयत्वं सर्वत्र चक्रिशक्रर्द्धिदर्शने ॥ ८ ॥ हास्यादिषट्कत्यागश्च सर्वभावेष्वलोभता । इत्यादि चर्या सर्वत्र प्रतिमोद्वहने मता ॥ ९ ॥" इति सर्वप्रतिमोद्वहनचर्या । "मृदुध्रुवचरक्षिप्रैर्वारैर्भौमं शनिं विना । आद्याटनतपोनन्द्यालोचनादिषु भं शुभम् ॥ १ ॥" ईदृशे चन्द्रबले प्रतिमारम्भः । सर्वासु प्रतिमासु एषैव चर्या, प्रथमा प्रतिमा एकमासिकी सा चैकमासं वोढव्या, अरण्ये स्थितः साधुरेकमासं सदाकायोत्सर्गकारी न किञ्चित् चिन्तयन् प्रतिमां पालयति । तत्राहार एकदत्त्या, एकैव दत्तिः पानस्य भोजनस्य वा, कदाचित् पानस्य कदाचिद्भोजनस्य, कदाचिद्दत्तियुक्त्या लब्धेन पानेन दिनमतिवाहयति । कदाचिद्भोजनेन दत्तियुक्तिलब्धेन आस्वादमात्रेण, द्वयोरलाभे संतोष एव । इति एकमासिकी प्रतिमा प्रथमा १ द्वितीया द्वैमासिकी अनयैव युक्त्या, तत्र द्वे दत्ती,

एका पानस्य द्वितीया भोजनस्य २ तृतीया त्रैमासिकी तथैव, तत्र तिस्रो दत्तयः, द्वे भोजनस्य एका पानस्य, अथवा द्वे पानस्य एका भोजनस्य, मासत्रयमेव ३ चतुर्थी चातुर्मासिकी, मासचतुष्टयमित्थमेव, तत्र चतस्रो दत्तयः, द्वे पानस्य द्वे भोजनस्य ४ पञ्चमी प्रतिमा पाञ्चमासिकी, पञ्चमासान् यावत्तथैव, तत्र पञ्च दत्तयः, तिस्रो भोजनस्य द्वे पानकस्य, अथवा द्वे भोजनस्य तिस्रः पानकस्य ५ षष्ठी प्रतिमा षाण्मासिकी षण्मासान् यावत्तथैव, तत्र षड् दत्तयः, तिस्रो भोजनस्य तिस्रः पानस्य ६ सप्तमी प्रतिमा साप्तमासिकी, सप्तमासान् यावत्तथैव, तत्र सप्त दत्तयः, चतस्रो भोजनस्य तिस्रः पानस्य, अथवा चतस्रः पानस्य तिस्रो भोजनस्य ७ एतासु सप्तस्वपि प्रतिमासु उक्तदत्तीनां न्यूनं ग्रहणं विधेयं, न प्राणान्तेऽप्यधिकदत्तिग्रहणम् । उक्तदत्तीनामलाभे संतोष एव इति सप्त प्रतिमाः, तत्र अष्टमी प्रतिमा सप्ताहोरात्राणि पूर्वमेकभक्तं, प्रथमदिने द्वितीयदिने अपानकोपवासः, तृतीये एकभक्तं, चतुर्थे अपानकोपवासः, पञ्चमे एकभक्तं, षष्ठे अपानकोपवासः, सप्तमे एकभक्तम्, इति चतुर्थत्रयतपसा समाप्यते । तत्रैकभक्तेषूज्झितभिक्षाग्रहणं, सप्ताहोरात्रं सर्वपरीषहोपसर्गसहः कायोत्सर्गोत्तानासनस्थो निष्प्रकम्पो गमयेत् । भिक्षाग्रहणवर्जितं सदैव प्रतिमासु कायोत्सर्गसंलीनतायुतउत्कासनकारी तिष्ठेत् इत्यष्टमी प्रतिमा ८ नवमी प्रतिमापि सप्ताहोरात्राणि, तत्र तपश्चरणमष्टमीप्रतिमावत् तत्र सप्ताहोरात्रमुत्कटिकासनदण्डासनयुतस्तिष्ठेत् इति नवमी ९ । दशमी प्रतिमा सप्ताहोरात्राणि, तपोऽष्टमीप्रतिमावत्परा, तत्र सदैव गोदोहिकासनवीरासनकुब्जकासनस्थितिः इति दशमी १० एका-

दशी प्रतिमा अहोरात्रिकी तत्र पानवर्जितमुपवासद्वयं व्याघ्राश्रितपाणिपादस्थितिः इत्येकादशी ११ द्वादशी प्रतिमैकरात्रिकी, तत्र पानवर्जितमुपवासत्रयं, तत्र निर्निमेषनयनो व्याघ्राश्रितपाणिपादस्तिष्ठेत् १२ इति यतिप्रतिमाद्वादशकम् । सर्वास्वपि प्रतिमासु सर्वगच्छपरित्याग इत्यादिचर्या सर्वप्रतिमासु सदृशी, भिन्नभिन्नोक्ताः प्रत्येकं प्रतिमासु तथैव चर्या विधेयाः । "द्रव्यक्षेत्रकालभावान् दृष्ट्वा मुनिरनामयः । प्रतिमां पूर्वसमये करोतिस्म नचाधुना ॥ १ ॥" द्वादशास्वपि यतिप्रतिमासु सर्वदिनसंख्या मास २८ दिन २६ तत्र तपः संख्यादत्ति ८४० उपवास २६ एकभक्त २८ ॥ इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायणे प्रतिमोद्वहनकीर्तनो नाम षड्विंशतितम उदयः ॥ २६ ॥

---

१ एकैकांभोजनेपाने दत्तिं गृह्णात्यसौमुनिः यावन्मासंतत्रपूर्णे मासेगच्छेविशेत्पुनः १ एवंसदत्तेर्मासस्य वृद्धिमेकैकशोकरोत् तावद्यावद्दिवंससमासैरजनिसप्तमी २ एकांतरोपवासैश्च विहितावाम्लपारणैः पानाहारोगितेर्ग्रामा–द्बहिरुत्तानशायिना ३ निःप्रकंपेनसर्वेपि सर्गवर्गसहिष्णुना अष्टमीप्रतिमासप्ता–होरात्रैर्विदधेमुना ४ युग्मं इत्थंनिष्ठागरिष्ठेन प्रतिमासप्तमिर्दिनैः उत्कविकासनस्थेन तेनतेनेनवम्यपि ५ एवंसप्तदिनैरेव दशमीप्रतिमामुना चक्रेवीरासनस्थेन सद्ध्यानस्थिरचेतसा ६ कृत्वाषष्ठमहोरात्र उवलंबितपाणिना स्थित्वावीरासनेचक्रे प्रतिमैकादशीशुभा ७ कृत्वाष्टममसंकोच्य पादौलंबकरःस्थिरः वक्रेमुक्तिशिलादृष्टि र्द्वादशीमेकरात्रिकी ८ द्वादशी–प्रतिमैकरात्रे इति पुस्तकान्तरेऽधिकः पाठः ।

सप्तविंशतितम उदयः ।

अथ व्रतिनीव्रतदानविधिः ।

तत्र विंशतिः स्त्रियो व्रतं नार्हन्ति, तासु अष्टादशभिर्दोषैर्यैः पुरुषा व्रतं नार्हन्ति त एव दोषाः अष्टादश गुर्विणी बालवत्सा चेति स्त्रीणां व्रतोपघातकरा दोषा विंशतिः, विंशतिदोषवर्जितां स्त्रियं दीक्षयेत् । कुमारीं वा भुक्तभोगां विरक्तां वा यथायोगेन पतिपुत्रपितृबन्धुभिरनुज्ञातां स्त्रियं दीक्षमाणस्य गुरोः संयमान्यवच्छेदः साधुवादश्च । यदुक्तमागमे—"पुरिसो अणणुन्नाओ अम्मापि अराइएहिं नियसत्ते । इच्छाओ दिक्खग्गहणं पुरिसाणं न परतंतत्तं ॥ १ ॥ इत्थी पुण परतंता अणणुन्नाया पियापईहिंपि । पुन्नाइ अणाएसा न जुग्गा दिक्खगहणंमि ॥ २ ॥" इति सर्वानुमतायाः स्त्रिया व्रतदानं कार्यम् । तस्य च विधिः । सर्वोऽपि मुनिव्रतदानसदृश एव नवरम् । उपनयनं शिखासूत्रापनयनं गुरुकरेण वेषदानं नास्ति । वेषदानमन्यव्रतिनीकरेण, शेषं यतिव्रतदानवत् ॥ इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायणे व्रतिनीव्रतदानकीर्तनो नाम सप्तविंशतितम उदयः ॥ २७ ॥

अष्टाविंशतितम उदयः ।

अथ प्रवर्तिनीपदस्थापनाविधिः ।

इह केचित् प्रवर्तिनीपदं महत्तरापदमेकाभिधानमेव भाषन्ते। केचिच्च पृथक् । अस्माभिश्च सर्वगच्छाचार्योपाध्यायसम्मततया पृथगेव उच्यते । तत्र प्रवर्तिनीपदार्हा व्रतिनी यथा—"जितेन्द्रिया विनीता च कृतयोगा धृतागमा । प्रियंवदा प्राञ्जला च दयार्द्रीकृतमानसा ॥ १ ॥ धर्मोपदेशनिरता सस्नेहा गुरुगच्छयोः । शान्ता विशुद्धशीला च क्षमावत्यतिनिर्मला ॥ २ ॥ निःसङ्गा लिखनाद्येषु कार्येषु सततोद्यता । धर्मध्वजाद्युपधिषु करणीयेषु सत्तमा ॥ ३ ॥ विशुद्धकुलसंभूता सदा स्वाध्यायकारिणी । प्रवर्तिनीपदं सा तु व्रतिनी ध्रुवमर्हति ॥ ४ ॥ इति प्रवर्तिनीपदयोग्यव्रतिनीलक्षणम् ॥ प्रवर्तिनीपदस्थापनाविधिरभिधीयते । यथोक्तगुणयुक्ताया व्रतिन्याः कृतलोचायाः कृतप्रासुकस्तोकजलस्नानायाः श्राद्धजनकृतेन महता महोत्सवेन प्रवर्तिनीपदग्रहणं विधीयते। तत्र समवसरणस्थापनं प्रवर्तिनी पूर्ववत् त्रिः समवसरणं प्रदक्षिणयेत् । ततः सदशवेषरजोहरणमुखवस्त्रिकाधारिणी क्षमाश्रमणपूर्वं निषद्यासीनस्य गुरोर्भणति "इच्छाकारेण तुज्झे अम्हं पवतिणीपयारोवणियं नंदिकड्ढावणियं वासक्खेवं करेह चेइ आइं च वंदावेह" ततो गुरुर्वर्द्धमानविद्याभिमन्त्रितवासैर्वासक्षेपं करोति। ततो गुरुप्रवर्तिन्यौ वर्द्धमानाभिः स्तुतिभिश्चैत्यवन्दनं कुरुतः । श्रुतशान्तिक्षेत्रादि-

देवताकायोत्सर्गस्तुतिकथनानि पूर्ववत् । ततः "पवत्तिणीपयारोवणियं करेमि काउस्सग्गं अन्नत्थ ऊ० यावद्
दप्पाणं वो०" कायोत्सर्गश्चतुर्विंशतिस्तवचिन्तनं चतुर्विंशतिस्तवभणनं । ततः प्रवर्तिनी मुखवस्त्रिकां प्रतिलिख्य द्वादशावर्तवन्दनं ददाति, ततः क्षमाश्रमणपूर्वं भणति "इच्छाकारेण तुज्झे अम्हं गच्छसाहुसाहुणीपवत्तणं अणुजाणह" गुरुः कथयति "अणुजाणामि" ततः षट्क्षमाश्रमणयुक्तिर्गुरुवचनयुक्तिश्च पूर्ववत् । ततः संप्राप्तायामाचार्यपदोचितायां लग्नवेलायां गुरुः प्रवर्तिन्या दक्षिणकर्णे गन्धपुष्पाक्षतैः संपूज्य त्रिः षोडशाक्षरीं परमेष्ठिविद्यां दद्यात् । संपूजनार्थमष्टादशवलयं परमेष्ठिमन्त्रचक्रपटं च दद्यात् । तत एकवेलं लघुनन्दीपाठः, चतुर्विधसङ्घस्य वासदानं, सर्वेपि तच्छिरसि वासाक्षतान्निक्षिपन्ति । ततो गुरुर्द्विगुणपादप्रोञ्छनोपविष्टायास्तस्या अनुज्ञां ददाति । यथा—"व्रतिनीवाचनादानं साध्वीनां च प्रवर्तनम् । धर्मव्याख्यापि सततं साधूनामुपधिक्रिया ॥ १ ॥ उपधिग्रहणं चैव साधुसाध्व्योश्च शिक्षणम् । श्राद्धश्राद्ध्योस्तपोनुज्ञा कार्या वत्से सदा त्वया ॥ २ ॥" इति प्रवर्तिन्यां गुर्वाज्ञाः । अथ निषेधाः—व्रतिन्या व्रतदानं च वन्दनकादिदापनम् । कम्बलाद्युपवेशश्च व्रतानुज्ञा तथैव च ॥ १ ॥ इत्यादि वर्जनीयं तु वत्से विनतया त्वया । गुरोर्महत्तरायाश्च लङ्घनीयं च वो नहि ॥ २ ॥" ततः साध्व्यः श्रावकश्राविकास्तां वन्दन्ते श्राविका वन्दनकं न ददति ॥ इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायणे प्रवर्तिनीपदस्थापनाकीर्तनो नाम अष्टाविंशतितम उदयः ॥ २८ ॥

एकोनत्रिंशत्तम उदयः ।

अथ महत्तरापदस्थापनाविधिरभिधीयते ।

महत्तरापदानर्हा यथा—“कुरूपा खण्डिताङ्गी च हीनान्वयसमुद्भवा । मूढा दुष्टा दुराचारा सरोगा कटुभाषिणी ॥ १ ॥ सर्वकार्येष्वनभिज्ञा कुमुहूर्तोद्भवा तथा । कुलक्षणाचारहीना युज्यते न महत्तरा ॥ २ ॥” महत्तरापदार्हा यथा—“सिद्धान्तपारगा शान्ता कृतयोगोत्तमान्वया । चतुःषष्टिकलाज्ञात्री सर्वविद्याविशारदा ॥ १ ॥ प्रमाणादिलक्षणादिशास्त्रज्ञा मञ्जुभाषिणी । उदारा शुद्धशीला च पञ्चेन्द्रियजये रता ॥ २ ॥ धर्मव्याख्याननिपुणा लब्धियुक्ता प्रबोधकृत् । समस्तोपधिसंदर्भकृताभ्यासातिधैर्ययुक् ॥ ३ ॥ दयापरा सदानन्दा तत्त्वज्ञा बुद्धिशालिनी । गच्छानुरागिणी नीतिनिपुणा गुणभूषणा ॥ ४ ॥ सबला च विहारादौ पञ्चाचारपरायणा । महत्तरापदार्हा स्यादीदृशी व्रतिनी ध्रुवम् ॥ ५ ॥” इति महत्तरापदार्हा लक्षणम् । तत्र तिथिवारर्क्षलग्नप्रभृति आचार्यपदस्थापनायोग्यम्, अमारिघोषणावेदियवारादिनिरुञ्छनप्रभृति श्राद्धैर्व्यवहारार्थं विधीयते, सङ्घपूजादिमहोत्सवः सर्वोऽप्याचार्यपदवत् तथा प्रवर्तिनीपदयोग्या व्रतिनी कृतलोचा लग्नदिने प्राभातिककालग्रहणं स्वाध्यायप्रस्थापनं च कुर्यात् । ततो व्रतिनी चैत्ये धर्मागारे वा समवसरणं त्रिः प्रदक्षिणयेत् । ततो व्रतिनी गुरोः पुरः क्षमाश्रमणपूर्वं भणति “भगवन् इच्छाकारेण तुज्झे अम्हं पुव्वअज्जा चंदण-

आइ निसेविअ महत्तरापयस्स अणुजाणावणिअं नंदिकड्ढावणिअं वासक्खेवं करेह चेइआइं च वंदावेह" ततो गुरुशिष्ये वर्द्धमानस्तुतिभिश्चैत्यवन्दनं कुरुतः । महत्तरा गुरोः वामपार्श्वे तिष्ठति । श्रुतशान्त्यादिकायोत्सर्गस्तुतिपठनं पूर्ववत्, पुनः शक्रस्तवपठनं, अर्हणादिस्तोत्रभणनं ततो "महत्तरापय अणुजाणावणिअं करेमि काउस्सग्गं अन्नत्थऊ० यावदप्पाणं वो० चतुर्विंशतिस्तवचिन्तनं चतुर्विंशतिस्तवपठनं इति गुरुमहत्तरे कुरुतः । ततो गुरुरूर्ध्वसंस्थितो नमस्कारत्रयभणनपूर्वं लघुनन्दीं पठति, तत्पठनानन्तरं "इमं पुण पट्ठवणं पडुच्च अमुगाए महत्तरापयस्स अणुन्ना नंदी पवट्टइ" गुरुरित्युक्त्वा महत्तराशिरसि वासान् क्षिपति । ततो गुरुरुपविश्य गन्धाभिमन्त्रणं मुद्रापञ्चकेन परमेष्ठि १ सौभाग्य २ गरुड ३ मुद्गर ४ कामधेनु ५ मुद्रारूपेण करोति । सङ्घादेरपि वासदानं करोति । ततो महत्तरा क्षमाश्रमणपूर्वं भणति "इच्छाकारेण तुज्झे अम्हं महत्तराणयं अणुजाणह" गुरुः कथयति "अणुजाणामि" ततः षट् क्षमाश्रमणगुरुवाक्यादि पूर्ववत् नवरं । पञ्चमक्षमाश्रमणान्ते महत्तरा समवसरणं त्रिः प्रदक्षिणयेत् । ततः षष्ठं क्षमाश्रमणं दत्त्वा "तुम्हाणं पवेइअं संदिसह साहूणं पवेएमि संदिसह काउस्सग्गं करेमि महत्तरापयं अणुजाणावणिअं करेमि काउस्सग्गं अन्नत्थ ऊ० यावदप्पाणं वोसिरामि" चतुर्विंशतिस्तवचिन्तनं चतुर्विंशतिस्तवभणनं च करोति, ततः प्राप्तायां लग्नवेलायां गुरुः महत्तरां स्कन्धकम्बलोपरि निवेशयति निषद्यां च तत्करे ददाति । ततस्तत्काललग्नवेलायां गुरुः महत्तरादक्षिणकर्णे गन्धपुष्पाक्षतैः संपूज्य गुरुपरम्परागतां पूर्णां वर्धमानविद्यां त्रिः पठति, चतुर्वारं

वर्द्धमानविद्यापटं च पूजार्थं ददाति, नामकरणं च अमुकश्रीरिति श्रीवर्णान्तं करोति । ततः आर्यचन्दनामृगावतीसदृशी भवेति आशास्य अनुशास्तिं ददाति । अनुशास्तिर्यथा—"व्रतिनीव्रतदानं च व्रतानुज्ञा च गेहिनाम् । साधुसाध्व्यनुशास्तिस्तु श्राद्धीवन्दनदापनम् ॥ १ ॥ इत्यादि कर्म वत्से त्वं कुर्याः काले यथाविधि । व्रतिनां व्रतदानं च प्रतिष्ठां च विवर्जयेः ॥ २ ॥" इति गुरुभिरनुशासिता महत्तरा वन्दनकं दत्त्वा निरुद्धमाचाम्लं गुरुसकाशाद् गृह्णाति । साध्वीश्रावकश्राविकाजनस्तां वन्दते, श्राविकाश्च द्वादशावर्तिवन्दनं ददति । महत्तरा धर्मव्याख्यानं करोति । अन्यगच्छेषु सर्वेषु पूर्वावस्थादीक्षिता व्रतिन्यो महत्तरापदमाप्नुवन्ति । अस्मद्गच्छे तु कौमार्यदीक्षितैव महत्तरा भवति । महत्तरा व्रतिन्याः प्रवर्तिनीपदं ददाति न महत्तरापदं । प्रवर्तिनीपदे स्कन्दकम्बलिकासनवर्द्धमानविद्यापटदानवर्जितोऽयमेव विधिः पूर्वोदये कथितः ॥ इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायणे महत्तरापदस्थापनकीर्तनो नाम एकोनत्रिंशत्तम उदयः ॥ २९ ॥

त्रिंशत्तम उदयः ।

अथ अहोरात्रचर्याविधिः ।

अथाहोरात्रचर्या व्रतिनो व्रतिन्याः, सा च व्रतिनां व्रतिनीनां चाहोरात्रिकी चर्या न धर्मोपकरणैर्विना

भवति । तदर्थमुपकरणानां संख्याः प्रमाणयुक्तयः कथ्यन्ते । ततो जिनकल्पिनां स्थविरकल्पिनां व्रतिनीनां चोपकरणानि । तत्र च तेषां तासां च पुस्तकमषीभाजनलेखनीपट्टिकापुस्तकबन्धपिच्छप्रमार्जनीप्रभृति ज्ञानोपकरणं भूयस्तरमपि यतेर्निष्परिग्रहव्रतं नोपहन्ति । तथा च कृपणीसूचीकर्त्तरीशिलापाषाणदलकदोरककङ्कतवर्तनककाष्ठपात्रीकाष्ठपट्टचतुष्किकादेवसरोपकारिप्रभृति वस्तु पुस्तकादिज्ञानोपकरणसाधनं साधूपकरणसमारचनकरं वसतिनिर्वाहहेतु च न परिग्रहव्रतस्य साधोर्व्रतभङ्गाय, उपकरणं तु साधुशरीरप्रतिबद्धं संयमनिर्वाहकरमुच्यते । तज्जिनकल्पिकानामुपकरणं द्वादशधा । यथा—"पत्तं १ पत्तावंधो २ पायट्ठवणं ३ च पायकेसरिआ ४ । पडलाइं ५ रयत्ताणं ६ च गुच्छगो ७ पायनिज्जोगो ८ ॥ १ ॥ तिन्नेव ९ य पच्छागा १० रयहरणं ११ चेव होइ मुहपत्ती १२ । एसो दुवालसविहो उवही जिणकप्पियाणं तु ॥ २ ॥ जिणकप्पिया वि दुविहा पाणी पाया पडिग्गहधरा य । पाउरणमपाउरणा इक्किक्का ते भवे दुविहा ॥ ३ ॥ दुग २ तिग ३ चउक्क ४ पणगं ५ नव ९ दस १० इक्कारसेव ११ बारसगं १२ । एए अट्ठ विकप्पा जिणकप्पे हुंति उवहिस्स ॥ ४ ॥ पुत्तीरयहरणेहिं दुविहो २ तिविहो अ इक्ककप्पजओ ३ । चउहा कप्पदुगेण ४ कप्पतिगेणं तु पंचविहो ५ ॥५॥ दुविहो तिविहो चउहा पंचविहोवि सपाय निज्जोगो । जायइ नवहा ९ दसहा १० इक्कारसहा ११ दुवालसहा १२ ॥ ६ ॥ अहवा दुगं च नवगं उवगरणे हुंति दुन्नि ओ विगप्पा । पाउरणवज्जियाणं विसुद्धजिणकप्पियाणं तु ॥ ७ ॥ तवेण १ सुत्तेण २ सत्तेण ३ एकत्तेण ४ बलेण व ५ । तुलणा पंचहा वुत्ता जिणकप्पे पडिवज्जिए

॥ ८ ॥ स्थविरकल्पितानामुपकरणानि यथा—एए चेव दुवालस मत्तगअइरेग चोलपट्टो ओ । एसो चउद्स-रूवो उवगरणो थेरकप्पम्मि ॥ ९ ॥ स यथा—पत्तं १ पत्ताबंधो २ पायट्ठवणं च ३ पायकेसरिया । पडलाय ५ रयत्ताणं ६ गुच्छगो ७ पायनिज्जोगो ८ ॥ १० ॥ तिन्नि वय ९ पच्छागा १० रयहरणं चेव ११ होइ मुहपत्ती १२ । इत्तो अ मत्तए खलु १३ चउदसमे कमढए चेव १४ ॥ ११ ॥ इति साधूनामुपकरणसंख्या ॥ अथोपधीनां प्रमाणम् । तिन्निविहत्थी चउरंगुलं च भाणस्स मज्झिमपमाणं । इत्तो हाणजहन्नं अइरेगयरं तु उक्कोसं ॥१२॥ पत्ताबंधपमाणं भाणपमाणेण होइ कायव्वं । जह गंठम्मि कयम्मी कोणा चउरंगुला हुंति ॥ १३ ॥ पत्तगठवणं तह गुच्छगो अ पायपडिलेहणं चेव । तिन्हं चेव पमाणं विहत्थि चउरंगुलं चेव ॥ १४ ॥ अड्ढाइज्जा हत्था दीहा छत्तीस अंगुले रुंदा । बीअं पडिग्गहाओ ससरिआओ अ निप्पन्नं ॥ १५ ॥ कयलीगब्भदलसमा पडला उक्किट्ठमज्झिमजहन्ना । गिम्हे हेमं तंमि आवासासु अ पाणरक्खट्ठा ॥ १६ ॥ तिन्नि चउ पंच गिम्हे चउरो पंच छगं च हेमंते । पंच च्छसत्त वासासु हुंति घणमसिणरूवा ते ॥ १७ ॥ माणं तु रयत्ताणे भाणपमाणेण होइ निप्पन्नं । पायाहिणं करतं मज्झे चउरंगुलं कमई ॥ १८ ॥ कप्पा आयपमाणा अड्ढाइज्जा य वित्थडाहत्था । दो चेव [1]सुत्तिया उन्नओ अ तइओ मुणेयव्वो ॥ १९ ॥ छत्तीसंगुलहीहं चउवीसं अंगुलाइ दंडो सो । अट्ठंगुला दसाओ एगयरं हीणमहियं च ॥ २० ॥ चउरंगुलं विहत्थी एअं मुहणं तयस्सउ पमाणं । बीओ विय आएसो

---

१ बत्तीसं इत्यपि पुस्तकान्तरे दृश्यते ।

मुहप्पमाणेण निप्पन्नं ॥ २१ ॥ जो मागहो अ पत्थो सविसेसयरं तु मत्तगपमाणं । दोसुवि दव्वग्गहणं वासावासे अ अहिगारो ॥ २२ ॥ सूओ अणस्स भरियं दुगाउसद्धाण मागओ साहू । भुंजइ एगट्ठाणे एअं किर मत्तगपमाणं ॥ २३ ॥ दुगुणो चउग्गुणो वा हत्थो चउरंसु चोलपट्टो अ। थेरजु वाणणट्ठा सण्हे थूलम्मि य विसेसो ॥ २४ ॥ संघारुत्तरपट्टो अट्ठारज्जा य आयया हत्था। दुन्हंपि अवित्थारो हत्थो चउरंगुलं चेव ॥ २५ ॥ उपकरणानामर्थो यथा—आयाणे निक्खेवे ट्ठाणनिसी अण तु अट्ठ संकोए । पुव्विं पमज्जणट्ठा लिंगट्ठा चेव रयहरणम् ॥ २६ ॥ संपाइमरयरेणु पमज्जणट्ठा वयंति मुहपत्तिं । नासं मुहं च बंधइ तीए वसइं पमज्जंतो ॥ २७ ॥ छक्कायरक्खणट्ठा पायग्गहणं जिणेहिं पन्नत्तं । जे य गुणा संभोए हवंति ते पायग्गहणे वि ॥ २८ ॥ तणगहणानलसेवा निवारणं धम्मसुक्क जाणट्ठा । दिट्ठं कप्पग्गहणं गिलाणमरणट्ठया चेव ॥ २९ ॥ वेउव्व वाउडे वाइए यन्ही क्खद्ध पज्जणणे चेव। तेसिं अणुग्गहट्ठा लिंगुदयट्ठा य पट्टो उ ॥ ३० ॥ अथ प्रत्येकबुद्धोपकरणानि अवरे वि सयंबुद्धा हवंति पत्तेअ बुद्धमुणिणोवि । पढमा दुविहा एगे तित्थयरा तदियरा अवरे ॥ ३१ ॥ तित्थयरवज्जिआणं बोही १ उवही २ सुअं च ३ लिंगं च ४। मेआइं तेसिं बोहि जाइस्सरणाइणा होइ ॥ ३२ ॥ मुहपत्ती १ रयहरणं २ कप्पतिगं ५ सत्तपायनिज्जोगे १२। इय बारसहा उवही होइ सयं बुद्धसाहूणं ॥ ३३ ॥ हवइ इमेसि मुणीणं सुत्ताहीअं सुअं अहव ने अं। जइ होइ देवसया से लिंगं अप्पइ अहव गुरुणो ॥ ३४ ॥ जइ एगागीवि हु विहरणक्खमो तारिसी व से इच्छा । तो कुणइ त मन्नह

गच्छवास मणुसरइ निअमेण ॥ ३५ ॥ पत्ते अबुद्धसाहूण होइ वसहाइ दंसणे बोही । पुत्तियरयहरणेहिं तेसिं जहन्नो दुहा उवही ॥ ३६ ॥ मुहपत्ती रयहरणं तह सत्तय पत्तयाइ निज्जोगो । उक्कोसो वि नवविहो सुअं पुणो पुव्वभवगहि अं ॥ ३७ ॥ इक्कारस अंगाइं जहन्नओ होइ तं तहोक्कोसुं । देसेण असंपुन्नाइं हुंति पुव्वाइं दस तस्स ॥ ३८ ॥ लिंगं तु देवयादइ होइ कइयावि लिंगरहिओ वि । एगागि च्चिय विहरइ नागच्छे गच्छवासे सो ॥ ३९ ॥ पत्ते अ बुद्धमुणिणो इमाइ माइ एअ मुवगरणं । अर्धगाथैव ॥ ४० ॥ अथ साध्वीनामुपकरणानि यथा—उवगरणाइं चउदस य चोलपट्टाइ कमटयज्ज आइं । अज्जाणवि भणिआइं अहिआणि अ हुंति ता णवरं ॥ ४१ ॥ ओगहणंतम १ पट्टो २ अद्धोरुअ ३ चलणिआ य ४ बोधव्वा । अब्भितर ५ बाहिणिअंसिणीअ ६ तह कंचुए चेव ७ ॥ ४२ ॥ उक्कत्थिअ ८ वेकत्थी ९ संघाडी १० चेव खंधगरणी ११ अ । ओहो वहिम्मि एए अज्जाण पन्नवीसं तु ॥ ४३ ॥ अथ प्रत्युपकरणोपयोगो यथा—अह उग्गजणं तरता बसंचियं गुज्झदेसरक्खट्ठा । तं तु पमाणे णिक्कं घणमसिणं देह मासज्जा ॥ ४४ ॥ पट्टो वि होइ एगो देहपमाणेण सो उ भणियव्वो । डायंतो गहणंतं पडिबद्धो मल्लकच्छोव्व ॥ ४५ ॥ अद्धोरुओ वि ते दोवि गिन्हिओ त्थायए कडीभागं । जाणुपमाणा चलणी असीविआ लंखिआ एव ॥ ४६ ॥ अंतो निअंसणी पुणलीणतरी जाव अद्धजंघाओ । बाहिरगा जाखलु सावि कडिअदोरेण पडिबद्धा ॥ ४७ ॥ छाएइ अणुकुइए उरोरुहे कंचुओ असिव्विओ । एमेव य ओ कच्छिअ सा नवरं दाहिणे पासे ॥ ४८ ॥ वेकच्छिया उ पट्टो कंचुगमुक्कच्छियं

च छायंतो । संघाडीओ चउरो तत्थ दुहत्था उवसयम्मि ॥ ४९ ॥ दुन्निति हत्थायामा सिक्खट्ठा एग एग उच्चारो । ओसरणे चउहत्था निसन्न पच्छायणा मसिणा ॥ ५० ॥ खंधगरणी उ चउहत्थवित्थडा वायविहुय रक्खट्ठा । खुज्जा करणीओ कीरइ सूववईणं कुडहहेउं ॥ ५१ ॥” पत्तं इत्यादि, पात्रं भाजनं पानान्नग्रहण-स्थापनप्राशनयोग्यं, तच्च त्रिविधं, काष्ठालाबुमृण्मयं नतु स्वर्णरूप्यमणिताम्रकांस्यलोहदन्तचर्ममयम् । यत उक्तमागमे—“कंसेसु कंसपाएसु कुंडमोएसु वा पुणो । भुंजंतो असणपाणाइ आयारा परिभस्सइ ॥ १ ॥ सीओदगसमारंभे मत्तधोयणछड्डुणे । जाइं छन्नंति भूआइं दिट्ठो तत्थ असंयमो ॥ २ ॥ पच्छाकम्मं पुरेकम्मं सिआ तत्थ न कप्पई । एअमट्ठं न भुंजंति निग्गंथा गिहिभायणे ॥ ३ ॥” अलाबुपात्रकथने नालिकेरपात्र-मप्यन्तर्भवति १ पात्रबन्धः बन्धनझोलिका २ पात्रस्थापनं यस्यां झोलिकायां पात्राणि संस्थाप्य मुनयो भिक्षाटनं कुर्वन्ति तत् पात्रस्थापनं ३ पात्रकेशरी लघुरजोहरणी पात्रप्रतिलेखनार्थं युज्यते ४ पटलाः वस्त्र-मयानि पात्राच्छादनार्थं भुजोपरि क्षेप्यवस्त्राणि ५ रजस्त्राणं पात्रवेष्टनकं ६ गुच्छकः पात्रबन्धस्य अधउपरि ऊर्णामयः छादनरूपः प्रतिष्ठानमिति कथ्यते । तच्च अधः पृथिव्यम्बुवनस्पतिसंघट्टनिवारणाय, उपरि चातप-निवारणाय धार्यते ७ पात्रनिर्योगः गुच्छकबन्धनार्थं तृप्तिकरणबन्धनार्थं च दोरकोपकरणादि सर्वमेतत्पूर्वो-

१ जिणकप्पियाण संखाओ किथाएगवसहीएत्ति जिणकप्पियायसाहू । उक्कोसेणंतुएगवसहीए सत्त य हुंवंतिकहमवि अहियाकइयाविनोहुंति ॥ ५२ ॥ ग्रंथान्तरे इयं गाथा दृश्यते ।

कमपि पात्रोपकरणं सर्वं पात्रनिर्योगस्यान्तर्भवति । त्रयः प्रच्छादाः पटीद्वयं तृतीया कम्बली १० रजोहरणं धर्मध्वजः ११ मुखवस्त्रिका मुखाच्छादनवस्त्रम् १२ एष द्वादशविधो जिनकल्पिनां साधूनामुपधिः । जिण-कप्पिआ इति०–जिनकल्पिनोपि द्विविधाः पाणिपात्रभुजः १ पात्रभुजश्च २ तौ द्वावपि द्विद्विविकल्पौ, पाणि-पात्रा द्विविधाः सप्रावरणा १ अप्रावरणाश्च २ । दुगतिग इति–पाणिपात्राणामप्रावरणानां जिनकल्पिनामु-पकरणद्वयं त्रयं । पात्रभृतामप्रावरणानां जिनकल्पिनामुपधिः नवविधो दशविधो वा । सप्रावरणानां पात्र-भृतां जिनकल्पिनामुपधिरेकादशविधो द्वादशविधो वा इति जिनकल्पे अष्टप्रकार उपधिभेदः । पुत्तिरय० इति–मुखवस्त्रिकारजोहरणाभ्यां द्विविध उपधिः १ सचैककल्पयुतस्त्रिविधः २ स च कल्पद्वययुतश्चतुर्विधः ३ स च कल्पत्रययुतः पञ्चविधः ४ तथाच द्विविधो मुखवस्त्रिकारजोहरणरूपः सप्तविधपात्रनिर्योगयुतो नवधा भवति ५ त्रिविधो रजोहरणमुखवस्त्रिकैककल्परूपः सप्तविधपात्रनिर्योगयुतो दशधा भवति ६ चतुर्विधो मुखवस्त्रिकारजोहरणकल्पद्वयरूपः सप्तविधपात्रनिर्योगयुत एकादशधा भवति ७ पञ्चविधो मुखवस्त्रिकारजो-हरणकल्पत्रयरूपः सप्तविधपात्रनिर्योगयुतो द्वादशधा भवति ८ आद्यमुपकरणविकल्पचतुष्कमप्रावरणानां पाणिपात्राणां जिनकल्पिनां भवति । अपरं चोपकरणविकल्पचतुष्कं सप्रावरणानां पात्रभृतां जिनकल्पिनां भवति । अथवा विशुद्धजिनकल्पिनां द्विभेदमेवोपकरणं भवति । पाणिपात्राणां रजोहरणमुखवस्त्रिकारूपं द्विविधमेवोपकरणं भवति । पात्रभृतां च मुखवस्त्रिकारजोहरणे सप्तविधपात्रनिर्योगश्च नवविधमुपकरणं भ-

वति इति विशुद्धजिनकल्पिनामुपकरणविकल्पद्वयं, कल्पत्रयेण प्रावरणधारणं जिनकल्पिनां न खलु जिनकल्पविशुद्धिं करोति । जिनकल्पतुलना तु पञ्चविधा । तवेण इति– तपसा १ सूत्रेण २ सत्त्वेन ३ एकत्वेन ४ बलेन च ५ तत्र जिनकल्पे तपः षण्मासं पानान्ने विनापि नेन्द्रियग्लानिहेतु १ सूत्रं च द्वादशाङ्गीपाठः ससूत्रः सार्थः सग्रन्थः साङ्गः सभेदः सोपाङ्गः सनिर्युक्तिः ससंग्रहः सव्याकरणः सनिरुक्तः सपरमार्थः सहेतुः सदृष्टान्तः २ सत्त्वं च वज्रपातेप्यप्रकम्पता, शक्रस्योत्तरवैक्रिये सर्वर्द्धित्ववरेप्यलोभता, रम्भाद्यप्सरोदर्शनेप्यकामता, षण्मासोपवासेपि नानारसलाभेप्यनभिलाषः ३ एकत्वं च सर्वशक्रचक्रयर्द्धचक्रिबले दृष्टेपि नान्यापेक्षा, नचापि दुष्टदैवतश्वापदरोगाभिभवेपि परावलोकरक्षणशुश्रूषाभिलाषः, न चापि जिनकल्पिन आत्मसदृशस्यापि स्वपार्श्वे संवासः किं पुनः परेषाम् ४ बलं च मत्तगजसिंहादिव्यालानां चक्रवर्तिकटकस्यापि न मार्गदानम् ५ इति पञ्चविधा जिनकल्पग्रहणे तुलना इति जिनकल्पिनामुपकरणचर्यायुक्तिः ॥ अथ स्थविरकल्पिनामुपकरणानि द्वादश तान्येव पूर्वोक्तानि यथा । पत्तं इति– पात्रं १ पात्रबन्धः २ पात्रस्थापनं ३ पात्रकेशरी ४ पटलाः ५ रजस्त्राणं ६ गुच्छकः ७ इति सप्तविधः पात्रनिर्योगः कल्पत्रयं द्विपटी कम्बलीरूपं १० रजोहरणं ११ मुखवस्त्रिका १२ इति द्वादशधा स एव मात्रकोत्तरपट्टाभ्यां १४ स्थविरकल्पिनां चतुर्दशधोपकरणमित्युपकरणसंख्या ॥ अथोपकरणानां प्रमाणम् । पात्रस्य मध्यमस्य स्वभावेन वितस्तित्रयमङ्गुलचतुष्कं परिधिः प्रमाणमुत्सेधप्रमाणं च, ततश्चेतो हीनं जघन्यमितोधिकमुत्कृष्टम् इति काष्ठपात्रप्रमाणम्, तथा च

नालिकेरालाबुमयेषु तृप्तिकरणकटाहटकादिषु यथाप्राप्तं यथायोग्यं यथाप्रयोजनं प्रमाणं, मृत्पात्रेषु च घटकुण्डादिषु साधुसंख्यापानान्नगवेषणाप्रमाणं, तथा च सर्वत्र यतिपात्रे दृष्टिप्रसरप्रतिलेखनाकरणं शुद्धिर्गवेष्यते इत्येव संस्थानं प्रमाणं च । यत उक्तमागमे—"जत्थ य कप्पवेसो जत्थ य सव्वत्थ दिट्ठिपसरो अ । तं किर मुणिणो पत्तं जुग्गं सेसं पुण अजुग्गं ॥ १ ॥ बारस बाहिं ठाणा बारसठाणा य हुंति मज्झंमि । पत्तपडिलेहणाए पणवीसयमो कप्पंसो ॥ २ ॥" पात्रबन्धप्रमाणं तु । पात्रप्रमाणेन व्यतिरिक्तं कर्तव्यं यथा पात्रबन्धने ग्रन्थौ दत्तौ कोणौ चतुरङ्गुलौ तिष्ठतः । पात्रकस्थापनं गुच्छकश्च पात्रप्रतिलेखनं च त्रयाणां प्रमाणं वितस्तिश्चत्वारोङ्गुलाश्च पात्रस्थापने पात्रस्थापनादनन्तरं वितस्तिश्चत्वारोङ्गुलाश्च बाहुक्षेपार्थं ग्रन्थिदानार्थं च गवेष्यन्ते । गुच्छश्च तद्वत्, पात्रप्रतिलेखन्यां वितस्तिमात्रो दण्डकः, चतुरङ्गुला दशा, तथा च पटलाः सार्द्धहस्तद्वयदीर्घाः षड्त्रिंशदङ्गुलपृथुलाः कदलीगर्भपत्रसमा भवन्ति, पुनरपि तेषां प्रमाणं यतिशरीरपात्रोत्सेधप्रमाणेन भवति, ते च ग्रीष्महेमन्तवर्षासु उत्कृष्टमध्यमजघन्याः प्राणिरक्षार्थं भवन्ति, त्रिश्चतुःपञ्चप्रमाणा ग्रीष्मे, चतुःपञ्चषट्प्रमाणा हेमन्ते, पञ्चषट्सप्तप्रमाणा वर्षासु, ते च निबिडसूत्रव्यूतमसृणवस्त्रमया भवन्ति । रजस्त्राणे प्रमाणं पात्रप्रमाणं, न ततोपि पात्रवेष्टने क्रियमाणे सर्वपरिधिकोणैश्चतुरोङ्गुलान् क्रामति तथा विधेयं, कल्पाः साध्वङ्गदीर्घताप्रमाणदैर्घ्याः सार्धद्वयहस्तपृथुला भवन्ति, तत्र द्वौ कार्पासवस्त्रमयौ एकश्च ऊर्णामयः, रजोहरणं च द्वात्रिंशदङ्गुलप्रमाणं, तत्र चतुर्विंशत्यङ्गुलो दण्डः, अष्टाङ्गुला दशाः, क्वचिद्दीर्घं हीन-

मधिकं च भवति, दशानां दण्डस्य च क्वचिन्मुनिकायप्रमाणाद्वा गच्छाचाराद्वा हीनाधिकता भवति, पूर्वं च कम्बलखण्डान्निषद्यारूपाकृष्टा एव दशा आसन्, सांप्रतं तु भिन्नोर्णामय्यः निषद्यायास्तु प्रसाधनं दृढीकरणार्थं धर्मोपकरणसौन्दर्यकरणार्थं च । यत उक्तमागमे—"नियदेहं भूसंतो अणंतसंसारिओ हवई । साहू उपगरणाणं भूसाजुत्ता जिणधम्मकंकखट्ठा ॥ १ ॥" तत्र रजोहरणे दण्डभागद्वयच्छादिन्यूर्णानिषद्याः दशावर्जितनिषद्या सर्वदण्डाच्छादिनी वस्त्रमयी निरवद्या । तत्र च कैश्चित् वस्त्रनिषद्योपरि पादप्रोञ्छनकबन्धनं विधीयते । तत्र गच्छाचारः प्रमाणम् । दण्डे च दशाबन्धनं, पूर्वं क्वचिद्रजोहरणदण्डे पतिते केनचित्सादिना गृहीते कसात्वं नीते तदनन्तरं विधीयते, तत्रापि गच्छाचारः प्रमाणम् । तत्र च निषद्योपर्यधोदोरकबन्धनं दशामूलादेकाङ्गुले ततो निषद्यायाः सदण्डायाः द्वौ भागौ अधो मुक्त्वा भागत्रये चोपरि शेषे मध्ये द्वितीयदोरकबन्धनं वितस्तिश्चत्वारोङ्गुलाश्चेति चतुरस्त्रं मुखवस्त्रिकाप्रमाणं तस्य समारचनावस्त्रस्य पालीं वामतो विधाय स्वतः परत्र भङ्गनेन द्विगुणं कुर्यात् । ततः पुनस्ततोपि द्विगुणं ततस्तिर्यग्भङ्गेनाष्टगुणं कुर्यात् । मुखवस्त्रिकायाः वामपार्श्वे बहिः वस्त्रपालीधारणं दशानां तु धारणं चोपरि, अत्र द्वितीयोप्यादेशः मुखप्रमाणेन कपोलपृथुलतादियोगेन मुखवस्त्रिकाया आधिक्यमपि भवति न दोषस्तत्र, मागधप्रस्थप्रमाणेन सविशेषे न मात्रकप्रमाणं पूर्णप्रस्थप्रमाणेन शेषकालेषु द्रव्यग्रहणं, तदधिकेन वर्षासु द्रव्यग्रहणं, तच्च मात्रकं सूपेन भोज्येन भरितं गव्यूतद्वयं गतः साधुरेकस्थाने भुङ्क्ते, एतत्किल मात्रकप्रमाणं चोलपट्टस्तु स्थविराणां कृते कटि-

परिधेर्द्विगुणः, बृहत्कुक्षीणां मुनीनां कृते कटिपरिधेश्चतुर्गुणः सूक्ष्मस्थूलयोरिति विभाषा, चोलपट्टपरिधानं तु नाभिजान्वोरधउपरि चतुरङ्गुलप्रकटीकरणं, संस्तारकोत्तरच्छदयोर्दीर्घत्वं सार्धहस्तद्वयं, द्वयोरपि पृथुत्वं चतुरङ्गुलयुतो हस्तः ॥ अथ साधूपकरणानामुपयोगित्वं यथा—वस्तुन आदाननिक्षेपयोः स्थानोपवेशनशयनेषु पूर्वं प्रमार्जनार्थं च रजोहरणमिति रजोहरणोपयोगः । मुखवस्त्रिका तु निरन्तरसूक्ष्मजीवनिवारणार्थं त्रसरेणुप्रमार्जनार्थं भवति, तयाच्छादितवदनस्य नासामुखमारुतेन न हन्यन्ते सूक्ष्मजीवाः, प्रमार्जनकाले च मुनिस्तया कर्णबद्धयावलम्बनेन नासां मुखं च रुणद्धि, इति मुखवस्त्रिकोपयोगः । पात्रग्रहणं तु भूमिपट्टवस्त्रादिषु जीवरक्षार्थं भोजनसंलीनतार्थं च, ये गुणाः संभोगे ते गुणाः पात्रग्रहणेपि । संभोगे यथा एकप्रणिधानैकसंस्थानतल्लीनता भवति, तथैव पात्रभोजनेनान्नपानादिविकिरणमेकचित्ततापरोपेक्षाभावश्च भवति, इति पात्रोपयोगः । शेषाणां पात्रनिर्योगाणां ग्रहणं पात्ररक्षार्थमेव कल्पत्रयग्रहणं च वनज्वलनजलवायुनिवारणार्थं शुक्लधर्मध्यानार्थं च समाधिनिमित्तग्लानानां मरणे आच्छादनार्थं च, इति कल्पोपयोगः । चोलपट्टग्रहणं तु पुरुषवेदोदयोद्भवरक्षार्थं दीर्घलिङ्गानां लिङ्गरोगिणां लज्जानिवारणार्थं च, इति चोलपट्टोपयोगः । मात्रकोपयोगः पूर्वमेवोक्तः, इह कमठशब्देन केचिच्चोलपट्टं, केचित्संस्तारकोत्तरपटमामनन्ति । पात्रस्थापनं केचिद्भिक्षाटनं झोलिकां केचिदधःसत्कंप्रतिष्ठानं कथयन्ति इत्युपकरणोपयोगाः। अथ प्रत्येकबुद्धोपकरणानि—प्रथमं तेषां व्याख्यानत उपकरणानां तत्रैके स्वयंबुद्धाः एके प्रत्येकबुद्धाः, स्वयंबुद्धा द्विविधा एकेर्हन्तः परे च कैश्चिद्दृष्टान्तैः

स्वयमेव बोधिमाप्ताः, अर्हतां तु चोलपट्टाद्युपधिश्रुतलिङ्गादि न, तदपरेषां स्वयंबुद्धानां बोध्युपधिश्रुतलिङ्गादि भवति, तेषां बोधिः पूर्वजन्मस्मरणेन, उपधिस्तु तस्य द्वादशधा—मुखवस्त्रिका रजोहरणं २ कल्पत्रयं ३ पात्रनिर्योगः १२ इति स्वयंबुद्धसाधूनां द्वादशधोपधिः । तेषां च श्रुतं पूर्वाधीतं तद्भवाधीतं च भवति, तस्य च लिङ्गं देवतापर्यंति । अथ कल्पिताः सुगुरवः, स यद्येकाकी विहरति तादृशी वा तस्येच्छा तदा तथैव विहरति, नो चेद्गच्छवासमनुसरति च । अथ प्रत्येकबुद्धसाधूनामस्यामवसर्पिण्यां चतुर्णां करकण्डु १ दुर्मुख २ नमि ३ नग्नकनाम्नां ४ वृषभदृष्टान्तेन जलदृष्टान्तेन वलयदृष्टान्तेन रसालद्रुमदृष्टान्तेन क्रमाद्बोधिरभूत् । तेषां जघन्य उपधिर्मुखवस्त्रिकारजोहरणाभ्यामेव, अथवा मुखवस्त्रिकारजोहरणाभ्यां सप्तविधपात्रनिर्योगेन च उत्कृष्टो नवविध उपधिर्भवति । तेषां श्रुतं पुनस्तेषां पूर्वभवाधीतमेव जघन्यमेकादशाङ्गी, उत्कृष्टं च दशोनानि दशपूर्वाणि, तेषां लिङ्गं रजोहरणादि शासनदेवता ददाति, अथवा लिङ्गरहिता अपि भवन्ति, ते महारण्यं गृहमिव विहरन्ति । प्रत्येकबुद्धानामियं स्थितिरिदमुपकरणम् । अथ साध्वीनामुपकरणानि यथा—चतुर्दश तान्येव स्थविरकल्पियतिसत्कानि एकादश चान्यानि यथा—अवग्रहणांतकं १ पट्ट २ अर्द्धोरुकं ३ चलणिका ४ आभ्यन्तरी ५ बाह्यनिवसनी ६ कञ्चुकं ७ उत्कक्षी ८ वैकक्षी ९ संघाती १० स्कन्धकरणी च ११ इत्योघेन व्रतिनीनां पूर्वैस्सह पञ्चविंशतिरुपकरणानि । अथ तेषामुपयोगो यथा—अवग्रहणान्तकं गुह्यरक्षार्थं देहसङ्गेन घनमसृणवस्त्रमयं सुष्ठु बद्धं धार्यते गुह्यदेहप्रमाणं १ पट्टस्तु देहप्रमाण एकः कटिप्रतिबद्धो मल्लक-

क्षावञ्चवति। अर्द्धोरुकमपि तादृशमेव ताभ्यां पट्टार्द्धोरुकाभ्यां मीलिताभ्यां कटिश्छाद्यते ३ चलनी जानुप्रमाणा अस्यूता लम्बिता च ४ आभ्यन्तरी यावदर्द्धजङ्घामन्तः परिधीयते ५ बहिर्निवसनी तु कटिदोरकेण प्रतिबद्धं घुंटापर्यन्तं धार्यते ६ कञ्चुकस्तु अस्यून एव स्तनौ छादयति ७ एवमेवोत्कक्षी दक्षिणपार्श्वप्रतिबद्धा ८ वैकक्षी कञ्चुकमौत्कक्षीं च छादयति ९ संघाटी चतुर्विधा द्विहस्तप्रमाणोपाश्रये भवति पादप्रोंछनकलक्षणेत्यर्थः १० तत्र द्वे संघाट्टे त्रिहस्ता ग्रामे भिक्षार्थमेकैकोचारप्रस्रवणयोः अपसरणे तु चतुर्हस्ता निखण्डप्रच्छादनी मसृणा १० स्कन्धकरणी चतुर्हस्तविस्तरा वायुविधूतिरक्षार्थं कुब्जकरणी सा प्रच्छादनी रूपवतीनां रूपप्रच्छादनहेतुः ११ ॥ इति साधुसाध्वीनामुपकरणानि ॥ तत्र दण्डाश्चोपकरणबहिर्भूता अपि पशुसर्पनिवारणार्थं मुनिभिरादीयन्ते, ते च साधूनां साध्वीनां च पञ्चविधाः, सहजग्रहणे भूमेः स्कन्धपर्यन्ताः १ ग्लानावष्टम्भे सार्धहस्तद्वयप्रमाणाः २ जलावगाहे संपूर्णकायमानात् सार्धहस्तेनाधिकाः ३ पङ्किलभूमौ प्रावृषि स्थूला देहप्रमाणाः ४ मार्गचङ्क्रमणे स्कन्धपर्यन्ता अनम्राश्च ५ ते च वंश १ श्रीपर्णी २ वटपाद ३ क्षीरवृक्ष ४ सरलकाष्ठमयाः ५ यथालाभेन भवन्ति। ब्रह्मचारिणां च क्षुल्लकानां च प्रथमोपनीतानां च कायप्रमाणाः पलाशचन्दनमया एव दण्डा भवन्ति। व्रतविशेषेषु च ब्राह्मणक्षत्रियवैश्यानां बिल्वोदुम्बरादिकाष्ठमया यथा लोकेषु प्रसिद्धाः। साधूनां दण्डप्रोंछनं तु मयूरपिच्छमयं मुञ्जमयं वा दण्डप्रतिबद्धं भवति। तथा च चर्मोपकरणादिसंकरापनयनार्थं विज्ञेयम्, एवमुपकरणयुक्ताः साधवः साध्व्यः संयमं पालयन्ति, चर्मादिपरिमाणं

प्रवचनाद्विज्ञेयम् । अथ साधुः साध्वी च रजनीपश्चिमयामे परमेष्ठिमन्त्रं पठन् संस्तारकादुत्तिष्ठेत्, ततो दण्डप्रोंछनेन प्रतिलिख्य पादपद्मानि परिमार्जयन् प्रश्रवणमात्रकं यावद्गच्छेत् । ततः प्रश्रवणमात्रकं दण्डप्रोंछनेन प्रतिलिख्य शनैर्मूत्रमुत्सृजेत्, ततश्च तयैव युक्त्या वसतेर्बहिर्गत्वा सायं प्रमार्जितस्थंडिले परिष्ठापयेत्, ततश्च तथैव संस्तारकपार्श्वमागच्छेत्, प्रतिलिख्य संस्तारकं संवृणुयात् । ततश्च काष्ठासनं पादप्रोंछनं वा सायं प्रतिलेखितं निवेश्य तदुपरीर्यापथिकीं प्रतिक्रामेत्, शक्रस्तवं च पठेत् दुःस्वप्नरात्रिप्रायश्चित्तकायोत्सर्गं च कुर्यात् । तत "इच्छामि पडिक्कमिउं पगाम सिज्जाए० यावद्यो मे राईओ अइयारो कओ तस्स मिच्छामि दुक्कडं" इति पर्यन्तं कायोत्सर्गपारणचतुर्विंशतिस्तवपाठानन्तरं पठेत्, ततः स्वाध्यायपाठेन नमस्कारजापेन शनैः स्वरेण परेषां विद्याभ्यासं कारयन् निशामतिवाहयेत्, ततश्च घटिकाशेषायां रात्रौ रात्रिप्रतिक्रमणं कुर्यात् । प्रतिक्रमणकायोत्सर्गप्रत्याख्यानादिविधिरावश्यकोद्‌याद्‌वसेयः । ततः अरुणोदये श्रीमदिन्द्रभूतिगणधरस्तुतिपाठपूर्वं प्रतिलेखनामङ्गप्रतिलेखनामुपधिप्रतिलेखनां वसतिप्रतिलेखनां च कुर्यात्, ततः स्वाध्यायं च कुर्यात्, ततो धर्मव्याख्यानं शिष्यपाठनं साध्वीपाठनं स्वयं पठनं श्राद्धश्राद्धीपाठनं धर्मशास्त्रलिखनं च कुर्यात् । ततः पादोने प्रहरे जाते पौरषीप्रतिलेखनां कुर्यात्, ततश्च तृप्तिकरणं गृहीत्वा प्राशुकजलमादाय जिनायतनेषु चतुर्भिः स्तुतिभिश्चैत्यवन्दनं कुर्यात्, ततश्च बहिर्भूमौ मलमूत्रोत्सर्गं विधाय पुनर्वसतिमागच्छेत्, तत्र पुनरीर्यापथिकीं प्रतिक्रामेत् । तथा यत उक्तम्—"सर्वत्र गमनस्यान्ते त्यागे च मलमूत्रयोः ।

कथान्ते क्रमणान्ते च चैत्यमध्यप्रवेशने ॥ १ ॥ स्थिरवस्त्रप्रयोगे च वन्दनावश्यकादिषु । शक्रस्तवस्य पाठे च भोजनाद्यन्तकर्मणि ॥ २ ॥ अवग्रहग्रहणे च प्रत्याख्यानेष्ववधीतिषु । षड्जीवकायसंस्पर्शे संघट्टादिपरिग्रहे ॥ ३ ॥ कालग्रहणे च स्वाध्याये जलपाने क्रियाविधौ । सर्वत्र साधुसाध्वीनां सदैर्यापथिकी मता ॥ ४ ॥ साधुसाध्वीभिः सदैवैर्यापथिकीप्रतिक्रमणशीलैर्भाव्यम्, तेषां हि सर्वविरतिसामायिकमाजन्म प्रतिपन्नं नैर्यापथिकीं विना शुद्धिमेति, ततः पुनः शक्रस्तवं पठित्वा पारणमुखवस्त्रिकां प्रतिलेखयेत्, तदन्ते इति कथयेत् "पारावेमि भत्तपाणीयं अमुगपच्चक्खाणागारेण पोरसी चउविहारेण" गुरुः कथयति "जाकावि वेलातीए पारावेह" ततो विधिना त्रिविधपात्राणि प्रतिलिख्य, पिण्डनिर्युक्तिशास्त्रोक्तविधिना भक्तपानगवेषणां कुर्यात्, ततो द्विचत्वारिंशद्दोषविशुद्धं भक्तपानं गृह्णीयात् । साधवः साध्व्यश्च हस्तशतादनन्तरं व्यायामार्थं भिक्षार्थं चान्यकार्यार्थं वानैकाकितया गच्छन्ति । साधुसाध्वीनां विचरं सर्वत्रैव । यदुक्तमागमे—"कतो सुत्तत्थागम परिपुच्छणचो अणा य इक्कस्स । विणओ वेयावच्चं आराहणया य मरणंते ॥ १ ॥ पिल्लेज्जेसणमिक्को पइन्नपमयाजणाओ निच्चभयं । काउमणोवि अकज्जं न तरइ काऊण बहुमज्झे ॥ २ ॥ उच्चारपासवणवंतपित्तमुच्छाविमोहिओ इक्को । सद्दविभाणविहत्थो निक्खिवइ व कुणइ उड्डाहं ॥ ३ ॥ एगदिवसेण बहुला[1] सुहाय असुहाय जीवपरिणामा । एगो असुहपरिणओ चइज्ज आलंबणं लद्धुं ॥ ४ ॥ सव्वजिणपडिकुट्ठं अण-

१ बहुआ इति पाठान्तरम् ।

वत्था थेरकप्पतेओ अ। एगो असुहाउत्तो विहसइ तवसंजमं अइरा ॥ ५ ॥" ततो दशवैकालिकपिण्डैषणाध्ययनोक्तयुक्त्या भक्तपानादि गृहीत्वा पुनर्वसतिमागच्छेत्। ऐर्यापथिकीं प्रतिक्रम्य गमनागमनाद्यालोचनं कुर्यात्। तद्यथा—"भगवन् गमणागमणं आलोएमि मग्गे आवंतेहिं जंतेहिं पुव्वउत्तरअवरदक्खिणदिसि गएहिं कायसन्नावोसिरिया हरियकाय तसकाय थावरकाय संघट्टिया जं खंडिअं जं विराहिअं तस्स मिच्छामि दुक्कडं" इति गमनागमनाद्यालोचनं चैत्यपरिपाट्यागतैर्वा यामागतैर्भिक्षागतैः साधुसाध्वीजनैः सदैव विधेयम्। ततः गोचरचर्यां प्रतिक्रमणार्थं कायोत्सर्गं कुर्यात्। तत्र नमस्कारं चिन्तयित्वा मुखेन नमस्कारभणनपूर्वं "पडिक्कमामि गोअरचरिआ ए०" इत्यादि दण्डकं पठेत्। ततः "अहो जिणेहिं सावज्जा वित्ती साहूण देसिआ। मुक्खसाहुणहेउस्स साहुदेहस्स धारणा" इति मौनेन पठेत्। ततो गुर्वग्रे यथागृहीतं सर्वमन्नपानमालोचयेत्। ततः क्षणं विश्रम्य पञ्च ग्रासैषणादोषान् वर्जयन् भुञ्जीत। आचार्योपाध्यायवाचनाचार्यमहत्तराः साधुसाध्वीजने भिक्षां गते अक्षपोट्टलिकापटेष्टदेवतापूजनमन्त्रस्मरणकर्माणि कुर्वते। ततो भुक्त्वा पात्राणि सम्यक् संलिह्य प्रक्षाल्य संमार्ज्य यथायुक्त्या बध्नीयात्। ततः पुनरैर्यापथिकीं प्रतिक्रम्य शक्रस्तवपाठं कुर्यात्, ततश्च क्षणं विश्रम्य गुरुसाधुवैयावृत्यं बालसाध्वध्यापनमुपकरणसमारचनं पात्रादिलेपकरणं लिखनं पठनं च कुर्वन्ति मुनयः। ततश्चतुर्थयामे लग्ने मुनयः प्रतिलेखनां कुर्वन्ति स्वाध्यायं च, तद्विधिस्तु सर्वोऽप्यावश्यकोदये कथयिष्यते। ततः षट्पदीवस्त्राणि षट्पदीजीवनार्थं मुहूर्तं जह्वासु बध्नन्ति, ततो लघु-

साधवश्चतुर्थषष्ठाष्टमभक्ताश्च मुनयः पुनरपि भिक्षाटनं विधाय भुञ्जते। भिक्षाटनभोजनविधिः पूर्ववत्, ततः सायमावश्यककर्म विधेयम्, चतुर्थे प्रहरे शेषे प्रतिलेखना प्रभातवत्, तदन्ते स्वाध्यायपाठश्च, ततो रजनीप्रथमयामे व्यतीते साधवः मुखवस्त्रिकां प्रतिलिख्य "भयवं बहुपडिपुन्ना पोरसी राइ संथारए ठाह" इत्युक्त्वा शक्रस्तवं पठन्ति, ततः साधवो यथायोग्यसंस्तारके शेरते। शयनविधिश्चायम्–मुनिः संस्तारकं विधाय तदुपर्युपविष्टः परमेष्ठिमन्त्रं जपेत् अन्यमिष्टमन्त्रं वा, ततः संकोचितकरचरणो वामबाहूपधानेन वामपार्श्वेन शेते। करपादादिप्रसारणे संकोचने च तदङ्गप्रतिलेखनां तत्स्थानप्रतिलेखनां च कुर्यात्। तथा रजनीप्रथमयामे व्यतीते ब्राह्ममुहूर्तादर्वाक् जाग्रदपि साधुः गाढस्वरपाठालापैर्नान्यं जागरयेत् इत्युत्तराध्ययनरहस्यम्, इत्येवं मुनयो प्रतिन्यश्चाहोरात्रमवहिताः कषायविनिर्मुक्ताः समरसलीनाः संयमपालनं कुर्वते॥ इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायणे अहोरात्रचर्याकीर्त्तनो नाम त्रिंशत्तम उदयः॥ ३०॥

एकत्रिंशत्तम उदयः।

अथ साधूनामृतुचर्या व्याख्यानविधियुक्ता कथ्यते।

सा यथा—"हेमन्तर्तौ भवेत्साधुः प्रायो वसनवर्जितः। अल्पनिद्रस्तथाहारमल्पं भुञ्जीत कर्हिचित्॥ १॥

न तैलाभ्यञ्जनं कुर्यान्न वा कुन्तलधारणम् । न तूलं न निकामं च शयनं नाग्निसेवनम् ॥ २ ॥ नोष्णतीक्ष्णाम्लमधुरभोजनेच्छा रसोद्गमात् । न चान्यकायसंस्पर्शो न पादत्राणमेव च ॥ ३ ॥ न शीतजलपानं च कुर्यान्नो शान्तभोजनम् । रम्यनिर्वातगेहेषु न रतिं पशुवत्सु च ॥ ४ ॥ नारीषण्ढादिभिः संगं न कुर्वीत कदाचन । नोष्णोदकादिभिः स्नानं न दीपोद्योतमर्शनम् ॥ ५ ॥ नाच्छादिते च शयनं नोर्णावस्त्रं विना भ्रमः । मूत्रनिष्ठीवनादीनां न च स्थापनमञ्जसा ॥ ६ ॥ पात्रे मात्रे च शुचये देहे भूमौ नखान्तरे । न स्थापयेज्जलावेशं कदाचन मनागपि ॥ ७ ॥ देहसंयमरक्षार्थं संग्रहं कम्बलादिना । कुर्वीत वस्त्रसंयुक्तं वस्त्रहीनं न कम्बलम् ॥ ८ ॥ मार्गाद्याषाढपर्यन्तं मासे मासे महर्षयः । विहारं कुर्वते तेषां स्थितिरेकत्र नोचिता ॥ ९ ॥ स्नेहद्वेषावसौभाग्यं धनस्थानपरिग्रहः । सुखासिका च साधूनां दोषा एकत्र संस्थितेः ॥ १० ॥ मासान्ते ऋतुपर्यन्ते ऋतुद्वित्रिषु चायने । वर्षान्ते वा मुनीन्द्राणां विहार उचितो ध्रुवम् ॥ ११ ॥ यत उक्तमागमे—सवत्सरं वावि परं पमाणं बीअं च वासं न तहिं पसज्जा । सुत्तस्स मग्गेण चरिज्ज भिक्खू सुत्तस्स अत्थो जह आणवेइ ॥ १२ ॥ विमृश्येति विहारेषु नालसाः स्युर्महर्षयः । अतोऽभिधीयते कश्चिद्विहारविधिरुत्तमः ॥ १३ ॥ यथा । विहारस्य कालो यथा—वर्षाशरद्वर्जिताश्च चत्वार ऋतवोऽद्भुताः । अमेघता सुभिक्षं च पथामपि मनोज्ञता ॥ १४ ॥ अविड्वरो नृपादीनां परचक्राद्यभावता । विहार ईदृशः कालो युज्यते यतिनां परम् ॥ १५ ॥ विहारयोग्या मुनयो यथा—नीरुजः करजङ्घाश्च गतिशक्तिगुणान्विताः । सर्वदेशस्थितिज्ञाश्च सर्वभाषाविचक्षणाः

॥ १६ ॥ अलुब्धाश्च रसस्पर्शस्थानेष्वपि कलाविदः । सर्वविद्याप्रवक्तारः संयमैकधुरंधराः ॥ १७ ॥ पद्विन्द्रिया युवानश्च परोपेक्षाविवर्जिताः । शीतोष्णतृष्णाक्षुन्निद्राविबाधासहनक्षमाः ॥ १८ ॥ बहूपकरणाः शान्ता गुर्वाज्ञापालनोद्यताः । अर्हन्ति साधवो नित्यं विहारं नापरे पुनः ॥ १९ ॥ विहारोपकरणानि यथा—सुसार्थो वासराः श्लाघ्या बहुता वस्त्रपात्रयोः । सर्वोपकरणव्रातो दण्डप्रोंछनकादिकः ॥ २० ॥ दण्डा अनेकधा भूरिपुस्तकत्वं च कम्बलाः । देहे समर्थता धैर्यं विहारेषु गवेष्यते ॥ २१ ॥ विहारायोग्यो देशो यथा—अनार्येषु सपापेषु सदुर्भिक्षेष्वसाधुषु । सविड्वरेष्वल्पजलश्राद्धेषूपप्लवेषु च ॥ २२ ॥ अनार्यदेशो यथा—सग १ जवण २ सबर ३ बबर ४ काय ५ सुरंडु ६ उड्डु ७ गुड्डु ८ फक्कणया ९ । अक्खायग १० होण ११ रोमय १२ पारस १३ खस १४ खासिया १५ चेव ॥ २३ ॥ दुंबिलय १६ लउस १७ बुक्कस १८ भिल्लिंद १९ पुलिंद २० कुंच २१ भमर २२ भया २३ । कोवाय २४ वीण २५ पंचुअ २६ मोलव २७ मालव २८ कुलग्घाय २९ ॥ २४ ॥ किक्कय ३० किराय ३१ हयमुह ३२ खरमुह ३३ गय ३४ तुरय ३५ मिंढय ३६ हाय ३७ मुहयकन्ना ३८ गयकन्ना ३९ अण्णेवि अणारिआ बहवो ॥ २५ ॥ पावाय चंडकम्मा अणारिआ निग्घिणा निरणुतावी । धम्मुत्ति अक्खराइं सुमिणे वि न नज्जए जेसु ॥ २६ ॥ विहारयोग्या यथा—आर्याः सुभिक्षसंपन्नाः परचक्रादिवर्जिताः । अविड्वराः सुपूजाश्च बहुश्राद्धर्षिसंकुलाः ॥ २७ ॥ आर्यदेशा यथा—रायगिहमगह १ चंपा अंगा २ तह तामलित्ति वंगाय ३ । कंचणउरं कलिंगा ४ वाणारसी चेव कासीअ ५ ॥ २८ ॥ साकेय कोसला ६ गयपुरं च कुरु

७ सोरियं च कुसट्टा य ८। कंपिल्लं पंचाला ९ अहिच्छता जंगला १० चेव ॥ २९ ॥ बारवइ य सुरट्ठा ११ मिहिल विदेहा य १२ वत्थ कोसंबी १३। वंदीपुर संडिब्भा १४ भद्दिलपुरमेव मलया १५ य ॥ ३० ॥ बेरसड-वत्थ १६ वरुणा अच्छा १७ तह मति आवइ दसणा १८ । सुत्तीमई इचेई १९ वीयभयं सिंधुसोवीरा २० ॥ ३१ ॥ महुरा य सूरसेणा २१ पावाभंगीअ २२ मासपुरिवट्टा २३ । सावत्थी अ कुणाला २४ कोकोडिब-रिसं च लाडा २५ ॥ ३२ ॥ से अंबिआ वि अनयरी केअर अद्धं च २६ आरियं भणिअं । जत्थुप्पत्तिजि-णाणं चक्कीणं रामकन्हाणं ॥ ३३ ॥ एतद्देशस्थितः साधुर्विहरेदीदृशे पदे । अनन्तरोक्तमालम्ब्य विधिं श्रेय-स्करं सदा ॥ ३४ ॥ प्रस्थानमूर्ध्वमुदितं दशकाद्नून-मर्वाक् धनुःशतकपञ्चकतः शुभाय । तत्रैव मण्डलिक-भूपतिशेषलोकैः स्थेयं नु सप्तदशपञ्चदिनं क्रमेण ॥ ३५ ॥ बुधेन्दुशुक्रजीवानां दिने प्रस्थानमुत्तमम् । पूर्ण-मास्याममायां च चतुर्दश्यां च नेष्यते ॥ ३६ ॥ अश्विनी पुष्यरेवत्यौ मृगो मूलं पुनर्वसू । हस्तज्येष्ठानुराधाः स्युर्यात्रायै तारकाबले ॥ ३७ ॥ विशाखाश्चोत्तरास्तिस्रस्तथार्द्राभरणीमघाः । अश्लेषा कृत्तिकाश्चैव मृत्यवे-न्यास्तु मध्यमाः ॥ ३८ ॥ ध्रुवैर्मिश्रैर्न पूर्वाह्णे क्रूरैर्मध्यदिने न भैः । अपराह्णे न च क्षिप्रैः प्रदोषे मृदुभिर्न च ॥ ३९ ॥ निशीथकाले नो तीक्ष्णैर्निशान्ते च चरैर्नहि । दिने शुभे दिवा यात्रा यात्रा निशि तु भैः शुभैः ॥ ४० ॥ प्राच्यादिदिक्चतुष्के क्रमाच्छुभोऽग्न्यादिसप्तकचतुष्कः । प्रागुत्तरयोः प्रत्यग्याम्योर्मध्योर्मिथोन्यथा परिघः ॥ ४१ ॥ सर्वदिग्गमने हस्तः श्रवणं रेवतीद्वयम् । मृगः पुष्यश्च सिद्ध्यै स्युः कालेषु निखिलेष्वपि ॥ ४२ ॥ प्रस्थानम्—म

गुरौ दक्षिणां गच्छेन्न पूर्वां शनिसोमयोः । शुक्रार्कयोः प्रतीचीं न नोत्तरां बुधभौमयोः ॥ ४३ ॥ मङ्गले मारुते शूलमीशाने शनिसौम्ययोः । नैर्ऋते शुक्रसूर्याभ्यामाग्नेये गुरुसोमयोः ॥ ४४ ॥ श्रीखण्डदधिमृत्तैलपिष्टसर्पिः खलान् क्रमात् । वारेर्कादौ सदा वन्द्या दिग्शूलाशुभभेदिनः ॥ ४५ ॥ दिक्शूलम् । पूर्वस्यामाषाढाश्रवण-धनिष्ठा विशाखिका याम्याम् । पुष्यो मूलमपाच्यां हस्तोदीच्यां च धिष्ण्यशूलानि ॥ ४६ ॥ नक्षत्रशूलम् । ज्येष्ठा भद्रपदा पूर्वा रोहिण्युत्तरफाल्गुनी । पूर्वादिषु क्रमात् कीला गतस्यैतेषु नागतिः ॥ ४७ ॥ कीला । पूर्वो-त्तराग्निनैर्ऋतयमवरुणसमीरशंकरककुप्सु । प्रतिपदमादौ कृत्वा नवम्यन्ताः भवन्ति योगिन्यः ॥ ४८ ॥ यत्रो-परि गता देवी ततो यामार्द्धभुक्तिका । भ्रमन्ती तेन मार्गेण भवेत्तत्कालयोगिनी ॥ ४९ ॥ योगिन्यः । अष्टासु प्रथमाद्येषु प्रहरार्द्धेष्वहर्निशम् । पूर्वस्या वामतो राहुस्तुर्यं सुर्यां व्रजेद्दिशम् ॥ ५० ॥ राहुः । जयाय दक्षिणे राहुर्योगिनी वामतस्तथा । पृष्ठतो द्वयमप्येतच्चन्द्रमाः संमुखः पुनः ॥ ५१ ॥ चन्द्रश्चरति पूर्वादौ क्रमाच्च दिक्-चतुष्टयम् । मेषादृक्षेषु यात्रायां संमुखस्त्वतिशोभनः ॥ ५२ ॥ शशिप्रवाहे गमनादि शस्तं सूर्यप्रवाहे नहिं किंचनापि । प्रष्टुर्जयः स्याद्वहमानभागे रिक्ते तु भागे विफलं समस्तम् ॥ ५३ ॥ प्राणप्रवेशो वहनाडिपादं कृत्वा पुरो दक्षिणमर्कबिम्बम् । गच्छेच्छुभायारिवधे तु सूर्यं पृष्ठे रिपुं शून्यगतं च कुर्यात् ॥ ५४ ॥ हंसः । याममयुग्मेषु रात्र्यन्तयामात् पूर्वदिशो रविः । यात्रास्मिन् दक्षिणे वामे प्रवेशः पृष्ठगे द्वयम् ॥ ५५ ॥ रविचारः। प्रतिदिनमेकैकस्यां दिशि पाशः संमुखोस्य कालः स्यात् । प्राच्यां शुक्लप्रतिपद्मारभ्य ततः क्रमान्मासम्

॥ ५६ ॥ पाशकालौ । कन्यात्रये स्थितेर्के प्राच्यां धनुषस्त्रयेपि याम्याम् । मीनत्रये परस्यां मिथुनत्रयेपि कौबेर्याम् ॥ ५७ ॥ वत्सोभ्युदेति यस्मिन्न संमुखः शस्यते प्रवासविधिः । चैत्यादीनां द्वारं नार्चादीनां प्रवेशश्च ॥५८॥ अग्रतो हरते आयुः पृष्ठतो हरते धनम् । वामदक्षिणयोर्वत्सः सर्वकालं पुनः शुभः ॥ ५९ ॥ वत्सः । उदयति दिशि यस्यां याति यत्र भ्रमेद्वा विचरति नभचक्रे येषु दिग्द्वारभेषु । त्रिविधमिह सितस्य प्रोच्यते संमुखत्वं मुनिभिरुदय एव त्यज्यते तत्र यत्नात् ॥ ६० ॥ संमुखो लोचनं हन्ति दक्षिणेऽशुभकारकः । वामतः पृष्ठतश्चैकः प्रोक्तः शुक्रः शुभो बुधैः ॥ ६१ ॥" इति श्लोकोक्ततिथिवारलग्नेषु नक्षत्रचन्द्रताराबलयोः शकुनानुकूल्ये च विहरेत् । शकुनानुकूल्यं तु वसन्तराजशकुनार्णवयोरवसेयम् । तथा च चतुर्मास्यनन्तरं पौर्णमास्यां विहारकर्मणि वर्जितायां तदर्वाक् त्रयोदश्यामपि विहारमनुमन्यन्ते गीतार्थाः ॥ "आपृच्छ्य श्राद्धजनं क्षेत्रसुरं नृपतिमथ सुसाधुजनं । गुरुणानुज्ञातः सन् विहरेद्दिवसे न च रजन्यां ॥ १ ॥ मासमपि यत्र तिष्ठति साधुर्गृह्णाति तत्र षडनुज्ञाः । शक्रक्षेत्रामरनृपतिसाधुपुरमुख्यगुरुकथिताः ॥ २ ॥" यदुक्तमागमे "देविंद्रायगिहवइसागरसाहम्मि उग्गहे पंच । गुरु ऊग्गहिइ पुणो इह आउपमाणो चउदिसंपि ॥ ३ ॥" मुनिर्यत्र तिष्ठेत्तत्र षड्भिरनुज्ञातः, अन्यथा तु षडनुज्ञारहितः स्थितिप्रस्थितिभ्यां मुनेरदत्तादानव्रतभङ्गः इति हेमन्त ऋतुचर्या । "शिशिरे मुनिराधत्ते चर्यां हेमन्तवत् पुनः । न श्लेष्मलं किंचनापि भुञ्जीत न जलं बहु ॥ १ ॥" इति शिशिरचर्या । "वसन्तेथ मुनिः कुर्याद्भूषात्यागं तु सर्वथा । गृह्णीयाद्विरसाहारं न वस्त्रं चैव

शोभनम् ॥ १ ॥ सर्वदा मुनयो ब्रह्मयुक्तियुक्ता भवन्ति हि । विशेषेण वसन्ते तु स कालो हि स्मरोल्बणः ॥ २ ॥ भिक्षाविशुद्धिं कुर्वीत विहारं च दिने दिने । प्रायेण निर्जनेरण्ये वसेत् स्त्रीपशुवर्जिते ॥ ३ ॥ व्यायामशीलो हि मुनिस्तिष्ठेत् सुरभिसंगमे । अस्वाध्यायनिवृत्त्यर्थं विदध्यात् कल्पतर्पणम् ॥ ४ ॥" अत्र च चैत्रशुद्धपञ्चमीमारभ्य वैशाखकृष्णप्रतिपदं यावत् भूमण्डले सर्वत्र निजनिजकुलदेवतापूजनार्थं जनाः सर्वेपि पशुमहिषवधं विदधति, तेन मुनीनामस्वाध्यायः कालः, न तत्रागमपाठकालग्रहणादि कल्पते । ततस्तदपनयनार्थं कल्पतर्पणं कुर्यात् । तस्य चायं विधिः, वैशाखकृष्णप्रतिपदि व्यतीतायामालोचनात्तपोयोग्ये दिने "मृदुध्रुवचरक्षिप्रैर्वारे भौमं शनिं विना । आद्याटनतपोनन्द्यालोचनादिषु भं शुभम् ॥ १ ॥" मुनयोल्पजलैर्वस्त्राणि क्षालयन्ति, ततः पूर्वाह्णे अपराह्णे वा ऐर्यापथिकीं प्रतिक्रम्य मुखवस्त्रिकां प्रतिलिख्य द्वादशावर्तवन्दनकं दत्त्वा क्षमाश्रमणपूर्वं भणति "भगवन् छमासिकायसंदिसावओ भगवन् छमासिकायपडिगाहउं" गुरुः कथयति "संदिसावेह पडिगाहेह" ततो मुनियुग्मं संघट्टं विधाय पूर्वोक्तयुक्त्या तृप्तिकरणं गृहीत्वा गृहस्थगृहं प्रतिनिर्गच्छति, तत्र शुभाशुभशकुनान्वेषणं कुर्यात्, यदि शुभं शकुनादि भवति तदा गन्तव्यं, नोचेदन्यस्मिन् शुभदिने कल्पतर्पणारम्भो विधेयः, शुभे शकुने तु गृहस्थगृहं गत्वा तृप्तिकरणे प्रासुकजलं गृहीत्वा ततो गृहस्थकांस्यकचोलकेन सधवाकरेण कल्पतर्पणजलं स्कन्धकम्बलिकाञ्चलयुतेन दक्षिणहस्तेन धारयित्वा तयैव रीत्या वसतिमानयेत् शुभपट्टकोपरि स्थापयेच्च । ततः सर्वेपि साधव ऐर्यापथिकीं प्रतिक्रम्य

गुरुज्येष्ठान् क्रमेण स्तोकोदकेन पादौ प्रक्षाल्य कल्पतर्पणं गृह्णन्ति, तस्येयं रीतिः—कल्पतर्पणग्राही पट्टकस्थः पादौ भूमावस्पृष्टौ कुर्यात्, मिलितौ करौ च प्रसारयेत्, ततोन्ययतिर्लघुरजोहरण्यग्रेण कल्पतर्पणजलं मनाग्मनाग् विकिरति, स च तद्ग्राही पूर्वं कराभ्यां गृह्णाति, तत अध उपरि करौ निधाय च, ततः स्कन्धसंमुखं स्नानमुद्रया, ततः पट्टसंमुखं च, ततो मुनयः स्वस्वोपकरणानि प्रतिलिख्य प्रतिलिख्य कल्पतर्पणजलेनाभिषिञ्चन्ति वसतिं च तथैव। इति कल्पतर्पणविधिः। अयं च विधिः कार्तिककृष्णप्रतिपदनन्तरमपि विधीयते, तथा च प्रमादात् संनिधिस्थित्यां सिद्धान्तस्य च वाचने ॥ नवरात्रद्वयेऽतीते कल्पतर्पणमिष्यते॥ इति वसन्तचर्या ॥ "अथ ग्रीष्मे च मुनयः कायोत्सर्गपरायणाः। आतापयन्त आत्मानं कुर्वन्त्यातपसेवनम् ॥ १ ॥ न शीतलजलाकाङ्क्षां न शीतस्थानसेवनम्। न पानकादिपानं च कुर्वते स्नानमेव च ॥ २ ॥ वैयावृत्यकृतां क्वापि सन्तोषाय मुनीश्वराः। गृह्णन्ति पानकादीनि शीतस्थानजलादि च ॥ ३ ॥ सहन्ते प्रायशस्तत्र मलदंशपरीषहम्। नार्तिं च कुर्वते क्वापि न रतिं च मुनीश्वराः ॥ ४ ॥ अस्नानव्रतमादिष्टं मुनीनां सर्वदा जिनैः। ग्रीष्मे विशेषात् सिद्धान्तमध्योक्तमभिधीयते ॥ ५ ॥ संतिमे सुहमा पाणा घसासु भिलुगासु य। जेउ भिक्खू सिणायंतो (ते) विडे लुप्पिलाधए ॥ ६ ॥ तम्हा ते न सिणायंति सीएण उसिणेण वा। जावज्जीवं वयं घोरं असिणाणमहिट्ठगा ॥ ७ ॥ सिणाणं अदुवा कप्पं लद्धं पउमगाणिआ। गायस्सु वट्टणट्ठाए नायरंति कयाइवि ॥ ८ ॥ ग्रीष्मे षट्पदिकारक्षां विशेषात् कुरुते मुनिः। चिरकालोषितं पानमन्नं प्रासुकमुज्झति ॥ ९ ॥" इति

ग्रीष्मऋतुचर्या । वर्षाकाले साधूनामुच्चारप्रस्रवणखेलहेतुमात्रकत्रयं गवेष्यते । "अथ वर्षासु साधुः स्याद्विहारक्रिययोज्झितः । एकस्थाने स्थितिं कुर्यात् सुखिते निरुपद्रवे ॥ १ ॥ गृहस्थैरात्मनोर्थे च कृतानि रुचिराणि च । घृष्टमृष्टानि सद्मानि श्रयेत् खातजलानि च ॥ २ ॥ प्रहरे प्रहरे पात्रं मार्जयेत् फुल्लिभीतितः । आरोग्यार्थं संयमार्थं विकृतीः सर्वथा त्यजेत् ॥ ३ ॥ ग्लानः कश्चन गृह्णाति न दोषस्तत्र विद्यते । नियमांश्च पुनः कुर्याद्यथाशक्ति घनागमे ॥ ४ ॥ काष्ठासनेष्वासनं च काष्ठपट्टेषु संलयम् । तदा विदधते धीराः प्राणिरक्षार्थमेव च ॥ ५ ॥ पक्वान्नमपि सिद्धान्नं न गृह्णीयाच्चिरोषितम् । न ग्राह्यं गृहिवेश्मभ्यः पानान्नौषधवर्जितम् ॥ ६ ॥ पूर्वं परिगृहीतं च पात्रपट्टादि न त्यजेत् । नव्यं न परिगृह्णीयात् पौषधागारमध्यगम् ॥ ७ ॥ निर्जलायां दिशि प्राप्ते कार्ये महति सांघिके । सपादयोजनं पञ्चयोजनीं वा व्रजेन्मुनिः ॥ ८ ॥ निशायां तत्र न स्थेयं द्विवैबालयमाव्रजेत् । पानीयं प्रायशश्चोष्णं गृह्णीयात् काञ्जिकं च वा ॥ ९ ॥ पाणिपात्रो मुनिस्तत्र सूक्ष्ममेघेपि वर्षति । न गच्छेत् क्वापि भिक्षार्थं यावन्निर्मेघता भवेत् ॥ १० ॥ साधुः पात्रधरो मेघे सूक्ष्मे वर्षति कर्हिचित् । निर्याति कम्बलच्छन्नो भिक्षायै क्षुत्परीषहात् ॥ ११ ॥ तत्र याते महत्यब्दे तिष्ठेद्देवकुलेऽथवा । उपाश्रयेष्वारामे वा चरेदल्पे घने ततः ॥ १२ ॥ स्नेहं पुष्पं तथोत्तिंगं प्राणमण्डं च फुल्लिकाम् । बीजं च हरितां चाष्ट सूक्ष्माणि परिरक्षति ॥ १३ ॥ तानि सूक्ष्माणि च स्वस्ववर्णैर्वस्तुभिराश्रयात् । भवन्ति प्रतिलेख्यानि साधुभिश्च समाहितैः ॥ १४ ॥ गृहस्थगृहमायाति मुनौ वर्षति वारिदे । यद्दृष्ट्वा पच्यते तत्र गृह्णन्ति मुनिपुङ्गवाः

॥ १५ ॥ मुनिर्वर्षागमे किंचित् तपः संधातुमिच्छति । कायोत्सर्गे तथा योगोद्वहनं लीनतामपि ॥ १६ ॥ विकृ-
त्याहरणं चैव तथा दिग्गमनं क्वचित् । ईहते तत्परं सर्वं गुर्वादेशाद्विधीयते ॥ १७ ॥ प्रमार्जनादिकं कर्म वि-
धेयं च पुनः पुनः । दिशं वा विदिशं गच्छेदन्यसाधौ प्रकाश्य ताम् ॥ १८ ॥ एवं भाद्रपदे शुक्लपञ्चम्यां पर्व-
सत्तमम् । भवेत् पर्युषणा नाम चतुर्थ्यामपि वा क्वचित् ॥ १९ ॥ पर्युषणापरिवार्जितमन्यत् पर्वोत्सवश्रुतत-
पांसि । कुर्वीत न मलमासे प्रारब्धतपस्तु विदधीत ॥ २० ॥ उपवासव्रतं चैव मुक्त्वा पर्युषणामपि । देवपि-
त्र्यादिकं चान्यत् मलमासे न कारयेत् ॥ २१ ॥ विवाहदीक्षाव्रतबन्धकर्माण्यारम्भमुद्यापनमुज्झयित्वा । अ-
न्यानि पित्र्याणि सदैवतानि विधापयेदेव बुधोपि मासे ॥ २२ ॥ लौकिकेपि—अग्न्याधेयं प्रतिष्ठां च यज्ञा-
दानप्रतिग्रहान् । वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः ॥ २३ ॥ मङ्गल्यमभिषेकं च मलमासे विवर्जयेत् । मल-
मासज्ञानं यथा—अमावास्याद्वयं यत्र द्वयसंक्रमणान्तरे । मलमासः स विज्ञेयस्त्यक्त्वा पञ्च तुलादिकाः ॥२४॥
अमावास्यामतिक्रम्य यदा स्यात्संक्रमो रवेः । स पाश्चात्यो मलो मासः शुद्धोऽग्रे मास उच्यते ॥ २५ ॥ पज्जु-
सणे चउमासे पक्खियपव्वट्ठमीसु नायव्वा । ताओ तिहिओ जासिं उवेइ सूरो न अन्नाओ ॥ २६ ॥ पच्च-
क्खाणं पूआ जिणंदचंदाण तासु कायव्वा । इहरा आणाभंगो आणाभंगंमि मिच्छत्तं ॥ २७ ॥ दशाश्रुत-
स्कन्धभाष्यात्—उदये या तिथिः प्रोक्ता घटिकैकापि या भवेत् । सा तिथिः सकला ज्ञेया विपरीता तु पैतृके
॥ २८ ॥ यां तिथिं समनुप्राप्योदयं याति दिवाकरः । पलार्द्धं च पलांशं ~ नां प्रशंसन्ति दैविकाः ॥ २९ ॥

अन्यच्च मलमासवर्ज्यमाह—सर्वं विवर्जितं कर्म भानुलङ्घाधिमासयोः । पैतृकं त्वधिमासेपि कुर्यान्नो भानुलङ्घिते ॥ ३० ॥ यथा—अनित्यमनिमित्तं च दानं च महदादिकम् । अग्न्याधानाध्वरास्तीर्थोदेवयात्रामरेक्षणम् ॥ ३१ ॥ देवारामतडागादिप्रतिष्ठा मौञ्जिबन्धनम् । अग्नीनां स्वीकृतिः काम्यवृषोत्सर्गस्य निष्क्रमः॥३२॥ राज्ञोभिषेकः प्रथमश्चूडाकर्मव्रतानि च । अन्नप्राशनमारम्भो गृहाणां च प्रवेशनम् ॥ ३३ ॥ व्रतारम्भसमाप्तिं च कर्म काम्यं च पाप्मनः । प्रायश्चित्तं च सर्वस्य मलमासे विवर्जयेत् ॥ ३४ ॥ तत्र सङ्घसमक्षं च विदध्यात् कल्पवाचनाम् । तथा केशापनयनं विधिस्तस्याभिधीयते ॥ ३५ ॥" यथा तत्र साधूनां केशापनयनं त्रिधा, क्षुरमुण्डनं कर्त्तरीमुण्डनं लोचश्च पक्षे २ कर्तरीमुण्डनम्, मासे २ क्षुरमुण्डनम्, चतुर्मासान्ते षण्मासान्ते वर्षान्ते वा लोचः, क्षुरमुण्डनकर्तरीमुण्डनयोरपि क्षमाश्रमणवन्दनकादि सर्वं लोचवत् नवरं "दुक्करं कियं इगिणी साहिया" इति गुरुवचनं लोचं विना अन्यत्र न । "हस्तत्रये मृगज्येष्ठे पौष्णादित्यश्रुतिद्वये । क्षुरकर्म शुभं प्रोक्तं कार्यौत्सुक्ये तु सर्वदा ॥ १ ॥" इह यदुक्तं कार्यौत्सुक्ये तु सर्वदेति—"तीर्थे प्रेतक्रियायां च दीक्षायामौपपातिके । पितृमातृक्षये क्षौरे नक्षत्रादि न चिन्तयेत् ॥ १ ॥" तत्रोपनयनप्रव्रज्याचार्यपदस्थापनपर्युषणादिषु नियमाल्लोचमुण्डनादि कर्तव्यमेव । तत्र यदि क्षौरनक्षत्रं न स्यात् तथापि तत्कार्यौत्सुक्ये प्रोक्तव्यतिरिक्तेऽपि नक्षत्रे लोचादिक्षुरकर्म विधेयम् । स च लोचः कैश्चिद्भाद्रपदपौषवैशाखेषु चातुर्मासिको विधीयते, कैश्चिच्च भाद्रपदफाल्गुनयोः षाण्मासिकः क्रियते, कैश्चित्सांवत्सरिको भाद्रपदे पर्युषणासन्न एव विधी-

यते। अथ तदर्थं लोचविधिरभिधीयते—यथा कार्योत्सुकयवर्जिते लोचे शुभेषु क्षौरनक्षत्रतिथिवारेषु चन्द्रबले च लोचकारयिता दृढसत्त्वो गुरुपुरतः ऐर्यापथिकीं प्रतिक्रम्य क्षमाश्रमणपूर्वं भणति "भगवन् लोचमुहपत्तिअं पडिलेहेमि" ततो मुखवस्त्रिकां प्रतिलिख्य क्षमाश्र० "भगवन् लोयं संदिसावेमि" गुरुः कथयति "संदिसावेह अणुन्नायं मए" ततो लोचकारयिता साधून् विनयपूर्वकमर्थयित्वा लोचं कारयति, ततो लोचानन्तरं मुनिरैर्यापथिकीं प्रतिक्रम्य चैत्यवन्दनं कुर्यात्, ततो गुरुपुरः समेत्य मुखवस्त्रिकां प्रतिलिख्य द्वादशावर्तवन्दनकं ददाति ततः क्षमाश्र० भगवन् "लोयं पवेएमि संदिसह किं भणामो" गुरुः कथयति "वंदित्ता पवेएह" पुनः शिष्यः क्षमाश्रम० "केसा मे पज्जुसिआ इच्छामि अणुसट्ठिं" गुरुः कथयति "दुक्करं कियं इगिणी साहिआ" पुनः शिष्यः क्षमाश्रम० "तुम्हाणं पवेइयं संदिसह साहूणं पवेएमि" गुरुः कथयति "खमासमणाणं हत्थेणं सुत्तेणं अत्थेणं तदुभएणं गुरुगुणेहिं वुड्ढाहिं नित्थारग पारगो होइ" ततः शिष्यः क्षमाश्रम० "संदिसह काउस्सग्गं करेमि ततः केसेसु पज्जवसिज्जमाणेसु सम्मं जन्न अहिआसिअं कूइयं कक्कराइअं तस्स ओहडावणिअत्थं करेमि काउस्सग्गं अन्नत्थ उ० जाव अप्पाणं वोसिरामि" चतुर्विंशतिस्तवचिन्तनं चतुर्विंशतिस्तवभणनं। केचिन्नमस्कारं चिन्तयन्ति भणन्ति च। ततो लोचकारयिता यथायुक्त्या साधून् वन्दते। जिनकल्पिनां लोचदिने उपवासः स्थविरकल्पिनामाचाम्लमन्यद्वा प्रत्याख्यानं यथाशक्ति। इति लोचविधिः। "सामान्यमुनयो वस्त्रक्षालनं प्रावृषि क्वचित्। कुर्वन्ति श्रूयते यस्माद्वाक्यं प्रवचनोदितम्॥ १॥

अप्पत्ति अंपिअ वासे सव्वं उवहिं धुवंति जयणाए । असईए उवग्गस्स ऊ जलओ पायमिज्जोगो ॥ २ ॥
आयरियगिलाणाणं मयला मयला पुणो वि धोविज्जा । साहुगुरुणाओ लोगम्मिवि जीरणं इयरे ॥ ३ ॥"
साधवः सर्वेपि ग्रीष्मान्ते सर्वाणि वस्त्राणि क्षालयन्ति न वर्षासु उपधिं विशेषेण । तथा च आचार्योपाध्याय-
ग्लानवस्त्राणि दैवतवस्त्राणि च मलिनानि मलिनानि सर्वदैव क्षालयन्ति । तथा च प्रहरत्रयादुपरि प्रासुकं
वारि तिलोदगं तुषोदकं यवोदकं उष्णोदकं न कल्पते तच्च सचित्ततामेति । यत उक्तमागमे—"उसिणोदकं
तिदंडुक्कलिअं फासुअ जलं च जइ कप्पं । नवरि गिलाणाइकए पहरतिगोवरि वि अरि अव्वं ॥ १ ॥ जायइ
सचित्तयासे गिम्हंमि य पहरपंचगस्सुवरि । चउ पहरुवरि सिसिरे वासासु पुणो तिपहरुवरि ॥ २ ॥
इमामेवंविधां चर्यां वहन्तो मुनिकुञ्जराः । वर्षाकालमतिक्रम्य शरदं प्राप्नुवन्ति ते ॥ ३ ॥ इति वर्षर्तुचर्या ।
शरत्कालेपि साधूनामियं चर्या प्रकीर्तिता । न विहारो न वा वस्त्रादानं पानान्नवर्जितम् ॥ ४ ॥" इति शर-
च्चर्या । अथ व्याख्याविधिः । "आचार्या वा उपाध्याया मुनयश्च महत्तराः । सङ्घाग्रतो यद् व्याख्यानं कुर्वन्ति
तदिहोच्यते ॥ १ ॥ उत्कालिकं कालिकं च सिद्धान्तं द्वादशाङ्गकम् । व्याख्येयमत्र योगादि कायोत्सर्गसम-
न्वितम् ॥ २ ॥ त्रिषष्टिशलाकापुंसां चरितान्यखिलान्यपि । तथा च गणभृत्साधुसाध्वीनां च पुरातनम् ॥३॥
श्रावकाणां श्राविकाणां धर्मदृष्टान्तहेतवे । कथानकानि मुनयः कथयन्ति सविस्तरम् ॥ ४ ॥ अनित्यतामश-
रणं भवमेकत्वमन्यताम् । अशौचमाश्रवविधिं संवरं कर्मनिर्जरम् ॥ ५ ॥ धर्मस्वाख्याततालोकं द्वादशीं बोध-

भावनाम् । व्याख्यान्ति मुनयः प्राय इति द्वादश भावनाः ॥ ६ ॥ सिद्धान्तटीकाचूर्ण्यादिप्रसङ्गादपरं पुनः । प्रमाणशास्त्रं जैनं च व्याख्येयं ध्येयमेव च ॥ ७ ॥ अन्यानि पठनीयानि तर्कसंवादहेतवे । तत्त्वं धर्मानुषंगत्वं व्याख्येयं परमार्हतम् ॥ ८ ॥ निरुक्तिज्योतिषं छन्दः शिक्षा व्याकरणं तथा । कल्पः षडङ्गमध्येतव्या शास्त्रव्याख्यानहेतवे ॥ ९ वेदाः पुराणानि तथा स्मृतयः शिल्पभाषितम् । एतानि नाध्येतव्यानि व्याख्येयानि न कुत्रचित् ॥ १० ॥ वैद्यकं कामशास्त्रं च दण्डनीतिं च जीविकाम् । मीमांसामिति शास्त्राणि न पठन्ति मुनीश्वराः ॥ ११ ॥ वर्षाकाले विशेषेण साधुर्धर्मकथां वदेत् । यतो हि धर्मकालस्सोपरकार्यविवर्जितः ॥ १२ ॥ तथा पर्युषणासन्ने काले कल्पस्य वाचनाम् । कुर्वन्ति मुनयः शान्ताः सर्वथैव दिनत्रयम् ॥ १३ ॥ तत्र श्राद्धप्रार्थनायां विधेयो वाचनाक्रमः । यत्तत्र ते विदधति सङ्घार्चनमहोत्सवम् ॥ १४ ॥ अथवा सर्वशास्त्राणि पठनीयानि साधुभिः । व्याख्यानं चरणं चैव विधेयं परमागमे ॥ १५ ॥ यत उक्तमागमे—सव्वं सिक्खियव्वं न समायरियव्वम् ॥ इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायणे ऋतुचर्याव्याख्यानकीर्तनो नाम एकत्रिंशत्तम उदयः ॥ ३१ ॥

द्वात्रिंशत्तम उदयः ।

अथ मुनीनामन्तसंलेखनाविधिः ।

सा च नीरोगाणां कर्मक्षयमोक्षकाङ्क्षिणामप्राप्तेपि मरणकाले द्वादशवर्षा भवति । सायथा—"चत्तारि

विचित्ताइं विगइनिज्जूहियाइं चत्तारि। सं .नर अ दुन्नि उ एगंतरिअं च आयामं ॥ १ ॥ ताइं निविगओ अ तवो छम्मासे परिमिअं च आयामं। अवरे वि अ छमासे होइ विगिट्ठं तवो कम्मं ॥ २ ॥ वासं कोडी सहिअं आयामं कट्टु आणुपुव्वीए। गिरिकंदरं च गंतुं पाओवगमं पव्वज्जेइ ॥ ३ ॥" चतुःसंवत्सरीं यावत् विचित्राणि तपांसि अन्तरितान्येकभक्तेः षष्ठाष्टमदशमद्वादशचतुर्दशपक्षक्षपणमासक्षपणादीनि। ततः पुनः चतुःसंवत्सरीं यावत्तान्येव तपांसि निर्विकृतिकान्तरितानि। ततः संवत्सरद्वयं यावत् निर्विकृतिकान्तरितान्याचाम्लानि। ततः षण्मासीं यावत् चतुर्थषष्ठादितपःकरणे परिमितभोजनमाचाम्लम्। ततः षण्मासीं यावद्दशमतप आचाम्लान्तरितम्। ततो वर्षं यावत् कोटिसहितमाचाम्लमाचाम्लस्य कोट्याग्रभागेणान्याचाम्लकोटिं मीलयति निरन्तराचाम्लमित्यर्थः। ततो गिरिगह्वरे गत्वा पादपोपगमानशनं कृत्वा वाञ्छितां गतिं प्राप्नोति। इति द्वादशवार्षिकीसंलेखना अन्तरापि द्वादशवर्षाणां मृतस्य साधोर्न दोषः। "अथागमोक्तरीत्या च व्रतं पालयतो मुनेः। कदाचिज्जायते रोगः कष्टाद्वा पूर्वकर्मतः ॥ १ ॥ चिकित्सा तत्र नो कार्या स चेदार्तिं न गच्छति। आर्तिं गच्छति कर्तव्या प्रधानस्य मुनेः पुनः ॥ २ ॥ कर्तव्यैव स रक्ष्यः स्यादुपायैर्विषमैरपि। अकृत्यैरपि तेन स्याद्विना शून्यं च शासनम् ॥ ३ ॥" यत उक्तमागमे "मा कुणउ जइ तिगित्थं अहियासेउण जइ तरइ सम्मं। अहिया संतस्स पुणो जइ से जोगा न हायंति ॥ ४ ॥ निच्चं पवयणसोहा (करण) चरणुज्जुयाणं साहूणं। संविग्गविहारीणं सव्वपयत्तेण कायव्वं ॥ ५ ॥ हीणस्स विसुद्धपरूवगस्स नाणाहि-

अस्स कायव्वं । जिणकप्पग्गहणत्थं[1] करंति लिंगावसेसे वि ॥ ६ ॥ कृते चिकित्सिते बाढं यदि रोगो न शाम्यति । तदा ध्रुवं मुनेर्ज्ञेयं मरणं पूर्णे आयुषि ॥ ७ ॥" तथा च श्रीयोगशास्त्रपञ्चमप्रकाशोदितबाह्याभ्यन्तरकालज्ञानचिह्नैर्मरणमासन्नं विज्ञाय मुनेरन्त्याराधना विधेया, तस्या ईदृशो विधिः—"नाव(श्यं)भाविनि मरणे दिनमुहूर्तादिशुद्धिर्गवेष्या, तत्र ग्लानसमीपे चतुर्विधसङ्घसंघट्टनापूर्वं जिनबिम्बमानयेत् । ततो ग्लानस्य दृष्टौ प्राप्तसत्त्वे वा ग्लाने सहचारिणि स्थापितार्हत्स्तुतिचतुष्कयुक्तां चैत्यवन्दनां कुर्यात् । ततः शान्तिनाथश्रुतक्षेत्रभुवनशासनवैयावृत्यकरदेवताकायोत्सर्गस्तुतयः पूर्ववत् । ततः आराधनादेवताकायोत्सर्गश्चतुर्विंशतिस्तवचतुष्कचिन्तनं मुखेन चतुर्विंशतिस्तवपठनं पुनः शक्रस्तवं पठित्वा शान्तिनाथस्तोत्रभणनं, जयवीयरायगाथाकथनं, ततः आराधनाकारकः आचार्य उपाध्यायः साधुर्वाचनाचार्यौ वा निषद्यायामुपविश्य वासाभिमन्त्रणं करोति । ततः उत्तमार्थाराधनार्थं "वासक्खेवं करेह" इतिग्लानमुखात् कथापयित्वा तच्छिरसि वासाक्षतक्षेपं कुर्यात् । ततो ग्लानो नमस्कारत्रयं पाठपूर्वकं पठति । "जेमे जाणं ति जिणा अवराहा जेसु जेसु ठाणेसु । तेहिं आलोएमि आउवठिओ सव्व कालं पि ॥ १ ॥ छउमत्थो मूढमणो कित्तिअमित्तं पि संभरइ जीवो । जं चन समरामि अहं मिच्छामिदुक्कडं तस्स ॥ २ ॥ जंजं मणेणं बद्धं जंजं वायाइ भासिअं किंचि । जं जं काएण कयं मिच्छामि दुक्कडं तस्स ॥ ३ ॥ गहि ऊणय मुक्कायं जम्मणमरणेसु जाइं देहाइं ।

१ जणविसगाहत्थं इति पाठान्तरम् ।

पावेसु पसत्ताइं वोसिरि आइं मए ताइं ॥ ४ ॥" इति (गाथा) ग्लानाद्भाणयित्वा तस्यालोचनां दद्यात्। आलोचनाविधिस्तु प्रायश्चित्ताधिकारादवसेयः। ततो ग्लानः प्रत्येकमाचार्योपाध्यायसाधुसाध्वीश्रावकश्राविकाः क्षमयति। तत इतिगाथां कथयेत्—"साहूय साहूणीओ सावय सावीओ चउ विहो संघो। जम्मणवइ काए हिआ आ साइओ तंपि खामेमि ॥ १ ॥ आयरिय उवज्झाए सीसे साहम्मिए कुलगणे अ। जे मे कया कसाया सव्वे तेसिंच खामेमि ॥ २ ॥ खामेमि सव्वजीवे सव्वे जीवा खमंतु मे। मित्ति मे सव्वभूएसु वेरं मज्झ न केणइ ॥ ३ ॥ अरिहंत देवो गुरुणो सुसाहुणो महप्पमाणं इअ समत्तं गहिअं मए विसेसेण चरणम्मि ॥ ४ ॥" ततो ग्लानः "करेमि भंते सामाइयं० इति सर्वविरतिसामायिकदण्डकं त्रिरुच्चरति। तत उत्थापनावत् त्रिः पञ्चमहाव्रतोच्चारणं करोति। ततः चत्तारि मंगलं इत्यारभ्य केवलिपन्नत्तं धम्मं सरणं पवज्जामि इति पर्यन्तं त्रिरुच्चरति, ततो नमस्कारभणनपूर्वं नमो समणस्स भगवओ महइ महावीरस्स उत्तिमट्ठिए ठाइमाणो पच्चक्खाइ सव्वं पाणाइवायं १ सव्वं मुसावायं २ सव्वं अदिन्नादाणं ३ सव्वं मेहुणं ४ सव्वं परिग्गहं ५ सव्वं कोहं ६ सव्वं माणं ७ सव्वं मायं ८ सव्वं लोहं ९ पिज्जं १० दोसं ११ कलहं १२ अज्झक्खाणं १३ अरइरइ १४ पेसुन्नं १५ परपरिवायं १६ मायामोसं १७ मिच्छादंसणसल्लं १८ इच्चेइयाइं अट्ठारसपावट्ठाणाइं तिविहं तिविहेणं वोसरइ, ततो भवचरिमं पच्चक्खाइ तिविहंपि आहारं असणं खाइमं साइमं अन्नत्थणा भोगेणं सहसागारेणं महत्तरागारेणं सव्वसमाहिवत्तिआगारेणं वोसिरामि। इति सागा-

रमनशनप्रत्याख्यानम् । अणागारं तु भवचरिमं तु पच्चक्खाइ चउविहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थणा० सहसा० वोसिरामि इत्यानागारमिदम् । ततः संघः शान्तिनिमित्तं "नित्थारगपारगाहोइ" इति भणन् तत्संमुखं वासाक्षतानि क्षिपति, तदा तस्य कृतानशनस्य मुनेः त्रिविधाहारप्रत्याख्यानस्य केवलमुष्णोदकमेव देयं नान्यत् । तस्याग्रतः "अट्ठावयम्मि उसहो वीरो पावाइ चंप ·वसुपुज्जो। उज्जतम्मि उनेमी सम्मेए सेसया सिद्धा ॥ १ ॥ निव्वाणं संपत्तो चउदसभत्तेण पढमजिनचंदो । सेसा मासिएणं वीरजिणंदो य छट्ठेणं ॥ २ ॥ एगागी वीरजिणो तित्तिसमुणीहिं संजुओ पासो । पंचहिं सएहिं छत्तीसएहिं नेमी गओ सिद्धिं ॥ ३ ॥ मल्लिसुपासं पंचहिं सएहिं छहिं वासुपुज्ज जिणनाहो । अट्ठहिसएहिं धम्मो तिउत्तरेहिं च पउमाभो ॥ ४ ॥ नवहिं सएहिं संती छहिं सहस्सेहिं परिबुडो विमलो । उसहदससत्तणंतो सेसा उ सहस्स परिवारा ॥ ५ ॥ मा सुयह जग्गियव्वे पलाइअव्वे य कीसवीसमह । तिन्निजणा अणुलग्गा रोगो य जरा य मच्चू य ॥ ६ ॥ हा जीव पाव भमिहि सिज्जाइ जोणीसयाइं बहु आइं । भवसयसहस्स दुलहंपि जिणमयं एरिसं लद्धुं ॥ ७ ॥ पावो पमायवसओ जीवो संसारकज्ज मुज्जुत्तो । दुक्खेहिं न निव्विन्नो सुखेहि न चेव परितुट्ठो ॥ ८ ॥ जीवेण जाणिअ विसज्जिआणि जाइसएसु देहाणि । थेवेहि तओ सयलंपि तिहुयणं हुज्ज पडिहत्थं ॥ १ ॥ नहदंत मंसकेसट्ठिएसु जीवेण विप्पमुक्केसु । तेसुवि हविज्ज कविलासमेरुगिरिसंनिहा कूडा ॥ १० ॥ हिमवंत मलय मंदर दीवोदहि धरणि सरिसरासीओ । अहियअरो आहारो छुहिहणा हारिओ

॥ १३७ ॥

हुज्जा ॥ ११ ॥ जं नेण जलं पीयं थमायवजमडिएण तंपि इह । सव्वेसुवि अगडतलायनइसमुदेसु न वि हुज्जा ॥ १२ ॥ पीयं त्थणयत्थरं सागरसलिलाओ बहुपरं हुज्जा । संसारम्मि अणंते माऊणं अन्नमन्नाणं ॥ १३ ॥ पत्ता य कामभोगा कालमणंतं इहं सउवभोगा । अपुव्वं पिव मन्नइ तहवि हु जीवो मणे सुक्खम् ॥ १४ ॥ जाणइ अ जहा भोगिड्ढि संपया सव्वमेव धम्मफलं । तहवि दढमूढहियओ पावे कम्मे जणो रमइ ॥ १५ ॥ जाणिज्जइ चिंतिज्जइ जम्मजरामरणसंभवं दुक्खं । नय विसएसु विरज्जइ अहो सुबद्धो कवडगंठी ॥ १६ ॥ जाणइ य जह मरिज्जइ अमरं तंपि हु जरा विणासेइ । नय उविग्गो लोओ अहो रहस्सं सुनिम्मायं ॥ १७ ॥ दुपयं चउप्पयं बहुपयं च अपयं समिद्ध महणं वा । अणविकएवि कयन्तो हरइहयासो अपरितंतो ॥ १८ ॥ गयणस्स अणं तत्तं अप्पडिघाओ जहेव जीयस्स । तह उत्तमाण जाए धीरत्तं मरणसमयम्मि ॥ १९ ॥" नय न ज्जाइ सो दियहो० २० । इति गाथाव्याख्यानं तीर्थस्तोत्राणि शाश्वताशाश्वतचैत्यस्तोत्राणि आराधनाकुलकं च पठेत् । उत्तराध्ययनभवभावनाव्याख्यानं च कुर्यात्, संवेगरङ्गशाला तस्याग्रे भणनीया, श्राद्धाः संघपूजादिमहोत्सवं बहु कुर्वन्ति । एतत्संग्रहो यथा—"संघजिणपूयवंदण उसगत्थयसोहितयणु खमगंधा । नवकारसम्मसमईअ चउसरणासाणतित्थथुइ ॥ १ ॥ अनेन विधिना साधुः कृतपर्यन्तसाधनः । कालानुभावतो मोक्षं स्वर्गं वा गच्छति ध्रुवम् ॥ २ ॥" इति पर्यन्ताराधनाविधिः ॥ अथ अचित्तमुनिशरीरपरिष्ठापनाविधिरुच्यते—साधौ परासुतां गते तच्छरीरस्यैव क्रियां सर्वे मुनयः कुर्वन्ति । तद्दूरमध्यासन्ने स्थंडिलत्रयं

कुर्यात्, तत्र श्वेतसुगन्धिकुङ्कुमाञ्चितं श्वेतवस्त्रत्रयं धारयेत्, एकं मध्यप्रस्तरणे एकं प्रावरणे एकमुपरिप्रच्छा-
दने, दिवा वा रात्रौ वा मृतस्य साधोर्मुखं तत्कालमेव मुखवस्त्रिकया प्रच्छादयेत् । पाणिपादाङ्गुष्ठाङ्गुलिम-
ध्यानि ईषदीषद् विदारयेत्, करपादाङ्गुष्ठाङ्गुलीः परस्परं बध्नीयात्, यदा रात्रौ म्रियते तदा जागरणं का-
र्यम् । तत्र ये शिष्याः शिशवः कातराः अगीतार्थाः ते सर्वे ततोऽपसारणीयाः । ये पुनर्गीतार्था अभीरवो
जितनिद्रा उपायकुशला आशुकारिणः अप्रमादास्तैस्तन्निकटे स्थातव्यं, प्रस्रवणमात्रमपि अपरिष्ठापितं पार्श्वे
स्थापयितव्यं हृदये शिला दातव्या यदि शव उत्तिष्ठति ततो गीतार्था वामहस्तेन मात्रकात् मूत्रं गृहीत्वा
तमाच्छोटयन्ति । मन्त्रो यथा "गाहाय मा उट्ठ बुज्झ बुज्झ गुज्झ मा मुज्झ" इति निशि शवजागरण-
विधिः । ततो मृतकदेहं स्नपयित्वा कुंकुमकर्पूरादिभिर्विलिप्य तन्मुखे पञ्चरत्नं संस्थाप्य चोलपट्टपट्टीभ्यामा-
वृत्य पूर्वं प्रतिपादितवस्त्रान्वितायां सिढिकायां स्थापयेत् । मुखवस्त्रिकाविरोलिकाप्रभृति लिङ्गं पार्श्वे स्थाप-
येत् । केचिज्जिनकल्पिस्थविरकल्पिव्रतिन्यनुसारेण द्वादशचतुर्दशपञ्चविंशत्युपकरणस्थापनमप्यामनन्ति ।
काञ्चनं कलधौतं च प्रवालं मौक्तिकं तथा । पञ्चमो रजपट्टश्च पञ्चरत्नमिति स्मृतम् ॥ १ ॥" यत्र नक्षत्रे साधोः
प्राणप्रयाणं स्यात् तत्र नक्षत्रं चिंत्यम् "विशाखा रोहिणी चैव त्र्युत्तराश्च पूनर्वसू । पञ्चचत्वारिंशन्मुहूर्तान्ये-
तानि प्रकीर्तयेत् ॥ १ ॥" एतेषु नक्षत्रेषु मृतस्य साधोः पार्श्वे कुशमयं पुत्रकद्वयं कृत्वा लघुरजोहरणं मुखव-
स्त्रिकां हस्ते स्थापयेत् । मृतस्य वामबाहौ स्वचिह्नौ पुत्रकौ दोरकैर्बध्येते, तयोरकरणे अन्ययोर्विपत्तिर्भवति

“अश्विनी कृत्तिका चैव पुष्यो मृगशिरो मघा । पूर्वाफाल्गुनिका हस्तश्चित्रा मैत्रं च वासवः ॥ १ ॥ पूर्वाभाद्रपदा पूर्वाषाढा मूलं श्रुतिस्तथा । रेवती चेति धिष्ण्यानि तानि पञ्चदशापि हि ॥ २ ॥ त्रिंशन्मुहूर्तनामानि कथयन्ति विचक्षणाः । एतेष्वेकं पुत्रकं च कुर्वीत खलु पूर्ववत् ॥ ३ ॥ तस्मिन्नकृते अन्यस्यैकस्य विनाशः । आर्द्राश्लेषाशतभिषग्भरणीस्वातिरैन्द्रिकाः। एतेषु पञ्चदशसु मुहूर्तेषु न च किंचन ॥४॥” इति नक्षत्रविधानं । ततः स्कन्धिकचतुष्टयं प्रगुणीक्रियते तद्विधिश्चायम्—तैर्वामकक्षाधः कृत्वा कल्पप्रावरणं विपरीतं कार्यं, रजोहरणं मुखवस्त्रिकादि तैः कटोत्कटिसूत्रे दोरिकां विच्छिन्नोघल्पं तथैव विपरीतं प्रावृत्य दण्डं विपरीतं संस्थाप्य कनिष्ठसाधुं पुरतः कृत्वा सर्वज्येष्ठं पश्चात् कृत्वा चैत्ये व्रजन्ति । तत्र प्रविश्य विपरीतं रजोहरणं विपरीतां मुखवस्त्रिकां धारयित्वा कनिष्ठमग्रे कृत्वा विपरीतं शक्रस्तवं कथयन्ति “पुव्व जइ वीराइ” पश्चात् शांतिस्तवः पश्चात् शक्रस्तवः ततः ऐर्यापथिकी ततः पुनः निरन्तरयुक्त्या कल्पं प्रावृत्य ज्येष्ठमग्रे कृत्वा समरजोहरणमुखवस्त्रिकाभ्यामैर्यापथिकी । शक्रस्तवशान्तिस्तवक्रमकथनेन चैत्यवन्दनं कुर्वन्ति जयवीय रायपर्यन्तं, ततः “शिवमस्तु सर्वजगताम्” इत्यादि पठन्ति, ततो भगवन् “आवस्सी” इति कथयित्वा निजवसतौ यान्ति, वसतिद्वारमागताः पुनः कल्पमुत्तार्य सुवर्णजलेनाभ्युक्षणं गृह्णन्ति, वसतिमध्ये प्रविष्टा उष्णजलेन देहक्षालनं कुर्वन्ति, तत आचार्यमहर्द्धिककृतानशनमहातपस्विबहुसुजनवल्लभस्य मरणे दिनत्रयमस्वाध्यायः एकदिनमुपवासः अन्येषां मरणे द्वयमपि न, ततोऽशुभे दिने उत्थापनं कायोत्सर्गाद्यारम्भो न क्रियते, शुभ-

दिने जिनपूजापूर्वकमुत्थापनं शुभकर्मप्रारम्भश्च । इति महापरिष्ठापनविधिः । तथा आचार्यादीनां कृतानशनानां वा मृतौ श्राद्धा रथिकादिशोभां कुर्वन्ति, परिष्ठापितशवस्यापि संस्कारकरणं श्राद्धानां कृत्यमिदम्- "व्रते च योगोद्वहने तपस्युत्थापनाकृतौ । आवश्यके च सर्वत्र साम्यं साध्वीतपस्विनोः ॥ १ ॥ वन्दने स्थापनाकार्ये सवस्त्रावश्यके तथा । एतेषु साधुसाध्वीनां भेदो नान्यत्र कुत्रचित् ॥ २ ॥ सवस्त्रावश्यके चैव परमेष्ठिप्रवन्दने । श्राद्धीश्राद्धयोर्गुरौ कार्ये भेदो नान्यत्र कुत्रचित् ॥ ३ ॥ सूतकं पिण्डदानं च परमप्यौर्ध्वदेहिकम् । शोको मृते परे साधौ मुनीनां नैव विद्यते ॥ ४ ॥ इत्याचार्यश्रीवर्द्धमानसूरिकृते आचारदिनकरे यतिधर्मोत्तरायणे यत्यन्तक्रियाकीर्तनो नाम द्वात्रिंशत्तम उदयः ॥ ३२ ॥ संपूर्णं यतिधर्मोत्तरायणम् । सर्वाग्रं यतिधर्मोत्तराणां श्लोका उभयमिलने आदितः गृहिधर्मयतिपूर्वोत्तरायन ग्रंथाग्रं ४५००।९० ॥

इति श्रीमण्डलाचार्यकमलसूरिविकासित—खरतरगच्छमालाद्वितीयपुष्परूपे श्रीवर्धमान-
सूरिविरचित आचारदिनकरस्य प्रथमविभागः संपूर्णः ।

१ मुनिमरणेपिण्डप्रतिषेधेन गृहिणां तदावश्यकत्वमवगम्यते ।

पाठान्तरैः सहितः शुद्धपाठः ।

पत्रं	पंक्तिः	पाठान्तराणि ।	पत्रं	पंक्तिः	पाठान्तराणि ।	पत्रं	पंक्तिः	पाठान्तराणि ।
नि. २	२	तत्क्रियात्यागा.	,,	१४	प्रतिनीप्रतदानं	सा. ६	४	यस्येति नाम
,, २	११	खंधो अ	सा. ३	७	षष्ठीजागरणं	,,	६	तुष्टिपुष्टिप्रदे
सा. २	१	पक्खपहो	नि. ४	५	चतुस्सरणमेव	,,	९	विषात् रक्ष २ विष-
सा. २	११	प्रीणनकरं	,,	६	क्षामणं चैव			धरेभ्यो रक्ष २
सा. २	१४	तप्पणं समणस्स	सा. ४	१२	शक्रार्हच्छ्रुत			दुष्टग्रहेभ्यो रक्ष २
,,	,,	विद्दे वड्डियं-	सा. ५	३	विज्जयं जोइसं			राजभ्यो रक्ष २
नि. ३	१	धम्मजागरिअं	नि. ६	१	दक्षिणकरसावित्रीकः			रोगभयेभ्यो रक्ष २
,,	,,	बारसाहिमे	,,	३	कर्मप्रभृतिमर्हति			रणभयेभ्यो रक्ष २
,,	७	निर्मम्रयति	,,	७	भूपतिदुर्गतः			राक्षसेभ्यो रक्ष. २

१ प्रतिपत्रं निरंक-सांकगतपंक्तिनिर्देशस्थलेषु पाठान्तराणि शुद्धपाठाश्चसंगृहीताः सन्ति ।

	पत्रं	पंक्तिः	पाठान्तराणि ।
नि.	७	४	व्यन्तरज्वरराक्षस
		७	वा सहस्रमूलीकं
सा.	७	१	जन्मासि-संसारवानसि-
			भवविभ्रमिषुरसि
	,,	३	तत्कुर्या येन न
ति.	८	३	संस्थापनपरा
	,,	५	हारोपदर्शनधर्मोप.
	,,	१०	मित्थत्ते
	,,	११	काइया तेहिं
सा.	८	९	नृनामविहिते
नि.	९	४	स्वयं गुरुर्वा
	,,	८	आत्मन् त्वमात्मा-प्राप्यं
			मनुष्य.
	,,	१०	तुष्टिः पुष्टिर्वृद्धिः
सा.	९	१०	कमढ सुरनाह । संपत्त-
			जोगहुत्ती
सा.	१०	४	श्रीं ह्रीं ॐ
	,,	६	सिद्धार्था लवणं
	,,	७	सूतिकाः कुल.
नि.	११	५	ततश्च सुस्नातां
नि.	१२	३	जन्मदिनात्तृतीये
	,,	४	शिशुं मातुः स्तनौ
सा.	१२	३	विधिमारभेत
	,,	९	'नलिखवओ' भ्रंशः तत्र
			'यथा' इत्यादि पठनीयं
नि.	१३	१२	वरदाभयकरे
सा.	१३	१	पूज्यन्ते । मातृणां ऊर्ध्वो-
			पविष्टसुप्तध्यानलिखने
			विशेषः । तत्र स्थाने
			स्थिरीकरणं सुखहेतुः ।
			एवं मातृः
	,,	३	षष्ठीमम्बारूपां
	,,	७	यथा ॐ भगवति
नि.	१५	१४	ढौकनिकां
नि.	१६	११	देशोत्पन्नान्यनगरप्रा-
			प्याणि सर्वाणि

पत्रं	पंक्तिः	पाठान्तराणि ।
सा. १६	२	तावन्नशाक
,,	४	अमृताश्रवमन्त्रेण
,,	५	ततः कुलदेवी
,,	७	तपस्यन्नपि-दायकं केवलं
,,	९	परमान्नपरिपूरित
सा. १७	४	श्रुतेनाङ्गोपाङ्गैः कालिकै-रुत्कालिकैः
,,	५	विद्धकर्णो भूयात्
नि. १८	१	न ज्ञानादशनात्परम्
,,	२	नावमे वा
,,	९	नैवेद्यं देवे देयं
,,	११	मुण्डनमेव ।

पत्रं	पंक्तिः	पाठान्तराणि ।
सा. १८	१	षड्रसविकृति
,,	८	तहय साहूणं
,,	१०	उमग्गेण-इक्ष्वाकुवंश्य-यादववंश्य
नि. १९	१	देवाणुप्पिया-भवं नएयं भविस्सं
,,	३	माहणकुलेसु वा आया-इंसु वा आयाइंति वा आयाइस्संति वा
,,	५	अन्नयरेसु—जाइकुल—आयाइंसु आयाइंति
,,	६	आयाइस्संति-अत्थि

पत्रं	पंक्तिः	पाठान्तराणि ।
		किर एसेवि-रयभूए—उस्सप्पिणीहिं—वइक्क-ताहिं
,,	७	अवेइयस्स—उदएणं स-मुप्पज्जइ जन्नं अरिहंता
,,	९	आयाइंसु वा आयाइंति वा आयाइस्संति वा
,,	१०	जम्मनिक्खम—निक्ख-मिस्संति वा तं जीयमे एअं
,,	११	गयाणं सक्काणं—तुच्छ-किविणदरिद्द 'भिक्खा—

पत्रं	पंक्तिः	पाठान्तराणि ।
		साहराविति्तए ॥"
,,	१४	शेषाणां च—गार्हस्थ्य- मुद्रा ।
सा. १९	१	गुप्तिगुप्तानां—रत्नत्रयी ह्रद्गतोवाभूत्
,,	२	रत्नत्रयीं वहन्ति
,,	५	रत्नत्रयलेश
,,	११	पासनादिभिः
,,	१३	स्वयमाचरणं—न तेषां परेषामनु
नि. २०	६	पूर्वोक्तं तन्तुद्वयं
,,	८	ब्राह्मणानामेव ।

पत्रं	पंक्तिः	पाठान्तराणि ।
सा. २०	१	सर्वेषां वा
,,	२	श्रुतिविधौ स्मृतिक- र्महीनः
,,	८	स्यात्पटुः शीतजन्मा— च्छुकेन्द्वोर्जीव
नि. २१	१	कृतश्वेतवस्त्रो
,,	७	अर्हद्भ्योनमः सिद्धेभ्यो नमः आचार्येभ्योनमः उपाध्यायेभ्योनमः साधुभ्यो नमः ज्ञाना- यनमः दर्शनायनमः
,,	१३	त्रिस्त्रिः प्रदक्षिणीकृत्य

पत्रं	पंक्तिः	पाठान्तराणि ।
सा. २१	५	शनाय, सुमङ्गलाय— चन्दनेना
,,	८	गुणरहितोस्मि, गुरुर- हितोस्मि
,,	१०	प्रवचनदानाय
नि. २२	१	कर्माष्टकेन प्रकृति
,,	५	सूचनाय, वैश्यस्य सप्त- विंशतिकरतद्धर्मसूत्रसूच नाय । नवगुण
,,	१३	पुनरूर्ध्वस्थितः
सा. २२	१	धारयेस्तदक्षय्यमस्तु
सा. २३	३	धृतजिनदण्डोसि

पत्रं	पंक्तिः	पाठान्तराणि ।
,,	१३	त्वयाकृतो ब्राह्मणोऽहं
नि. २४	३	पुनर्नव० 'समनुजानीहि'—पुनर्नव० व्रत० 'ममानुज्ञातं'
,,	७	करणकारणे कारयितव्यमिति कथनीयं । अनुज्ञातमिति न कथनीयं ।
,,	१३	शूद्रान्नं चैव
सा. २४	२	पलाशिनः । न भोक्तव्यं
,,	११	वर्जयित्वा वधोज्झिनाम्
नि. २५	१०	प्रोक्तं वेदधर्मादि—प्रणामोपि कुलिङ्गिषु
सा. २५	१	नागराज्याधिकारिणां
,,	३	परतत्ववत्
,,	६	स्वस्वजात्यन्य
,,	७	न्योन्याप्रतिलङ्घनं
,,	१०	प्रवेशोल्लङ्घनं
,,	१२	नखिनां श्वापदादीनां
नि. २६	१२	न शक्यते तदा षण्मासं
,,	१३	तदभावे तद्दिन एव—क्षिप्तिः
नि. २७	७	पूतःकृतोहं पूज्यःकृतोहं
नि. २८	१	न परिग्रहव्युत्पत्ते.
,,	७	शक्रस्तवपाठश्च
सा. २८	१४	भूताशीर्वादद्वानविज्ञान
नि. २९	६	ततस्तस्य शिखां संस्थाप्य
,,	१२	नैम्नगसलिलमसि,उन्मग्नसलिलमसि
नि. ३०	३	शेषशिक्षाक्रमः
,,	१२	॥१२॥ गृह्यगुरोःसकाशाद्धर्मप्रतिपत्तिः प्रायो वर्णव्यवहारानुसारिणीत्वेन परिणमति मार्गानुसारित्वं ॥
सा. ३०	७	ततः शिष्यं गुरोः पुरो

	पत्रं	पंक्तिः	पाठान्तराणि ।
	,,	१२	त्रिसंध्योपासनं गुरोः
नि.	३१	३	मर्थशास्त्रं शूद्रस्य
	,,	४	पाठश्च संस्कार
सा.	३१	१	कन्याविक्रतयो यथा
नि.	३२	५	शोभनाय तुभ्यं
	,,	८	नास्ति जैनवेद्वर्णाद्या-श्रिताचारस्योक्तत्वात् । जैनानां तदकृत्यत्वात् । दैवतेप्येवं परसमयाद्व-सेयावेतयोर्भत्रौ इति धर्म्यं आर्षविवाहः ।
	,,	९	स्वपुरोहिताय इष्टापूर्त-कर्मतः स्वकन्यां

	पत्रं	पंक्तिः	पाठान्तराणि ।
सा.	३२	३	पातोपग्रहयुतेषु
	,,	५	द्वादशीदिवसे
नि.	३३	५	षड्दशाष्टसहितः
	,,	९	वेंदमन्त्रं पठेत्
सा.	३३	७	श्रीपर्णीकाष्ठमयं—पट्टक-स्थापन
नि.	३४	२	संनिहितीकृत्य
सा.	३४	६	वाद्यसहितमिह—विशे-षाद्रूयोर्विधेयं
	,,	११	जनाः स्वस्वसंपत्त्या
	,,	१२	पुरतश्च ब्राह्मणा गृहशान्ति

	पत्रं	पंक्तिः	पाठान्तराणि ।
	,,	१३	आदिमो यन्ता
नि.	३५	७	विमृश्यः,आदिमो विस्रष्टा
	,,	१३	सुखं करोतु, सौख्यं करोतु
सा.	३५	३	तत्रैव च पुरे
	,,	६	वरस्याडंबरं—कन्या-गृहद्वारि
	,,	१०	निक्षिप्याकर्षमाणं
नि.	३६	९	चतुर्ष्वपि द्वारेषु
सा.	३६	३	रं रां रीं रूं

पत्रं	पंक्तिः	पाठान्तराणि।
,,	६	वेदिर्हस्तलेपात्—कम्बा-युद्धवधूवरा
,,	७	कौसुम्भसूत्रान्तःकर्षण
नि. ३७	२	भुवनपतीन्
,,	५	इन्द्रसामानिकपार्षद्य
,,	६	सायुधवाहनान्
,,	८	सहितभेदभिन्नाः
,,	१३	मङ्गलगीतवादित्रवादन-भोजन
सा. ३७	६	आमुकप्रदौहित्रः अमुक-दौहित्रः अमुकः सर्व-गुणान्वितो वरयिता।

पत्रं	पंक्तिः	पाठान्तराणि।
		अमुक गोत्रीया
,,	८	अमुकप्रदौहित्री अमुक-दौहित्री
,,	११	धूपदीपनैवेद्य
नि. ३८	१	देहानुमतानुगतां-प्रत्या-ख्यानावरणा
,,	३	सुकृतः स्वनुष्ठितः सुनि-वृत्तः सुप्राप्तः
,,	४	नागप्रत्यक्षं
,,	६	सुप्राप्तः सुसंबन्धः
,,	८	लाजाग्नस्य
सा. ३८	८	इति पुनर्वैश्वानरं

पत्रं	पंक्तिः	पाठान्तराणि।
नि. ३९	६	तुरगदासदासीगोवृष
,,	१२	जलयवतिल
सा. ३९	१	भूषणहस्त्यश्वादि
,,	१२	यामात्रा—पूर्वयुक्त्यैव।
नि. ४०	३	ततस्तत्र वधू-वागमरीत्या
,,	६	कुलाचारेण
सा. ४०	१	विप्रेभ्यो बन्दिभ्योऽपर
,,	४	श्वशुरो जामात्रे
,,	८	स्वस्वबन्धानुसारेण
,,	९	विधिभिस्ततः
नि. ४१	३	'नलिखवतुं' इत्यपभ्रंश-स्त्याज्यः

पत्रं	पंक्तिः	पाठान्तराणि ।
सा. ४१	३	ततः महात्मभिः स्वेच्छ-या चरतु ।
,,	४	‘इतरातांई’ अपभ्रंश-स्त्याज्यः
,,	५	स्वजनसंगतिः । मातृ-पूजा च
	६	पौष्टिके ।
नि. ४२	६	मुत्तो मुक्खस्स
,,	११	पडिरूवो तेयस्सी
सा. ४२	३	आयरिएहिं पवयणं
,,	५	॥२॥”अथवा—“आया-राई अट्ठओ तह चेवय

पत्रं	पंक्तिः	पाठान्तराणि ।
		दसविहो अठिइकप्पो । बारस तव छावस्सग सूरिगुणा हुंति छत्ती-सं ॥ ३ ॥”
,,	६	सुसंतुट्ठो ।
,,	९	आणंदओ २९ चुक्खो
,,	१३	सुदप्पिओ ८ ।
,,	१४	पक्खज्जुत्तो
नि. ६१	२	व्याख्यानबुद्ध्याशयैः
सा. ६१	१०	ध्यानमत्युत्तमानां
,,	११	चन्दनवन्दनीयः
नि. ६२	८	एतत्कृत्यं परम

पत्रं	पंक्तिः	पाठान्तराणि ।
,,	१०	मांसीसशैलेयक
,,	१२	व्योमाच्छः—धूपोत्क्षे-पकृतो
सा. ६२	६	पठेत्—“साम्राज्यस्यपदो
नि. ६३	४	रजतनिष्कमणिबापी
,,	१०	सिध्वन्त्यनन्याशयः
,,	११	तिमिलार्द्रकटार्धे
,,	१३	तस्मिंस्तादृश
,,	१४	आतपशब्दो
सा. ६३	२	सामिअ सुमेरु
,,	५	प्रतिभासमाने ।
,,	९	सहस्राधिक

पत्रं		पंक्तिः	पाठान्तराणि ।
नि.	६४	२	उपच्छन्दसिक
	,,	४	तनो तनु संनिकर्ष— समुच्छुर
	,,	५	विपद्विसरं
	,,	८	चच्चच्चीरिल्लि
	,,	१२	पाठः—"कैलासवास
सा.	६४	२	फणमणिमहसा
	,,	७	क्षेत्रेप जिनार्चने भवत
	,,	९	विश्वप्रकाश कृतभव्य
नि.	६५	२	वरिष्ठविघ्नजात
	,,	४	प्रसृततापभरस्य
सा.	६५	२	पेयभक्ष्यलेह्य
नि.	६६	८	फासुएणं एसणिज्जेणं असणपाणखाइमसाइ-मेणं वत्थकंबलपायप-च्छणपडिग्गहेणं ओस-भेसज्झेणं पाडिहेर-रूवेणं सिज्झासंथा-रएणं—वरे अणुग्गहो
नि.	६७	३	"जावनियमं पज्जुवासा-मिस्थाने जावजीवाए"
	,,	७	खमइ तस्स
	,,	९	पज्जत्ता वा अपज्जत्ता वा
सा.	६७	६	माणुस्सं तिरिच्छं
	,,	८	पावठाणाइं
	,,	९	सिला लेट्टु सक्करा— धाउरूवं
	,,	१०	कायगयस्स
	,,	११	गेरिअ सुवन्नाइं—धाउ-रूवं सरीरं—बिंबेसु धम्म
	,,	१२	अभिनंदेमि
	,,	१३	हिम हरतणुरूवं सरीरं एतदुपरितनो भागः शुद्धादर्शे नास्ति
नि.	६८	१	सरीरं पाणिवहे पाणि-संघट्टे पाणिपीडणे पाव-

पत्रं	पंक्तिः	पाठान्तराणि ।
		वट्टणे मित्थतपोसणे
		ठाणे संलग्गं अरिहंत
,,	२	जंतुरक्खण-जिणहाणेसु
,,	३	जं मे तेउ
,,	४	संघट्टणे—पाववट्टणे
,,	६	सीआवहारे
,,	१०	कायगयस्स
,,	११	निज्झासरूवं—संघट्टणे—
		पाववट्टणे
सा. ६८	२	तसकाय
,,	३	सुक्क चम्म रोम
,,	५	मए इत्थभवे

पत्रं	पंक्तिः	पाठान्तराणि ।
,,	१२	कुलगणेअ ।—खामेमि१
,,	१३	करे सीसे । सवं खमा-
		वइत्ता—अहयंपि ॥ २ ॥
		सवस्स जीवरासी रस-
		भावओ धम्मनिहिअ
		नियचित्तो । सवं खमा-
		वइत्ता खमामि सवस्स
		अहयंपि ॥ ३ ॥ भयवं
,,	१४	पंचेंदिअवसट्टेणं ॥ ४ ॥
नि. ६९	२	अहं अभिदूमिओ-अभि-
		हओ तममहंपि—सद-
		ण्डकस्स

पत्रं	पंक्तिः	पाठान्तराणि ।
,,	७	जं च न सुमरामि
,,	१४	इति त्रिः पठेत्
सा. ६९	३	सङ्ढं च इच्चेइआइं
,,	८	वत्तियागारेणं
,,	९	खाइमं सवं साइमं
,,	१०	अणागायं पच
,,	१२	गुरुर्नित्थारगपारगो
,,	१३	वयम्मिउसहो
नि. ७०	११	नक्षत्रपुत्तलविधानं—
		कुशपुत्तलिका
सा. ७०	१	अन्येन मार्गेण
,,	१३	जिनस्तवं ।-ततः कल्या-

	पत्रं	पंक्तिः	पाठान्तराणि ।
			णमेव च ॥
	,,	१४	अन्त्यसंस्कार—॥ १६ ॥
			तत्समाप्तौ च समाप्तमिदं
			गृहिधर्मपूर्वायनम्
नि.	७१	५	पंचसमईहिं
	,,	७	सयणमुद्दिट्ठं ।
	,,	१०	चावेयव्वो सया
सा.	७१	१	परीसहे जेउं
	,,	२	होइ पव्वज्जा
	,,	५	दीसंति अणेगे
	,,	६	दीसंति सिंहपोरिस
नि.	७२	४	मेहुणं पच्चक्खामि

	पत्रं	पंक्तिः	पाठान्तराणि ।
	,,	५	नित्थारगपारगो
	,,	१०	सचित्तवर्जितम् ।
सा.	७२	१२	आइसामि
नि.	७३	३	समुद्दिसामि
सा.	७३	१	भवतैवैतत् विधेयं
नि.	७४	४	मूढेअ १३ अणत्ते १४
			जुंगिएईअ १५। अवबद्ध-
			एअ १६ निप्पेडि
	,,	६	नपुंसकः
	,,	८	राजापराधी
	,,	११	जुंगितो द्विधा जाति-
			जुंगितः कर्मजुंगितश्च ।

	पत्रं	पंक्तिः	पाठान्तराणि ।
			जातिजुंगितो
	,,	१२	कर्मजुंगितः—जुगि बुगि
	,,	१४	वशात्तिर्यग्भावमाप्ता-
			नामपि स्वयं
सा.	७४	६	सउणि६तक्कमसेवीय
	,,	७	दस एदे नपुंसगा
	,,	९	एतानि षट्—॥१॥"
			उपजातिवृत्तं
	,,	१२	सर्वव्यापारान्
नि.	७५	४	सेवंति नारि पुरिसा
	,,	५	सव्वे वि हुनेया—
			मत्यासक्ति

पत्रं		पंक्तिः	पाठान्तराणि ।
	,,	७	वडभखुज्जा
	,,	८	आयरियत्तं न
	,,	९	काणगमहिसो–पाद- हीनाः कर्णहीना
सा.	७५	४	मुचितं। प्रवज्याग्रहणे तु
	,,	५	यथाविध्युप.
	,,	७	दिज्जअ वराणं
सा.	७६	२	क्षेप्ता त्वं–गम्यस्त्वं
नि.	७७	२	वासक्खेत्रं
	,,	४	न्तिश्रुतक्षेत्र
	,,	७	रजोहरणदशाः
सा.	७७	८	दण्डकोच्चारः सर्वालापे
नि.	७८	८	प्ययमेव विचारः ।
	,,	१०	किमिच्छए ।
सा.	७८	२	विभूसणे ॥ ९ ॥
	,,	३	उज्जुदंसिणो
	,,	४	संजया सुसमा
नि.	७९	१३	युक्तं पूर्ववत् करोति
सा.	७९	३	अणुन्नाणुओगोपवत्तइ
	,,	४	,,
	,,	५	,,
	,,	७	पडिक्कमणस्स–आव- स्सगस्सवइ
	,,	९	उक्कालियस्स–कप्प-
			सुअस्स
	,,	१०	पमायप्पमायस्स
	,,	१३	जंबुद्दीवपणत्तीए
नि.	८०	१	देविंदोववायस्स
	,,	३	आयरस्स
	,,	१२	समणुजाणामि
	,,	१४	पाणाइवायाओ वेर- मणं १
सा.	८०	१	वेरमणं सव्वं
	,,	२	समणुजाणामि
	,,	६	जावज्जीवाए–अहावरे
	,,	७	वेरमणं सव्वं

पत्रं		पंक्तिः	पाठान्तराणि ।
	,,	९	जावज्जीवाए
	,,	१०	अहावरे
	,,	१४	साइमं वा नेवसयं राइं भुञ्जिज्जा नेवन्नेहिं राइं
नि.	८१	१	राइं भुञ्जंतेवि-जावज्जीवाए
सा.	८२	२	मार्जनिकापि
	,,	५	योगोद्वहनकालो
सा.	८३	६	जनदायिकाः ।
	,,	११	॥ ३५ ॥ प्राशुकाम्भो धौतकरो गृह्णाति सकलं च तत् । गणियोगकृदानीतं कल्पते भोजनादिकम् ॥ ३६ ॥
नि.	८४	९	चान्यथान्यथा ।
सा.	८४	१	अतिक्रामति
	,,	४	मार्षि प्रमादतः ।
	,,	६	वार्द्धप्रत्याख्यानं समादिशेत्
	,,	७	षट्पदीपीडनादेव
	,,	८	व्रजेन्नाकृतयोगेन
नि.	८५	११	रजोहरणीं
नि.	८६	११	कालिकेषु कालग्रहणं ।
सा.	८६	३	पाठौ न युज्येते
	,,	५	दशकगते—प्रहरमेकमस्वाध्यायः ।
	,,	६	स्वाध्यायः । तत्रापि वर्षाकाले विद्युदुल्कापातयोः प्रहरमस्वाध्यायः । गर्जिते
	,,	८	अस्वाध्यायकारिणि
	,,	१०	कालोपि भवति
	,,	११	अट्ठदिणातेउ सत्त
	,,	१२	पञ्चकल्पागमे
नि.	८७	१	कल्पतर्पण-कल्पतर्पण
नि.	८८	१	आवस्सही निस्सही

पत्रं		पंक्तिः	पाठान्तराणि ।
			भणन्तौ
	,,	३	पाभाइयं कालं
	,,	४	हस्तेन ददाति
	,,	५	आवस्सही निस्सही
	,,	७	क्षमाश्रमणपूर्वं
	,,	८	वट्टइ साहुणो उवउत्ता
			होहु
	,,	९	आवस्सही निस्सही"
	,,	१२	इच्छाकारेण
सा.	८८	२	अस्खलितादि
	,,	१२	पाभाई कालिया-
नि.	८९	१	पठति । यथा—"धम्मो

पत्रं		पंक्तिः	पाठान्तराणि ।
	,,	६	॥५॥ इति दुम्मपुप्फि-
			अज्झयणं
	,,	८	चाइत्ति वुच्चई-पठिकुवई
सा.	८९	७	आवस्सीहि निस्सीहि
	,,	१४	वैरात्रिकं रात्रिचतुर्थ
नि.	९०	४	प्रतिलेखनां विधाय
सा.	९०	९	करेमि काउस्सग्गं
	,,	१२	जोगक्खेवाणवियं
नि.	९१	२	उद्देसाइनिमित्तं
सा.	९१	३	वंदित्ता पवेयय
	,,	४	अमुअसुअक्खंधं
	,,	९	क्खंधस्स अमुगस्स

पत्रं		पंक्तिः	पाठान्तराणि ।
नि.	९२	१०	अमुगसुअक्खंधस्स—
			उद्देसा—समुद्देसा
नि.	९३	६	द्रुमपुष्पिका
	,,	९	समुद्देशानुज्ञाः
सा.	९३	३	तृतीयोद्देशस्योद्दे० ३—
			मुवंक्षका ६
नि.	९४	८	मुवंक्षका० ३ । ८ ।
सा.	९४	७	मुवंक्षका० ६ । २३
नि.	९५	१	प्रथमाध्ययनस्य
सा.	९६	८	सप्तमस्यौघाम्र
नि.	९७	३	षोडश्या विमुक्त
नि.	९८	९	मुवंक्षका० १ ॥ ९ ॥

पत्रं		पंक्तिः	पाठान्तराणि।
सा.	९८	८	दशमदिने नि० काल० १ इत उत्तरं अग्रिम-पंक्तिगतं षष्ठाध्ययन-स्येति ग्राह्यं
,,		१२	मुवंक्षका० १ । १५
नि.	९९	११	मुवंक्षका० ६।८—३। मुवंक्षका०
,,		१२	रुद्देशयोरु० ३ मुवंक्षका ६
,,		१३	"एकादशदिने" इत्या-रभ्य निरंक१००पत्रस्थ पंक्ति४पर्यंतं अधिकं
नि.	१००	६	निर्विकृतिकेन
,,		७	अनुज्ञाप्यते
,,		११	द्वितीयवर्गस्योद्देशः
सा.	१०१	२	नानामादि० शेषं तथैव ।
,,		१३	अनागाढयोगाः
सा.	१०२	३	आयुक्तपानका विधेया
,,		१२	मुवंक्षका० ३ । १० ।
सा.	१०३	३	राज्यप्रश्रेणिक .
,,		५	म्लैर्निवर्तते ३ ।
सा.	१०४	७	आ०काल० १
,,		८	आ० काल० १
,,		९	क्षका० ६ । १६ सप्त-दशदिने इति ज्ञेयं, मध्यवर्ती भागस्त्याज्यः
,,		१३	रुद्देशयोरु० ३ मुवंक्षका
नि.	१०५	९	उद्देशः प्रथम
,,		१३	मुवंक्षका० ६ ।३६।
नि.	१०६	१	त्रिभिः कालैस्त्रिभिः
,,		८	पूर्ववत् उद्दे०३—दिनत्रये ११
सा.	१०६	२	यदि तत्रैव दिने
,,		४	पञ्चदशसु काले.
नि.	१०७	११	एकैकस्मिन्नेव दिने

	पत्रं	पंक्तिः	पाठान्तराणि ।
	,,	१२	नव नव ९।४७।
नि.	१०९	७	बीए पढमोद्देसे
	,,	८	पन्नरसमे पण
	,,	१२	सयाइगतीसा
	,,	१४	अट्ठमद्दिअहे
सा.	१०९	१	चउद्दसीसु ।–अज्झयणं १ । नव २ सोल ३
सा.	११०	११	गुरुपाठानुकरणेन
नि.	१११	११	शिष्यान् समवसरणस्य
नि.	११३	९	निष्कलः खलः ।
	,,	११	कप्पए तेसिं ।
नि.	११४	६	कर्पूरादिभिर्गन्धैरभि

	पत्रं	पंक्तिः	पाठान्तराणि ।
	,,	१०	वासाभिमन्त्रणे मुद्राः
सा.	११६	१०	मासाइ सत्तंता ।
नि.	११७	१०	ईदृशे दिने चन्द्रबले
	,,	१३	आस्वादनमात्रेण
सा.	११८	३	व्रतं नार्हन्ति–मिर्दोषैर्यैः
	,,	७	पुत्ताइ अणाएसा नहु जुग्गा
	,,	८	स्त्रियो व्रतदानं
नि.	११९	११	अह्मं पवत्तिणी-
	,,	१२	नंदिकट्ठावणियं-चेइआइं
सा.	१२१	११	पञ्चविहोविहु ।
नि.	१२२	२	केसरिया ४

	पत्रं	पंक्तिः	पाठान्तराणि ।
	,,	९	हेमंतंमि
	,,	११	करंतं मज्झे
	,,	१२	उन्नओअ तइओ–संगुलदीहं
सा.	१२२	६	तीए वसहिं
नि.	१२३	१४	असिविवओ
सा.	१२३	१०	पात्रबन्धनस्य
सा.	१२४	८	दुष्टदैवतस्तावद्
	,,	११	द्विपटीकम्बलीरूपं
सा.	१२६	४	देवतार्पयति ।
नि.	१२७	३	कञ्चुकस्तु
	,,	५	त्रिहस्तायामे

	पत्रं	पंक्तिः	पाठान्तराणि ।
नि.	१२८	९	कत्तो सुत्त
	,,	१०	पुच्छणचोअणाय
सा.	१२८	१	थेरकप्पभेओअ
	,,	२	ततः ऐर्यापथिकीं
	,,	८	मुक्खसाहण
	,,	•९	पञ्चग्रासैषणा
नि.	१२९	४	क्त्वा शक्रस्तवं
	,,	१०	३६ मुहाय३७हयकन्ना
नि.	१३१	४	पुष्यो भूल
	,,	६	नवम्यन्ता भवन्ति
नि.	१३३	४	नियमांश्च पुनः
नि.	१३५	१४	धर्मस्त्वाख्यातवांल्लोकं द्वादशीं बोधि
सा.	१३५	२	तच्च धर्मानुषंगत्वं
सा.	१३६	९	साधुर्वाचनाचार्यो वा
नि.	१३७	१	तस्यालोचनां दद्यात् ।
	,,	६	अरिहं देवो गुरुणो सुसाहुणो जिणमयं महप्पमाणं ।
सा.	१३७	५	सेसाउ मासिएणं
	,,	१४	छुहिएणा हारिओ
सा.	१३८	१	तत्र श्वेतं सुगन्धि
	,,	६	मूत्रं गृहीत्वा मन्त्रं पठित्वा
	,,	७	गुज्झ मा सुज्झ

आचारदिनकरस्थपाठान्तराणि शुद्धपाठाश्च ।